कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

दाखल अंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
M-2594	द्विशानिभाष्य	-	धर्मशास्त्र	पूर्ण		4/9	77	संस्कृत	कागद	12	46		

M-2594

॥देवयानिभाष्यस्येदं पुस्तकं पंचमोध्यायः॥ छ॥

११
दर्शया०५

श्रीगणेशाय नमः॥ ॥आचार्येण श्रुतिमंत्रपाठक्रमेण पौर्णमासामावास्यादीन्यग्निहोत्रं तानि कर्माण्युक्तानि। इदानीं श्रुति
मंत्रपाठक्रमेणैव चतुर्मास्यानि वक्तुं तेषामारंभकालमाह॥ चातुर्मास्यप्रयोगः फाल्गुन्यां॥ ॥चातुर्मास्यशब्देन वक्ष्यमा
णानि वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयसंज्ञानि चत्वारि पर्वाण्यभिधीयंते चतुर्षु मासेषु भवानि चा
तुर्मास्यानीति व्युत्पत्त्या तत्र न वाधिकारे चातुर्मास्यान्यज्ञेभ्यो वक्तव्य इति वार्त्तिके। तत्राप्याग्नेयादियागा एव चातु
र्मास्यशब्देनाभिधीयंते न करंभपात्रदर्विहोमत्रैयवकादयो जुहोतयः। कुतः। अथ यदेष एतैश्चातुर्थे मासि यजते चा
तुर्मास्यैर्यजते स्यादौ चातुर्मास्यैर्यागैरिति यागसमानाधिकरण्यात्॥ अतश्चात्र यागा एव प्रधानं। जुहोत
यश्चैतदंगं। अस्याश्चिंत्तांया एतत्प्रयोजनं। आग्नेयादिसौर्यंतानां यागानां मध्ये यदि कश्चिद्विस्मृतः स माप्तेर
र्वाक् स्मृतस्तदा तस्य विस्मृतस्य सांगोयेतस्य करणं॥ जुहोतीनां विस्मरणे तु समाप्तेरूर्ध्वं स्मृते तस्याकरणमिति॥ तदु
क्तं कात्यायनेन। प्रधानस्याक्रिया यत्र सांगं तत्क्रियते पुनः। तदंगस्याक्रियायां नु नावृत्तिस्त्रैव तत्क्रियेति॥ विस्मृतमं
गमपि समाप्तेः पूर्वं क्रियत एव। तदुक्तं निदानसूत्रे॥ अंगमपरिसमाप्ते प्रधाने क्रियत इति॥ अंतरितप्राक्समाप
नात्कुर्यात् इति। मानवे तेषां चातुर्मास्यानां प्रयोगः आरंभः फाल्गुन्यां पौर्णमास्यां भवति॥ अत्र फाल्गुनीशब्देन
गौणी फाल्गुनी प्रतिपद्यते॥ शाखांतरे यथादर्शनात्॥ ऋतुमुखे चातुर्मास्यैर्यजेतेति॥ प्रतिपदेव ऋतुमुखं

प्रथमं दिनं ॥ न पौर्णमासी ॥ स्मृतावपि चैत्रप्रतिपद्दिवसं तारंभस्योक्तत्वात् । तथा च शांखायनः ॥ फाल्गुन्यां पौ-
मास्यां प्रयोगश्चातुर्मास्यानां चैत्र्यां वा वैश्वानरपार्जन्येष्टिः पूर्वस्यां पौर्णमास्यामुत्तरस्यां वैश्वदेवमिति ॥ स्वश-
खापानपि ॥ अथ पुनः प्रयुंजानस्य पूर्वेद्युः फाल्गुन्यै पौर्णमास्ये शुनासीर्यण यजेताथ प्रातर्वैश्वदेवेनाय प-
र्णमासेनेति प्रतिपद्येव पर्वविदधातीति ॥ कात्यायनाचार्योप्याह ॥ फाल्गुन्युपवसथे शुनासीरीयं प्रातर्वैश्वदेव-
मिति ॥ वरुणप्रघासस्साकमेधेषु च गृहान्नित्वा निर्मथ्याग्नी पौर्णमासेन यजतइति पर्वसमनंतरमेव पौर्णमा-
सानुष्ठानस्कृतेश्च ॥ आपस्तंबः ॥ फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजते पूर्वस्मिन्पर्वणि पंचहोता-
रं मनसानुद्रुत्याहवनीये स्रुग्राहं हुत्वारंभणीयां इष्टिं निर्वपति वैश्वानरं द्वादशकपालं पर्जन्यं चरुमिति प्रकृतेय
हिरण्यं वैश्वानरे ददाति धेनुं पर्जन्येमिद्वेष्टिः संतिष्ठते प्राचीनप्रवणे वैश्वदेवेन यजतेति पंचदश्यामेव वैश्वदेवमु-
पक्रम्य सांपद्दोहांतं कृत्वाश्वोभूते पात्रसंसादनपूर्वकालरसादिना प्रतिपद्येव पर्वकरणमाह ॥ मानवेपि चातुर्मा-
स्यानारप्स्यमानः पूर्वां पौर्णमासीमुपोष्याग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति पर्जन्यं चरुमिति ॥
प्राचीनप्रवणे वैश्वदेवेन यजेत फाल्गुन्यां चैत्र्यां वसंते वानोपवसथे चातुर्मास्येषु केवा श्मश्रू यजमानो वापयत
इति प्रकृत्यापस्तंबसूत्रेव प्रतिपद्येव वैश्वदेवविधानात् ॥ कठसूत्रेप्येवमेवोक्तमस्ति श्वोभूते तुल्यमानि र्वपणादि-
ति । अतः प्रतिपद्येव वैश्वदेवपर्व कर्त्तव्यं ॥ ॥ वैश्वानरपार्जन्यौ निरुप्येच्छन् ॥ इच्छन् वैश्वानरपार्जन्यौ निरूप्य

॥२॥
॥देवया॰५

चातुर्मास्यानां प्रयोगप्रारंभः कर्त्तव्यः। अयमन्वारंभणीयया सह विकल्प्यः। इष्ट्या वैश्वानरपार्जन्यो इष्ट्यान्वारंभणीयेति॥ शाखांतरात्॥ वैश्वानरो द्वादशकपालः॥ वैश्वानरो द्वादशकपालः पुरोडाशो भवति अत्र वैश्वानर इति विशेषणभूताद्गुणाद्देवायां तद्धितः। सो विष्टकृतान्यवद्यति। उत्सो समानीयसो विष्टकृत्तमितिवत्। अतो विशेष्यंगुणिनी देवता अग्निरत्र द्रष्टव्यं॥ शाखांतरे तथादर्शनात्॥ तथा च काठके॥ पूर्वामुपोष्याग्नये वैश्वानराय द्वादशकपालमिति। मनुरपि॥ पूर्वां पौर्णमासीमुपोष्याग्नये वैश्वानराय द्वादशकपालमिति॥ श्रुतावपि अनुदृष्टेष्ट्यामग्नये वैश्वानराय द्वादशकपालमिति पठ्यते॥ सूत्रकारेण तत्राभिप्राय वृत्रघ्न एकादशकपालो वैश्वानरश्चेति निर्गुण एवात्तं एवं च सति यत्र यत्र श्रुतौ सूत्रे वा निर्गुणं वैश्वानरपदश्रवणं तत्र सर्वत्राग्निगुणिनी देवता अनुक्तापि ज्ञेया॥ ॥न रुरुत्तरः॥ उत्तरः पार्जन्यश्चरुर्भवति। शाखांतरात्॥ अस्यां चापस्तंबसूत्रे दक्षिणा पठितास्ति हिरण्यं वैश्वानरे ददाति धेनुं पर्जन्य इति॥ वादकमात्या चान्वाहार्यः प्राप्नोति। मानवे च धेनुरनड्वांश्च दक्षिणेति॥ इयं द्विहविष्का इष्टिः पूर्वस्यां पौर्णमास्यां कर्त्तव्या॥ प्रथमप्रयोगे मातृश्राद्धसमनंतरं चातुर्मास्यान्यारप्स्यमान इति अवमादन्वारंभणीयावत्प्रथमप्रयोग एवेयमिष्टिर्भवति न द्वितीयादिप्रयोगेषु॥ इयं च यजतित्वेपि न चातुर्मास्यशब्दवाच्या॥ अन्वारंभणीयास्थानापन्नत्वात् तद्वदेव॥ यथा दर्शपूर्णमासान्वारंभणीया तच्छब्दवाच्या न भवति॥ एवमनसावपी अतो गत्वादस्याः विस्मरणेऽप्रयोगः। अथ वैश्वदेवे पर्वणि हवींष्याह॥ ॥आग्नेयः। अग्निदेवत्योष्टाकपाल

पुरोडाशाः अथ मं हविर्भवति॥ स वा आग्नेयोष्टाकपालः पुरोडाशो भवंति श्रुतत्वात्॥ ॥सौम्यश्चरुः॥ द्वितीयं हवि
सौम्यश्चरुर्भवति। अथ सौम्यश्चरुर्भवतीति श्रुतत्वात्॥ सावित्रो द्वादशाकपालोष्टाकपाले वा॥ तृतीयं हविः सावि
त्रः सवितृदेवत्यो द्वादशाकपालोष्टाकपालो वा पुरोडाशो भवति॥ अथ सावित्रो द्वादशाकपालो वाष्टाकपालो वा पु
रोडाशो भवतीति श्रुतत्वात्॥ अयं च पुरोडाशः पृथुतरः कर्त्तव्यः। स चैच्चपिष्टः पुरोडाशो भवतीति श्रुतेः॥ सावित्र
श्चातुर्मास्येष्विति वचनादुपांशु भवति॥ सारस्वतश्चरुः सरस्वती देवताश्चरुश्चतुर्थं हविर्भवति। अथ सारस्वतश्च
रुर्भवतीति श्रुतत्वात्॥ योषा वै सरस्वती सर्थः वादादत्र सरस्वत्या देवतात्वं। न नु सरस्वतः पौष्णश्चरुः प्रपिष्टानां
पूषदेवता प्रपिष्टानां प्रकर्षेण पिष्टानां व्रीहितंडुलानां चरुर्भवति॥ पौष्णश्चरुरिति श्रवणात्॥ तस्मादयं पूष्णे चरुं
कुर्वीत प्रपिष्टानामेव कुर्वंतीति श्रवणात्॥ एतच्चे यद्यपि दर्शपूर्णमासप्रकरणे पठितं तत्र च पूषा नास्ति अतः प्रक
रणादुत्कर्षो वाक्यबलेन विकृतौ यत्र पूषा तत्र पेषणं प्राप्यते॥ इदानीमिदं विचार्यते॥ राजसूये त्रिषंयुक्ते पै द्रा
पौष्णश्चरुरस्ति सोपि किं प्रपिष्टानां भवति उत नेति संदेह सूत्रे पौर्व पक्षं परिगृह्णाति॥ ॥द्विदेवतोपि नि
यमसामर्थ्यात्॥ द्विदेवतोपि पौष्णश्चरुः प्रपिष्टानामेव भवति। कुतः नियमसामर्थ्यात्॥ द्वयोः समुदितयोर्देवता
त्वं यस्मिन्नसौ द्विदेवतः। अत्र हीन्द्रसहितस्य पूष्णो देवतात्वं॥ तत्र पूष्णो नियमेन पिष्टं प्राप्नोति॥ इतरस्यैन्द्रस्यानि
यमः। तत्र कांस्यभोजिन्यायेनानियमानियमयोर्नियमस्य बलवत्त्वाद्द्विदेवतोप्यैन्द्रापौष्ण प्रपिष्टानामेव भवति॥

॥३॥
॥दवेया०५

तिप्राप्ते आह॥ ॥अर्द्धपिष्टं वोभयसामर्थ्यात्॥ अथ वा द्विदेवतं चरुमर्द्धपिष्टं कुर्यात्। कुतः। उभयसामर्थ्यात्॥ पूष्णः
पिष्टमितरस्य चापिष्टमिति॥ एवमुभयोरनुग्रहो भवति। समर्थता संगतार्थता च भवति। अत उभयसामर्थ्याद्द्विदे
तं चरुमर्द्धपिष्टं कुर्यादिति। नन्वेवमर्द्धपिष्टे चरौ पाकवैषम्य भविष्यति। न॥ विनक्तिन्नत्राये तंडुलेषु पिष्टानामाव
पः करिष्यते। तेन पाकवैषम्यं न भविष्यति॥ सौमापौष्णदर्शनाच्च॥ किं च सौमापौष्णे चरौ द्विदेवते नेमपिष्टता दर्श
नात् द्विदेवतोपि नेमपिष्टानां भवति। नेमशब्दोर्द्धशब्दस्यार्थे। त्वो नेम इत्यर्द्धस्येति यास्कोक्तेः॥ तथा च दर्शनं॥ सौम
पौष्णं चरुं निर्वपेन्नेमपिष्टानां पशुकाम इति। न चैवं वाच्यं वचनमेतन्न दर्शनमिति॥ वचने हि सति वाक्यभेदः
स्यात्॥ सौमापौष्णं चरुं निर्वपति तं च नेमपिष्टानामिति॥ तस्माद्द्विदेवतमर्द्धपिष्टं कुर्यादिति प्राप्ते आह॥ ॥अपि
ष्टो वा देवतान्यत्वात्॥ वाशब्दः पूर्वोक्तिपक्षद्वयनिरासार्थः। द्विदेवते चरुरपि एव भवति। न पिष्टानां। नाप्यर्द्ध
पिष्ट इति ॥कुतः। देवतान्यत्वात्॥ केवलात् पूष्णः सकाशात् सद्वितीयस्य पूष्णो देवतान्यत्वात्॥ केवलो ह्य
न्यः। सद्वितीयोऽन्य एव केवलस्यैव पूष्णः प्रपिष्टानां चरुर्भवतीत्युक्तं॥ न सद्वितीयस्य॥ तस्मादपिष्ट एव द्विदेवते
ऐंद्रापौष्णश्चरुर्भवतीति सिद्धांतः॥ कथं तर्हि दर्शनमित्यपेक्षायामाह॥ ॥सौमापौष्णे वचनात्॥ सौमापौ
ष्णे चरौ या नेमपिष्टता सा वचनात्॥ अतस दर्शनवलेनान्यत्र नेमपिष्टता साधयितु न शक्यते। पिष्टविधाना
वाक्यभेदोपि न भवति॥ एतानि सर्वत्र॥ एतानि पंच हवींषि सर्वत्र सवैषु पर्वसु भवति॥ सर्वशब्देन वरुणप्र

सा महाहविः शुनासीरी पंच गृह्यते ॥ एतेषु हि श्रुतौ पंच हवींषि श्रूयंते ॥ अथैतान्येव पंच हवींषि भवंतीति । अस्य एतेषु सर्वेषु श्रुतत्वात् । मरुद्भ्यः स्वतवद्भ्यः सप्तकपालः । षष्ठं हविः मरुद्भ्यः स्वतवद्भ्यः सप्तकपालः पुरोडाशो भवति ॥ तव इति वलनाम ॥ स्वंतवो येषां ते स्वतवसः ॥ स्वतवद्भ्य इति विशेषणं ॥ मरुद्भ्य इति विशेष्यं । अस्य च ग्रहणानुवाचनादौ मरुद्भ्यः स्ववलवोभ्य इति प्रयोगः कार्यः ॥ मारुतस्तु सप्तकपाल इति प्रकृत्य । तं वैश्वतवोभ्य इ कुर्यादिति श्रुतेः स्वतवद्भ्य इति तु छांदसं रूपं ॥ मारुतो वा ॥ अथवा मारुतः मरुतो देवता यस्य सो मारुतः ॥ सप्तकपालः पुरोडाशो भवति ॥ अथातः पयस्याया एवायतनं मारुतस्तु सप्तकपाल इति श्रवणात् ॥ स उ खलु मारुत एकस्मादिति च ॥ वैश्वदेवी पयस्या । सप्तमं हविः वैश्वदेवी पयस्या भवति विश्वेदेवा देवता अस्याः सा वैश्वदेवी । इयं चोपांशु वैश्वदेवी चातुर्मास्येषूपांशुर्भवतीति प्रागुक्तत्वात् ॥ अस्यां च दाक्षायणे पयस्यायां धर्मप्रवृत्तिः ॥ अतश्चात्राग्न्याधानानंतरं शाखाच्छेदानुमार्जनपरिवासनोपवेषकरणपवित्रबंधनवत्सापाकरणविश्वेभ्यो देवेभ्यो भागमिति गोः स्पर्शनिशाखोपगूहनानि कृत्वा ब्रह्मवरणादि । निरुप्याज्यं दोहं कृत्वा तप्ते पयसि दधिप्रक्षेपो दधनिवादाहः ॥ तत्रस्थाभिघारमदत्त्वा वा । जिननिषेकादि तस्योत्करे सादनं वाजिनयागोपि भक्षान्तो भवति ॥ अथातः पयस्ये चेति प्रकृत्य तस्माद्वैश्वदेवी भवत्तीति श्रुतेः ॥ द्यावापृथिवीय एककपालः । अष्टमं हविर्द्यावापृथिवीय एककपालः पुरोडाशो भवति । अथ द्यावापृथिव्य एककपालः पुरोडाशो भवतीति श्रवणात् ॥ अयमप्युपांशुर्भवति । एककपा

॥४॥
॥देव या०५

त्वात्॥ एककपालश्चावापा इति प्रागुक्तत्वात्। एवं चात्र त्रीणि हवींष्युपांशु भवाति॥ सावित्रः वैश्वदेवी द्यावापृथिवी
पश्चेति। अत एव श्रूयते॥ तेषां वै चतुर्णां द्वयोस्त्रीणि त्रीणि हवींषि व्यतिरिक्तानि भवंति द्वे द्वे द्वयोरिति। वैश्वदेवे अंत्ये
च त्रीणि त्रीणि। मध्यमयोर्द्वे द्वे इति॥ अत्राहापस्तंबः। अलंकरणकाल आज्येनैकं कपालमभिपूरयित्वा विपृष्ठं
चेति॥ एतच्चाचार्येणाग्रयणे उपनिबद्धं। उद्वास्यां तं श्छादयेदाज्येनेति॥ ॥ एतद्वैश्वदेवं॥ एतदाग्नेयाद्यष्टहवि
ष्कं कर्म वैश्वदेवसंज्ञकं भवति॥ संज्ञाकरणं संव्यवहारार्थं॥ प्रजाकामस्यापि वैश्वदेवमित्यादौ॥ प्राचीनप्रवणे॥
प्राचीनं निम्नं यस्मिन्नसौ प्राचीनप्रवणो देशः। तस्मिन्प्राचीनप्रवणे देवं पर्व भवति प्राचीनप्रवणे वैश्वदेवेन य
जेतेति शाखांतरात्॥ ॥अहतवासाः। अस्मिन्वैश्वदेवे पर्वणि यजमानो हतवासा भवति॥ अहते वाससी यस्या
नाहतवासः॥ एकं परिधानीयं द्वितीयमुत्तरीयं। परिधास्या इति परिधानमंत्रः॥ यशसामेत्युत्तरीयस्यापरिधा
नानंतरं द्विराचमनं च। उद्धरणात्प्रागेवैतत्परिधानं कर्त्तव्यं॥ पत्नी च। पत्न्यप्यत्राहतवासा भवेत्। अस्या अपि परि
धानीयमुत्तरीयं चेति द्वे वाससी भवतः॥ तद्ये वैश्वदेवेन यजमानयोर्वाससी परिहिते स्यातामिति वचनात्॥ ते एव
वरुणप्रघासेष्वपि॥ ये वाससी वैश्वदेवे पर्वणि पत्नीयजमानाभ्यां परिहिते ते एव वरुणप्रघासेष्वपि भवतः। व्य
क्तो नियमोयं। तद्ये वैश्वदेवेन यजमानेयोर्वाससी परिहिते स्यातां ते एवात्रापि स्यातामिति वचनात्॥ वैश्वदेवीको
नांनाशब्दोघोदावन्ययोरपि वरुणप्रघासे परिधानं कर्त्तव्यं दानं च॥ ॥ त्रेधा बर्हिः संनह्य पुनरेकधा॥ बर्हिः

पूर्वं त्रेधा त्रिविधं संनह्य एकैकेन संनहते न पृथक् पृथक् त्रीन्पूलकान्बध्वा पुनरेकधा एकविधं संनह्य त्रीणापि पूलकानेके
न चतुर्थेन महता संनहनेनैकत्र बध्नीयादित्यर्थः। अथातः अवृतेव नोपकिरंत्युत्तरवेदिमिति प्रकृतस्य त्रेधा बर्हिः सन्नद्धं
भवति तत्पुनरेकधेति तस्मात्त्रेधा सत्पुनरेकधेति च श्रुतत्वात्॥ ॥कुशाग्रस्त्वः प्रस्तर उपसन्नद्धः। कुशाग्रस्त्वः प्रस्
तोः पुष्पिताः कुशाः दर्भमंजर्यः प्रस्तरोत्र भवति॥ कीदृशः उपसंनद्धः। उपबर्हिषः समीपे संनद्धः बद्धो भवति॥ चतु
र्थसंनहनमध्ये सोपि बद्धो भवतीत्यर्थः॥ प्रस्व उपसंनद्धो भवेति तं प्रस्तरं गृह्णातीति तस्मात्प्रसूः प्रस्तरं गृह्णातीति च श्र
वणात्॥ आसाद्याग्निमंथनं। हवींष्यासाद्याग्निमंथनं कर्त्तव्यं॥ आसाद्य हवींष्यग्निं मंथतीति वचनात्॥ प्रकृ
तौ हि हविरासादनानंतरं हविरालंभात्मालंभोदकस्पर्शनानि विहितानि संति॥ अत्र च हविरासादनानंतरमग्नि
मंथनं। तन्न प्रकृतत्वं च विकृतत्वाविल्यनेन न्यायेन हविरासादनानंतरं प्रथमं हविरालंभात्मालंभोदकालंभां हित्वाग्नि
मंथनं कर्त्तव्यं॥ अथाग्निमंथनस्येतिकर्त्तव्यतामाह॥ ॥अग्नेर्जनित्रमिति शकलमादाय वेद्यां करोति। अग्ने
र्जनित्रमित्यनेन मंत्रेण पलिपवृक्षशकलमादाय तूं स्त्री वेद्यामुदगग्रं करोति निदधाति। सोग्निमंथनपूर्वं शकल
मादत्तेग्नेर्जनित्रमसीति श्रुतत्वात्॥ ॥वृषणाविति कुशतरुणौ तस्मिन्॥ वृषणोस्थ इति मंत्रेण तस्मिन् शकले कु
शतरुणौ दर्भतरुणौ प्रागग्रे निदधाति॥ अथ दर्भतरुणके निदधाति वृषणोस्थ इति श्रुतत्वात्॥ ॥मानवे। उत्तरस्यै
पश्चात्परिधिधिसंधेरग्नेर्जनित्रमसीत्यग्निमंथनं शकलमवस्थापयति॥ वृषणोस्थ इति तत्रैप्राचावच्छिन्नप्रातौ

॥५॥
॥देवया०५

दर्भावुर्वश्यसीति॥ तयोरुदकूत्तूलामरणिं पश्चात्प्रजननां मूलतः उत्तरारणिमायुरसीति आज्यस्थाल्यां बिले स्नेह पनु-
त्रिः समनक्तीत्यादि॥ आपोस्तंबोपि॥ प्राचोदर्भाविति॥ ॥उर्वश्यसीत्यधरारणिं तयोः॥ तयोः स्तृतयोः कुशतृणयो-
रुपयुत्तराग्रामधरारणिं निदधाति उर्वश्यसीति मंत्रेण। अथाधःरणि निदधात्युर्वश्यसीतिश्रुतत्वात्॥ आपुरसी-
स्युत्तरयाज्यस्थाल्यालीपं सपूं स्पृश्य पुरूरवा इत्यभिनिधानं तस्या॥ आपुरसीत्यनेन मंत्रेणोत्तरयारण्याग्रमंथमूले-
नाज्यस्थालीसंस्पृश्योज्यस्थालीस्थमाज्यंस्पृष्ट्वा पुरूरवा असीत्यनेन मंत्रेण तयाउत्तरारण्या अभिनिधानं॥
अधरारणेरुपरि निधानं करोति॥ अथोत्तरारण्याज्यविलापनी रूपस्पृशत्वा युरसीति तामभिनिदधाति पुरूरवा
असीतिश्रुतत्वात्॥ ॥१॥ अग्नयेमथ्यमानायानुवाचयति॥ मथ्यमानायाग्नेरनुवाचनं होत्राकारयति। तच्चाग्नेम-
थ्यमानायनुब्रूहीत्येवं। अथाहाग्नयेमथ्यमानायानुब्रूहीतिश्रुतत्वात्। अत्राहापस्तंबः। अग्नयेमथ्यमाना-
नुब्रूहीति संप्रेष्यति मथ्यमानायानुब्रूहीति चेति॥ ॥मंथतिगायत्रेणेतिप्रतिमंत्रं त्रिः प्रदक्षिणं। ततोध्वर्युर्गायत्रे-
णेति प्रतिमंत्रं प्रदक्षिणं त्रिर्मंथति॥ अतेऊर्द्ध्वं प्रदक्षिणं च्चा दक्षिणं चासमंथति गायत्रेणत्वाछंदसाइत्यादि श्रु-
तत्वात्॥ जातेजातायेति॥ जातेग्नौ जातायानुब्रूहीत्यनुवाचयति॥ जातायानुब्रूहीत्याह यदाजायतैरितिश्रुतत-
त्वात्॥ प्रह्रियमाणायेति प्रास्यनू॥ अग्नावग्निं प्रास्यन् आहवनीयेग्नौ जातस्याग्नेः पक्षेपं करिष्यन् प्रह्रीयमा-
णायानुब्रूहीत्यनुवाचनं होत्राकारयति॥ प्रह्रीयमाणायेत्यनुप्रहरन्निति श्रुतत्वात्॥ मंथंतं नइतिप्रास्यति॥ ॥५

भवतन्त्व इति मंत्रेणाग्नावग्निं गृहपति आहवनीयमध्ये जातमग्निं प्रक्षिपती सर्व्यः॥ सोनुग्रहरति भवतन्त्र
श्रुतत्वात्॥ अत्र गृहपतिशब्दो नेकयजमानके विपरिणम्यते॥ मा यज्ञपती जातवेदसाविति द्वियज
मानके॥ मा यज्ञपती जातवेदसाविति बहुषु॥ ॥अग्नावग्निरिति जुहोति स्थाल्याः स्रुवेण। अग्ना
वग्निरित्यनेन मंत्रेण स्थाल्याः सकाशात् स्रुवेणाज्यं जुहोति। प्राक्षिप्तस्याग्नेरुपरि। इदमग्निभ्यामिति त्या
गः॥ अस्रुवेणोपहत्याज्यमग्निमभिजुहोत्यग्नावग्निरिति श्रवणात्॥ एवमंतमग्निमथनं। ततो होतु
रामंत्रणादि॥ नवप्रयाजं नवानुयाजं। वैश्वदेवं भवतीति शेषः। नवप्रयाजा यस्य तन्त्रे नवप्रयाजं। नवानुया
जा यस्य तन्त्रे वानुयाजं। वैश्वदेवे पर्वणि नवप्रयाजा भवंति॥ अनुयाजा अपि नव भवंति॥ नवप्रयाजं भ
ति नवानुयाजमिति श्रवणात्॥ अत्र च पंचमप्रयाजस्याभ्यासेन नवसंख्या पूरणीया उत्पन्नशिष्टत्वात्।
ततश्च पंचमषष्ठसप्तमाष्टमनवमानां पंचममेसनेनैवानुमंत्रणं। पंचमस्यस्थाने होम इति॥ पंचमसे
दंद्वीभ्या इति त्यागः। इदमुषासानक्ताभ्यामिति षष्ठस्य। इदं दैव्याभ्यां होतृभ्यामिति सप्तमस्य। इदं तिसृभ्यो दे
वीभ्य इत्यष्टमस्य। नवमस्य तु अग्न्यादिसर्वदेवताभ्यो याज्यामध्ये पठिताभ्य इति॥ ॥वरुणप्रघासा म
हाहविश्च। वरुणप्रघासा नवप्रयाजा नवानुयाजाश्च भवंति॥ महाहविश्च नवप्रयाजं भवति नवानुयाजं
उभयत्र नवधा श्रुतत्वात्॥ वरुणप्रघासेतावत्॥ आश्राव्याध्वर्युरेवोह समिधोपजेति चतुर्थे चतुर्थे प्रयाजे समा

॥ द्वि॥
॥देवया०५

नस्यमानौनवभिः प्रयाजैश्चरतइति। तथा देवान्यजेति यज यजेति चतुर्थे चतुर्थेनुयाजे समानयमानौनवाभि
रनुयाजैश्चरतस्तद्यन्नैव प्रयाजं भवतिन वानुयाजमिति श्रुतत्वात्॥ महाहविष्यपि। महाहविषा हवैदेवारति
प्रहृत्यतस्या वदित्यस्यां कुंडिकायां न वै प्रयाजं भवति। न वानुयाजमिति श्रुतत्वात्॥ ननु वैश्वदेवधर्मित्वे नैवन
प्रयाजादिसिद्धे वरुणप्रघासा महाहविश्वेत्यादिसूत्रं न कार्यं॥ सत्यं॥ नित्यैर्भोः पंचभ्योधिकानां हविषां नव
प्रयाजत्वादिसिद्धं बाधविधानार्थं पुनरुक्तमित्यदोषः। तथाच मारुत्या अपि नव प्रयाजता भवति। ऐंद्राग्नवारुण
मारुतकायमाहेंद्रवैश्वकर्मणानां विस्मरणे चसमाहेरूईयदातेषां पृथगनुष्ठानं सांगं। क्रियेत तदा तेषां नव प्र
याजता नवानुयाजता भवति॥ इतरथा च न स्यात्॥ वैश्वदेवधर्माणां पंचभिर्हविर्भिरेवसंबंधात्॥ त्रीणिस
त
मिष्टयजूंषि जुहोति देवा गातुविदो यज्ञपतमेषैरिति। त्रीणिसमिष्टयजूंषि जुहोति देवा गातुविद इति प्रथमं।
यज्ञयज्ञमिति द्वितीयं। एषतइति तृतीयमिति। त्रीणिसमिष्टयजूंषि भवंतिज्योपरइ वहीदर्पूंहं० विपर्यासोदितिश्रु
त्वात्॥ त्रयाणां क्रमेण इदं वीताय। इदं यज्ञाय॥ इदं यज्ञपतये इति त्यागः॥ अत्राभ्यासेन संख्यापूरणं। उत्पन्नको
गात्संख्यायाः। अनेकयजमानकेचोहः॥ यज्ञपतीगच्छेति द्वयोः यज्ञपती गच्छति बहुषु। एषतेयज्ञो यज्ञपती
ति यज्ञपतये इति च॥ पशौ च॥ पशावप्येतान्यच त्रीणि समिष्टयजूंषि प्रतिषेधात्तदितरपशुष्वेत त्समिष्टयजू
षां त्रित्वं विधीयते। पशौ विकल्पेन मंत्रांतरमाह यां २ आवह २ इति वा पशौ। २ यां २ आवह इत्यादिभिर्वा त्रिभिर्मं

पशौ त्रीणि समिष्टयजूंषि जुहोति। याँ आवह उ॰ वयं हित्वा॥ देवा गातुविद इति। अत्र पूर्वयोरिदमग्नय इति
तृतीयस्येदं वातायेति॥ एकं वा वैश्वदेवो वैश्वदेवे पर्वण्येकं वा समिष्टयजुर्जुहोति॥ अथो अप्येकमेव स्याद्धवि
र्यज्ञोहीति॥ ॥ तच्च देवा गातुविद इत्यनेन मंत्रेण। वरुणप्रघासमहाहविषोस्त्रीण्येव॥ वैश्वदेव इति विशे
षोपदेशात्॥ शुनासीरीयेप्येकमेव। एकं समिष्टयजुरिति तत्र श्रवणात्॥ अत्र तस्य प्रथमजो गौर्दक्षिणेति
श्रूयते॥ यजमानस्य गोष्ठे प्रथमं जातः॥ तदुक्तं प्राक् प्रथमजो गौर्दक्षिणा वैश्वदेवस्य चेति। पूर्वसंस्थासु व
पनं वा प्रागंत्यात्॥ पर्वसंस्थासु प्रागंत्यात् सर्वेषां त्रयाणां संस्थासु समाप्तिषु कर्मापवर्गांते यजमानस्य
वपनं नाम भवति। अथातः प र्तनस्यैवेति प्रकृत्य सयद्वैश्वदेवेन यजते अग्निमेव तदित्यस्यां कंडिकायां
तत्रैषा शलली भवति लोहक्षुरः स्तेन परिवर्त्तयत इति। अथ यद्वरुणप्रघासैर्यजते। अथ यत्साकमेधै
रित्यनयोरपि कंडिकयोर्लोहक्षुरस्तेन परिवर्त्तत इति श्रुतत्वात्। एवं च वपनं पर्वसु श्रुतत्वात्॥ प्रागंत्यादित्युक्तं
परिवर्त्तनं च केशश्मश्रूणां। वपनं मुंडनमुच्यते। शाखांतरसूत्रेषु पौर्णमासेष्ट्यनंतरं वपनं। विहितं तथा च
काठके॥ पौर्णमासेष्ट्या परिवापयते लोहायसेन क्षुरेणेति। मानवे च। सद्यः पौर्णमासं संस्थाप्य त्रिःश्वेतया
शलल्या लोहायसेन क्षुरेणेति वर्त्तयति केशान्वपति श्मश्रूणि [illegible]ति। आपस्तंबोपि श्वोभूते पौर्णमास्य [illegible] सूत्रे
नस्मइत्सुपोष्य त्र्येण्या शलल्या कांडेन क्षुरेणालाकया वा लोहेन च क्षुरेणोदुंबरेण केशान्निवर्त्तयते वपयते रमे

॥७॥
॥देवया॰
५

ऋ.पणीति॥ अथ वपनस्येतिकर्त्तव्यतामाह॥ ॥अपरेणदक्षिणाग्निंदक्षिणंगोदानमुंदत्ति सवित्रा प्रसूता दैव्य आ
प उंदंतु ते तनूं दीर्घायुत्वाय वर्चस इति॥ ततो दक्षिणाग्निमपरेण दक्षिणाग्नेरपरस्यां दिशि प्राङ्मुखोपविष्ट
स्य॰ यजमानस्य दक्षिणं गोदानं शायनकाले गवि पृथिव्यां दीयते निधीयते स्याप्यत इति गोदानं दक्षिणाकर्ण
समीपवर्त्तिशिरःप्रदेशमित्यर्थः॥ तमुंदत्ति। उंदी क्लेदने॥ अद्भिः क्लेदयति॥ आर्द्रीकरोति सवित्रेत्यादिना मंत्रे
णोदङ्मुख उपविष्टोध्वर्युः॥ ॥त्र्येण्याशलल्या विनीँपि कुशतरुणानि दर्भतृणान्यंतर्दधाति। ॐषधे त्रा
यस्वेति मंत्रेण। त्र्येणीशलल्ली भवतीति श्रुतेः॥ त्रिषुस्थानेषु एनी श्वेता कुर्चरा त्र्येणी शलल्ली सेधाशला
काश्वाविद्रोम। त्रिःश्वेतयेति सूत्रांतरात्। वर्णादनुदात्तात्तोपधात्तोनइति ङीप्। तकारस्य च नकारः॥ एतशब्दः
कर्बुरवर्णवाची। अनुदात्तांतस्तोपधः॥ ॥त्र्यायुषमिति यजमानो जपति॥ ततो यजमानस्त्र्यायुषं जमदग्ने
रित्यमुं मंत्रं स्वरेण जपति॥ शिवो नामेति लोहक्षुरमादाय निवर्त्तयामीति वपति॥ ततोध्वर्युः शिवो नामेति मं
त्रेण लोहक्षुरं लोहेन ताम्रेण परिस्कृतमयोमयमेव क्षुरमादाय हस्तेन गृहीत्वा। निवर्त्तयामीति मंत्रेण केशान्वप
ति॥ कुशतरुणांतर्हितान्केशान्छिनत्तीत्यर्थः॥ तण नाम पिच्छेदनं कर्त्तव्यं। सकेशानि प्रच्छिद्येति केचिद्दर्शना
त्॥ लौह मंत्रता त्रमुच्यते। लोहित इव ह्यग्निरिति वचनात्॥ तद्वान्लोहः लोहपरिस्कृतः मरुदेशो तादृशस्यैव प्र
सिद्धत्वाद्वपनसामर्थ्याच्च लोह इति मनुपेन निर्द्दिशः इति हरिस्वामिनः॥ ॥एवं पश्चादुत्तरेतश्च। यथादर्शि

यत्रौ

न्यंतर्दधात्योषधइति॥ त्र्येण्याशलल्याक्लिन्नान्के
शान्विनीः पदम्यकृत्य विवरान्कृत्वा त्रीणि कुशतरुणा। ५

णगोदानस्योंदनादिवपनादिवपनांतमुक्तं। एवमेव पश्चादुत्तरतश्च कर्त्तव्यं। पश्चाद्गोदाने। शिरसः पश्चात्प्रदेशे
उत्तरगोदाने उत्तरस्मिन् शिरःप्रदेशे इत्यर्थः। अपक्षु गोदानयोरभावः कृतत्वात्॥ अन्यत्सर्वं समंत्रकं भवति। उं-
दनं। केशानां। विनयनं। दर्भतृणांतर्द्धानं॥ छेदनमिति॥ गृहेषु पौर्णमासं समारूढे निर्मथितयोस्तथा चेदिति।
ततः पर्वकर्मप्रदेशादागत्य गृहेषु समारूढे निर्मथितयोरग्न्योः पौर्णमासं कर्त्तव्यं। तथा चेदिति। चेद्यदि तथा
कृतं भवति॥ समारूढे निर्मथितयोः पूर्वं कृतं भवति। तदा पर्वसमाप्त्यनंतरं समारूढे निर्मथितयोः पौर्णमासं कर्त-
व्यं नान्यथेत्यर्थः। तत्र चतुर्णां पर्वणां मध्ये वरुणप्रघासाः साकमेधाश्चोदवसाय समारूढे निर्मथितयोः क्रि-
यंते। तत्रैवोदवसाये वक्ष्यते न यजत इति श्रुतेः॥ गृ[illegible]नीत्वा निर्मथ्याग्नी पौर्णमासेन यजत इति वरुणप्रघा-
सांते साकमेधांते च श्रुतेः॥ न वैश्वदेवशुनासीरीययोरंते॥ अतो वरुणप्रघाससाकमेधसमाप्त्यनंतरमेवाग्नी
समारोह्य गृहमागत्य मथित्वा तत्कालमेव सद्यः पौर्णमासं कर्त्तव्यं। वैश्वदेवांते प्राचीनप्रवणाद्गार्हपत्यमेव
स्वस्थाने नीत्वा पौर्णमासेष्टिः कर्त्तव्येति॥ साकमेधानंतरं समारोह्य निर्मथ्य तत्रैव शुनासीरीयं कृत्वा गार्हप-
त्यं स्वस्थानमानीय पौर्णमासं कर्त्तव्यं॥ फाल्गुन्युदृष्टे शुनासीरीययागेप्येवमेव॥ पक्षांतरेषु शुनासीरीयांते पौ-
र्णमासस्य प्रसंग एव नास्ति॥ ॥प्रजाकामस्यापि वैश्वदेवं॥ प्रजां कामयते वांछतीति प्रजाकामः। प्रजाका-
मस्यापि यजमानस्य वैश्वदेवं पर्व केवलं भवति॥ स यः प्रजाकाम एतेन हविषा यजत इति श्रुतत्वात्। [illegible]तेनेति

वैश्वदेवे नेत्यर्थः ॥ एके धःशाउ॰ शायी मध्वाश्यृतुजायोपायी मांसस्त्र्यनृतानि वर्ज्जयेदुदकाभ्यवायं च स्नानव
न्धात् ॥ एके शाखिन एवमाहुः ॥ चातुर्मास्ययाजी वैश्वदेवानंतरं यजमानो धःशाउ॰शायी स्यात् ॥ अधइति
खर स्थितान्नेयेष्या नीचः ॥ न त्वेनास्तृतायां भूमौ ॥ शाडिः ॥ निशाकू शिरः शेते ॥ तथा मध्वाशी भवेत् ॥ मधुना
मिश्रं अन्नमश्नीयात् ॥ तथा ऋतौ जायोपायी स्यात् ॥ ऋतुकाल एव जायां स्वभार्यामभिउपगच्छेत् ॥ नान्यथा ॥ अथवा
ऋतुकाले जायामुपेयादेव । न कदाचित्प्रमादान्नोपेयादिति ॥ तथा मांसं स्त्रियं अनृतं च एतानि वर्जयेत् ति । मां
सभोजने । स्त्रियं सुरतसंभोगे ऋतुकालादन्यत्र ऋतुकाले तु विहितत्वात् ॥ अनृतमसत्यं । चातुर्मास्यसमाप्तिपर्यं
ते नियमो भवेति ॥ उदकाभ्यवायः उदकमध्ये प्रवेशः तं च वर्जयेदवभृथात्प्राक् ॥ वरुणप्रघासांते त्ववभृथो
भवति ॥ ततः प्राग्यजमानेनोदकमध्ये प्रवेशो न कर्त्तव्य इति । एके गृहणादेतेषां सर्वेषामधःशयनादीनां
विकल्पः केचिदेक इति पदं पूर्वसूत्रेण सह योजयंति । प्रजाकामस्यापि वैश्वदेव मेक इति ॥ नानेन ॥ तेषां मते अधःशा
य नादीनां नियोगतोनुष्ठानं भवति ॥ एतेन वै प्रजापतिरित्यस्यां कंडिकायां हरिस्वामिभिरेवं व्याख्यातं ॥ स प्र
प्रजाकाम इत्युपक्रम्य देवतोऽह वै प्रजापतिं [illegible] प्रजापत इति निर्वचनात्प्रजाकामस्य पृथगेव वैश्वदेवं भवति
ये केमन्यत इति सूत्रकार आह । उत्तरेश्वपर्वभिः सहैकवाक्यतादर्शनादुत्तरेष्विव समुदायानंगत्स्येका पृथग्भूत
स्येत्तत्फलमिति स्वयं मन्यते ॥ इदमेवात्र युक्तं ॥ अन्यथा तु वरुणप्रघासा अपि प्रजानामारोग्याय पृथक्फला

स्युः॥ साकमेधाश्च द्विषतां पराजयाय। तस्मादयमनुवादमात्रमेतदिति॥ अस्यापि मतेधः शयनादीनां नियमतो।
नुष्ठानं न विकल्प इति॥ एके ग्रहणस्य पूर्वसूत्रेण संबधात्॥ तथा चापस्तंबः॥ तस्य पर्वस्वंतरालव्रतानि न मांस
मश्नाति। न स्त्रियमुपैत्यृतौ वा जायां नोपर्यास्ते जुगुप्सतेऽनृतात् आऊ॰ शाते मध्वशानः स्यादित्येकं व्यजनार्थ
मित्यपरमनुयाज्यन्यश्चातुर्मास्ययाज्यन्यो वसंतोभूत्स्रा वडू॰ भूतच्छरदभूदिति यजते स ऋतुयाज्यथ यश्चातुर्
मासेषु माषेषु स चातुर्मास्ययाजी वसंते वैश्वदेवेन यजेत आयद्वेत आवृषि वरुणप्रघसैः॥ शरदि साकमेधैरि
ति विज्ञायते॥ ॥काठके च॥ ॥ ब्रह्मचारीव्रतो भवत्या समापनादधःशायी मांसं स्त्रियं च वर्जयेत्काममृतौ जा
यामनुपेयादिति। लामकायनिनां ब्रीह्मणमिति। मानवे च। चतुरो मासान्न मांसमश्नाति न स्त्रियमुपैति नोपर्यास्ते जु
गुप्सतानृतात् आउ॰ शेते मध्वश्नात्यृतौ भार्यामुपैतीति॥ उक्तं वैश्वदेवसंज्ञं पर्व। अधुना वरुणप्रघासानाह॥ ॥
आषाढ्यामयं ते योनिरिति समारोह्योदवसाय निर्मथ्य वरुणप्रघासैः॥ आषाढीशब्देनात्र गौणी प्रतिपदुच्यते। अनं
5 तुतुरेव ऋतुंखे चातुर्मास्यैर्यजेतेति शास्त्रांतरश्रुतत्वात्॥ प्रतिपदेव ऋतुमुखं॥ न पंचदशीति॥ तत्राषाढ्यामाषाढ
शुक्लप्रतिपदि वरुणप्रघासा भवंति। किं कृत्वा अयं ते योनिरिति मंत्रेण गार्हपत्याहवनीयाग्नी अरण्योः समारोप्य
प्रतपनेनारण्योरारूढौ कृत्वा। अथ दिव पूर्वतरमाहवनीयमुद्धृत्य प्रतिकर्मोद्धरणमप्रसंग इत्युक्तत्वात्॥ पुनराधा
नादिनिमित्तेन निसधृतेश्च तस्यैव समारोपः। ऋत्वर्थेन समारोपेण पुरुषार्थस्य नित्यधारित्वस्य बाधात्॥ स

॥ १ ॥
॥ देवया॰ ५

मारोपविस्मरणे चाध्वर्युर्वंऽङ्क्त्वा प्रागोपदेशिकां गत्र धानाऽऽज्यैः करणं। न तत्तत उ॰ र्द्धं॥ तत्र हविः श्रपणादिकं
प तं तत तत्, तमेवा गुणत्वोपादनादिष्टं तन्निमित्तं भवति॥ विहृते स्रुचे विहृतानग्नौ समारोह्य निर्मथ्य पुनरे
द्धरणाग्निप्रणयनाग्न्यन्वाधानादिकार्यं॥ परिस्तरणमाहवनीयकल्पने। परिधि परिधानं स्पृश्यास्पृश्यो
रधानं सप्यस्त्वेति जपः सामिधेनी पः सामिधेन्यनुवाचनं इध्माधानं उपवाजनं संमार्गश्चेत्येते स
स्कारः पुनः कार्याः॥ तत उद्वपायस्वस्थानादेशांतरे प्राचीनप्रवणे गत्वा ततस्तत्र प्राचीनप्रवणे गार्हप

श्री

यं निर्मथ्य स्थापयित्वा ततो हवनीयदक्षिणाग्नी च विहृत्य चरूपप्रसाः कर्त्तव्या इत्यन्वयः। आपाद्यामथ्यं ते
योनिरिति समारोह्येत्यत्र समारोपस्य मंत्र उक्तः। किं समारोह्येत्यपेक्षायामग्नी कुतः। समारोह्याग्नीरग
न्यास्तंभमित्यत्र दर्शनात्। ततः क्व समारोह्येत्यपेक्षायामरण्योरिति तत् कुतः॥ ग्रामे वा विवत्स्यन्नरण्यो
रित्यत्रारण्येः समारोहणदर्शनात्॥ एवं च सूत्रद्वयेनाऽरणिवत् समारोपः सिध्यति। क्वचिन्मंत्रः॥ क्वचि
ग्नी। क्वचिदरणी इति। तत्रापि प्रथमं गार्हपत्यस्य समह्वमंत्रेणाहितत्वात्॥ तत एवमेवाहवनीयस्या कुतः। शा
खापनसूत्रेऽस्य विशेषस्य दर्शनात्॥ तथा हि॥ अयं ते योनिरिति चारणीभति तपत्ति सत्वन्मंत्रेणाहि हिंस्त
स्नीमेव माहवनीयादिति॥ उदवसाये तु स्तु वेविसतिः प्रदेशांतरंगमने वर्त्तते॥ तेनोदवसायस्वस्थानात्प्र
देशांतरे गत्वेत्यर्थः॥ ॥ पूर्वेद्युर्दक्षिणाग्नौ निस्तुषामयंचैप वानां करंभपात्रेकरणं॥ पूर्वेद्युरिति यजनीय

॥ ६ ॥
मा॰

कालात्तितिपदः पूर्वस्मिन्दिने पंचदश्यां दक्षिणाग्नौ निस्तुषाणामभृष्टयवानां करंभपात्रकरणं भवति॥ नि
र्मुक्तास्तुषा येभ्यो निस्तुषाः॥ आमा अपक्वाः॥ भृष्टाः पक्वाः॥ आमाश्चेते भ्रष्टाश्चामभृष्टाः ईषद्भृष्टा इत्यर्थः॥
तस्य परिपूर्णपक्वत्वादामा इत्युच्यते किंचित्पक्वत्वाच्च भृष्टा इति॥ नुस्तुषाश्च ते आमभृष्टाश्च निस्तुषामभृष्टाः॥
ते च ते यवाश्च निस्तुषामभृष्टयवाः॥ अर्द्धतफलीकरणा ईषद्भृष्टाश्च यवा इत्यर्थः॥ तेषां यवानां करंभपात्रकर
णमिति॥ करं भो दध्ना संयुताः सक्तवः॥ तन्मयानि पात्राणि करंभपात्राणि तेषां करणं निष्पादनं कर्त्तव्यं॥ नि
स्तुषा इत्यनेन फलीकरणाभ्युदासः॥ निस्तुषकरणमात्रस्यैव विधानात्॥ दक्षिणाग्नावित्यनेन गार्हपत्याहव
त्र नीययोर्वैकल्पिकमन्यतरं प्राप्तं अपपामपोह्यते॥ अतश्च दक्षिणाग्नेरेवात्र श्रपणत्वात्पात्रासादनमत्र तस्योत्त
रत उदक्संस्थं कर्त्तव्यं॥ ग्रहणं तु गार्हपत्यस्य पश्चादेव॥ जघनेन गार्हपत्यमिति तत्र श्रुतेः॥ गृहीतानामासाद
नं तु दक्षिणाग्नेः पश्चादेव॥ तस्य श्रपणस्य पश्चाद्विहितत्वात्॥ मर्जनोपधानं त्वध्वर्योरिव दक्षिणाग्नौ विरो
धाभावात्॥ पर्यग्निकरणं तु गार्हपत्यादेव॥ गार्हपत्ये संस्कारा इति वचनात्॥ अथ पूर्वेद्युरन्वाहार्यपचने तु
षानिव यवान्कृत्वा तानीषदिवोपसम्प्य तेषां करंभपात्राणि कुर्वंति॥ तथा पात्राणि भवंति पात्रेषु श्रपणमश्रुं
तैयवमयानि भवंतीति श्रुतत्वात्॥ पात्रेषु शेनमश्नुयत इत्यर्थवादः यथाऽग्नार्याणि पात्राणि भाज
नानि भवंतीति तादृशान्येतान्यपि कर्त्तव्यानि॥ आसादनी दौंचे पात्रीभूत्तानानि निधेयानि भाजनवदेव

किं यंति पुनस्तानि करंभपात्राणि भवंतीत्याकांक्षायामाह॥ यावंतो यजमानगृह्या एकाधिकानि गृह्येभ
वाः गृह्याः॥ यजमानस्य गृह्याः यजमानगृह्याः। यावंतो यावत्संख्या यजमानस्य गृह्या भवंति तावत्संख्या
नि करंभपात्राणि एकाधिकानि एकेन अधिकानि कर्त्तव्यानि॥ यावंतो गृह्याः स्युस्तावेव सेकेनातिरिक्ता
ति श्रुतत्वात्॥ गृह्यशब्दस्य प्रजापशुभृत्यभार्यादिष्वविशिष्टत्वात्तत्संख्यया करंभपात्रकरणप्राप्तावि
श्रौ दमाह॥ प्रजा यावंति श्रुतेः॥ यावंतो गृह्याः स्युरित्ययं गृह्यशब्दः प्रजायां वर्त्तमानो ग्राह्यः न भृत्यभार्यादौ॥
कुतः तानि वै प्रतिपुरुषं यावंतो गृह्याः स्युस्तावंत्येकेनातिरिक्तानि भवंतीति तत्प्रतिपुरुषमेवैतदेकैकेन याअ
स्य प्रजाजातानास्तावरुणपाशात्प्रमुंचतीति श्रवणात्॥ अस्यार्थः॥ किं यंति पुनस्तानीत्यपेक्षिते या
वंतो गृह्याः गृहेषु भवा गृह्याः॥ तत्प्रतिपुरुषमिति वचनान्न पशवः। किंतर्हि मनुष्याः तत्रापि याअ
स्य प्रजा जाता इति वाक्यशेषादपत्यानि यावंति पुत्रपौत्रपुत्रीपौत्र्यादिरूपाणि। न च भृत्याः। नात्मान
च बंधवः। न च पुत्र्यः सुवासिन्यः जातत्वेप्यगृह्यत्वात् इति हरिस्वामिनः॥ नन्वेवं सत्यनपत्यस्याकरणे
प्राप्ते एकापत्यस्य द्व्यपत्यस्य च प्रजासंख्यया करणे प्राप्ते आह॥ ॥त्रीणि वा नित्यत्वात्॥ वाशब्दोवधा
स्य रणे अनपत्ये एकापत्यस्य च द्व्यपत्यस्य च त्रीण्येवैकाधिकानि कर्त्तव्यानि॥ कुत एतत्। नित्यत्वात्॥ क
रंभपात्राणि कुर्वंतीति बहुवचनस्य नित्यमेव श्रवणात्॥ नित्यं च बहुवचनं त्रिषु॥ अतो बहुवचनश्रव

पात्रीण्येकाधिकाधिकानि अनयसादीनामपि भवंसेव॥ ॥मेषमिथुनं च। मेषश्च मेषी च मेषौ। मेष
योर्मिथुनं मेषमिथुनं॥ तदपि पूर्वेद्युरेव तत एव निस्तुषाम भ्रूष्ट यवकरंभस्यैव मेषमिथुनं करोति॥
मेषं मेषाकारं प्रतिरूपकं॥ मेषीं मेष्याकारां प्रतिकृतिं च॥ तत्रापि मेषं च मेषीं च कुर्वीतीति श्रुतत्वात्॥
तत्र तस्मिन्नेव काले मकृत्वा तेषामेव मनना मानां मेव। तथा च श्रूयते यवमयो मेष इति॥ अचकठमू
त्रे॥ ॥आमयवपिष्टानां करंभपात्राणि यावतो यजमानस्य पुत्रापौत्रा यजमानः पत्नी च प्रतिपिंडे ए
कमधिकं शृंगिणा मेषं अशृंगी मेषी शुक्लोर्णाभिर्बावे ति॥ मानवे विशेषः॥ उत्तरतो गार्हपत्यस्य प्र
तिप्रस्थाता आमयवपिष्टानां दध्ना करंभपात्राणि करोत्येकोद्वीन्यंगुष्ठपर्वमात्राणि मेकं कृत्वा मेषी च
करोति यावति पुलिंगानि श्रा रस्त्रीलिंगानि मेष्याः प्रतिप्रस्थाता प्रक्ष्याल्योपाः इलेषयतः इति॥ आ
पस्तंबोपि॥ एतस्मिन्काले प्रतिप्रस्थाता तूष्णीं करंभपात्राथन्यिवा निर्वपति यजुषाध्वर्युमेषान्मेषार्धा
न्प्रतिप्र स्थाता तयोरामिक्षावदेव तमाम पिष्ट यवानां पत्नीकरंभपात्राणि करोति यावंतो यजमान
स्यामात्याः सस्त्रीकास्तावंत्येकातिरिक्तान्यापेषपानां मेषप्रतिकृती भवतो मेषमध्वर्युः करोति मे
षीं प्रतिप्रस्थाता स्त्रियाः स्त्रीव्यंजनानि पुंसः पुंव्यंजनान्यापि वा पूर्वेद्युरन्वाहार्यपचने वितुषानि
वयतान्कृत्वा तेषामीषदुपतप्तानां पत्नीकरंभपात्राणि करोत्यत्रापि मेषं च मेषीं च करोतीति अत्रापि

॥११॥
॥देवया०५

वाजसनेयकमैंद्राग्नयपंतानधिश्रिस्यैकादशसुकपालेषुमेषीमधिश्रयति अष्टासुमेषंकुंभीयांक्ष्ये
वामवतइत्ति॥ एतेषांकठादीनांवारुणप्रघासिकहविर्ग्रहणकालए वैंद्राग्नानिर्वपानांतरंकरंभ
पात्रादीनांनिर्वपणंविहितमस्ति। मध्यंदिनानांत्वथपूर्वैस्तुरितिवचनात्पूर्वैर्युरेवातत्रकरंभपात्रमे
षीकरणंप्रतिप्रस्थातुर्मेषकरणमध्वर्योः। पूर्वंतूष्णींकरंभपात्रार्थानांयवानांएकाधिकापत्यस
ख्यानांचतुर्मुष्टिकानांग्रहणं॥ करंभपात्राणिजुहोतीतिजुहोतित्वांत्तूष्णीं। ततोवरुणायजुष्टमितिमंत्रे
प्याध्वर्योर्मेषार्थानां। ततोमरुद्भ्योजुष्टमितिप्रतिप्रस्थातुर्मेष्यर्थानां। एषकेऽपृथगुपयुक्तानिपात्राण्य
स्नाच्योणिश्लेषपालमेषमेष्योः समंत्रकंसर्वंयथास्वमध्वर्युप्रतिप्रस्थातृभ्यांकर्त्तव्यंतत्रप्रतिप्रस्था
ताकरंभपात्रमेषीसाधारणाःपदार्थाःसमंत्रकाःकर्त्तव्याःश्रूपग्निहोत्रहवण्यादानादेध्मासादनांताः
कंडनश्रपणपेषणसंवर्पनांताश्चाकरंभपात्राणांयदसाधारणंग्रहणंप्रोक्षणंअभिमर्शनाधिश्रपणा
ध्यालंभनांतंचतूष्णीमेवाकुक्कुटाहननंचात्रनभवत्येव॥ अदृष्टार्थत्वपक्षेप्राप्रणीताप्रपक्षांनेयदासवार्थ
त्वसपतनार्थत्वपक्षःस्तदाप्रणीताप्रणयनंनभवत्येवातत्रसर्वार्थत्वपक्षेअपाद श्वसमंत्रकंप्रणयनं।
ब्रह्म न्नपूरधिनीप्रणेष्यामीतिचोहः। संयवनार्थत्वपक्षेचकेवलस्पदध्मेः। तत्रब्रह्मन्दधिप्रणेष्या ॥५
[illegible]

मीत्येतावदेव। तत्र पूर्वेद्युरग्नीसमारोह्योदवसाय निर्मथ्य वरुणप्रघासार्थमाहवनीयदक्षिणाग्नी विहृ
समंत्रकमग्न्यन्वाधानं ब्रह्मवरणं च त्वा यजमानवाचंयमच्छेति चोक्त्वाध्वर्युप्रतिप्रस्थातृभ्यां यथास्वं पात्रा
सादनाद्याद्न्योदकनि[illegible]नयनांतं वा कार्यं कर्त्तव्यं॥ आस्योदकनिनयनं तु प्रातस्तनया त्र्यंगुलिप्रक्षाल
नेन सह कर्त्तव्यं। नाद्यः॥ ॥अनैकीरूर्णाः प्रक्षाल्याश्लेषयेत्तयोः। एडकौ नाम दाक्षिणापथे मेषाकृतिः
पशुः एडकस्येमा एडक्यः। न एडक्यः अनेडक्यः॥ ता अनैडकीरूर्णाः मेषरोमाणि प्रक्षाल्य कर्णिणा
द्भिःक्षालयित्वा तयोः मेषमेष्योः पिष्टम[illegible]योः शरीरे आश्लेषयत् संश्लेषयत्॥ तत्रापि मेषं च मेषीं
च कुर्वंति तत्र योर्मेषि च मेष्यां च यद्यनेडकीरूर्णा विंदेत्ताः अपिज्ये निश्लेषयेदिति श्रुतेः॥ ॥कुशो
र्णा वा भावे कुशोर्णाः कुशानां दर्भाणां ऊर्णाः मंजरीतूलानि॥ मेषोर्णानां मेषरोम्णामभावे कुशोर्णा वि
प्रक्षाल्य मेषयोराश्लेषयेत्॥ वा विकल्पे। यद्यु अनेडकीर्न विंदेदथो अपि कुशोर्णा एव स्युरिति श्रुतत्वा
त्। तथा चापस्तंबः। उद्वासनकाले नैडकाभिरूर्णाभिर्मेषप्रतिकृति लोमशौ कुरुतस्तदलाभे कुशो
र्णाभिरिति॥ एष वै प्रत्यक्षं वरुणस्य पशुर्यन्मेष इति वाक्यशेषात् यस्यावदानाभ्यां सह स्त्रुच्यवधान
वचनाच्च मेषमेष्योर्यागीयत्वमवसीयते। तेन युक्तं तयोः समंत्रकमेव निर्वपणादि कुर्वंतीति वृद्धवचना
च्चाध्वर्युप्रतिप्रस्थात्रग्नीदादिबहुकर्त्तृकतापि युक्तं॥ अत्राहुः पितृभूत्याचार्यः। यागे द्रव्यसंस्कारैर्मेषमिथु

॥१२॥
॥देरये०५

नं संस्कुर्वंत्येके॥ एकेन। येसंस्कुर्वंति तेषांमभिप्रायः पयस्यावदानेनसह मेषमिथुनमप्यवदीयते॥ अतस्तदे
पिदेवतोद्देशेन त्यज्यतइति यागसाधनमेवेति॥ येतुनस्कुर्वंति तेषामयमभिप्रायः। नैवयागद्रव्यं मेष
मिथुनं। वारुणो मेषो भवति मारुती मेषीत्यश्रुतत्वात्॥ नच वरुणं मरुत्तश्चोद्दिश्यमेवैषमिथुनंत्यज्यते। यदे
ववारुणं मारुतं चहविस्तदर्थे नैवसदेवतोद्देशाइति मिश्रणोत्वदष्टो हविषः संस्कारस्तस्मादधर्मकमिति॥ जु
होतिधर्मेण मेषमिथुनसंस्करणीयमिति श्रीअनंतयाज्ञिकाः॥ हरिस्वाम्यभिमतश्चायं पक्षः॥ यतः स एवा
हा। अवदानेनसहमेषमवदधातीति होमसंबंधो वदानसंबंधान्मेषस्य होतव्यत्वोद्यदानस्य ततश्चसोपि
वरुणायेव होतव्यः॥ यागसंबंधाभावाच्चेनयागहविर्द्धर्माः कार्या इति॥ कर्काचार्यसंप्रदायकानादिमते
यागसंबंध एव॥ तेषांमते समंत्रकास्तपोयगिधर्मा भवंति॥ ॥ आहवनीयस्य पुरस्ताद्वेदीं करोति॥ केरंभ
पात्रमेषमिथुनकरणानंतरमाहवनीयस्याग्नेः पुरस्तात्पूर्वस्याग्नेः पुरस्तात्पूर्वस्यां दिशि द्वे वेदी करोति॥
एका दक्षिणतः। अपरा उत्तरतरति॥ तद्वैद्वे वेदीद्वावग्नी भवंत इति श्रुतत्वात्॥ तत्र प्रधानत्वोद्बहूनांहविषांसा
दनार्थत्वाच्चोत्तरा वेदिः पुरस्तादाहवनीयस्याजवेन॥ तथा च मानवे। अग्रेणाहवनीयं त्रिषुप्रक्रमेषुपरि
वावकात्रेपृथ्वीशंकुंनिहत्सवज्ञादानप्रभृति वेदिं विदधाति॥ षट्त्रिंशायांप्राची चतुःत्रिंशायां पश्चात्त्रिंशायांपुर
स्तात्पूर्वार्द्धे द्विपात्ततीपंचअर मात्रीं चतुर्दिक्षुउत्तरवेदिं विधायाग्नेणोत्तरं प्रक्रममात्रे वेदेरुद्दसावोत्स्प

।१
भ

चात्वालं शम्यया परिमीत इति ॥ प्रादेशोंतरा । तयोर्द्वयोर्वेद्योः प्रदेशः प्रादेशपरिमितो देशोंतरा अंतरालं
भवति ॥ अंगुष्ठतर्जनीभ्यां प्रसारिताभ्यां प्रादेश उच्यते ॥ ॥ पृथो वा ॥ अथवा द्वयोर्वेद्योः पृथोंतरा अंतरालं
भवति ॥ शाखांतरादेव ॥ आहापस्तंबः ॥ द्व्यंगुलस्यांगुलं चतुरंगुलं प्रथमा अरथवर्त्ममात्रसीतामात्रप्रादे
शमात्रेण वा तिर्यग्संभिन्ने वेदी भवत इति ॥ प्रसृतांगुलिरामणिवंधनाद्धस्तः पृथुशब्देनोच्यते मानवे च ॥
प्रतिप्रस्थाता दक्षिणां वेदिं करोत्योत्तरस्मात्परिग्रहादरत्निमात्रमंतरा समे प्राची भवतः यथाह[illegible]षि संभ
वेयुस्तथा तिरश्ची एक उत्करोपरेणोत्तरवेदिस्तंबयजुर्हरतीति ॥ ॥ रथमात्र्युत्तरा ॥ उत्तरा वेदिः रथमात्री
रथप्रमाणा भवति । दक्षिणानुप्रकृतिवद्देवा परिमितप्रमाणा वा ॥ व्याममात्री पश्चादित्यादिप्रमाणा वा
रथप्रमाणं च स्पष्टं शुल्बे कृतोक्तं ॥ अंगुलै रथसंमिताः प्रमाणं तत्राष्टाशीतिशतमीषा चतुःशतम
क्षः षडशीतिर्युगं चत्वारो चक्राः शम्यति अरत्नेश्चतुर्विंशो भागोंगुलं । पुरुषस्य पंचमो भागोरत्निः ॥ अथ
वा कूर्परादारभ्य कनिष्ठिकाग्रांतः ॥ तेन चतुरंगुलाधिकं शतांगुलं पश्चात्तिर्यक्प्रमाणं अष्टाशीत्यंगुलै
रधिकं शतांगुला प्राची । षडशीत्यंगुलं पुरस्तात्तिर्यक्प्रमाणमिति । तत्रायं साधनोपायः अष्टाशीति
शतांगुला रज्जुर्मित्वा तत्र लक्षणं कृत्वा ततश्चतुर्णवत्यंगुला रज्जुर्मूलरज्वा अर्द्धप्रमाणा मध्यस्य तस्या आ
म्यस्ताया रज्जोः आद्ये षष्ठभागे अंगुलत्रिभागंगद्ध्याधिकपंचदशांगुलप्रमाणे लक्षणं आकर्षणार्थं

॥१३॥
॥देवयो०५

कर्त्तव्यं॥ ततोभ्यासरज्जोरंतात्रयश्चत्वारिंशात्तमेंगुलेअंसांकनार्थं द्वापंचाशात्तमेंगुले च श्रोण्यंकनार्थं
लक्षणं कुर्यादिति॥ एतदेकमुत्तरवेदेः प्रमाणमुक्तं॥ अथ द्वितीयं प्रमाणमाह॥ ॥चतुररत्निर्वा पश्चात्स्या
त्प्राची षड्वा त्रयः पुरस्तात्॥ वाशब्दो विकल्पार्थः। अथवोत्तरवेदिः पश्चाच्चतुररत्निस्तिरश्ची भवति॥ स
तारत्निः षडुरत्निर्वा प्राचीआगायता॥ त्रयो रत्नयः पुरस्तात्तिरश्चीभवति। शेखांतरादेव॥ तत्र षडुरत्निः
प्राचीतिपेक्षे अयं साधनश्लोकः। नवारत्निर्मिता रज्जुर्लक्षिता षट्स्वतः परं। अर्द्धे अर्द्धे त्रिषु पाशाः स्यात्प
शुवेदेः प्रसाधनमिति॥ अस्यार्थः॥ नवभिररत्निभिर्मिता रज्जुः षट्‌ रत्निषु लक्षिता चिह्नयुक्ता कार्या॥
तच्च लक्षणं प्राच्यां अंकनार्थं। अतः परं अस्मात् षडुरत्निमितस्थाने कृतात् लक्षणात् परं त्रिषु स्थानेषु अर्द्धे अ
र्द्धारत्नौ वर्द्धरत्नौ लक्षणं कृत्वा पशुवेदेः प्रसाधनं कार्यमिति॥ तत्र प्रथमेर्द्धरत्नौ आकर्षणार्थं। द्विती
येर्द्धरत्नौ श्रोण्यंकनार्थं। तृतीयेर्द्धरत्नौ वंसांकनार्थमिति पाशाविपर्यस्तेनायं साधनोपायः॥ द्व्यरत्ने
लक्षणं कुर्यादर्द्धे सार्द्धत्रये तथा॥ अर्द्धे रत्नौ ततः सार्द्धे पशुवेदेः प्रसाधनी॥ अस्यार्थः॥ द्वौ अरत्नी प्रमाण
मस्याः सा द्व्यरत्निः रज्जुः तस्यां द्व्यरत्नौ रज्जौ लक्षणं कुर्यात्॥ श्रोण्यंकनार्थं। ततोऽर्द्धे अर्द्धरत्नौ आकर्ष
णार्थं लक्षणं कुर्यात्॥ ततः सार्द्धत्रये अर्द्धारत्न्यधिके अरत्नित्रये प्राच्यंतांकनार्थं लक्षणं कुर्यात्॥ ततः प
रमर्द्धे अर्द्धारत्नौ आकर्षणार्थं ततः परमरत्नौ रत्निप्रमाणे अंसांकनार्थं लक्षणं॥ ततः परं सार्द्धे अर्द्धौ ॥१३

रत्निसहिते अरत्नौ सार्द्धरत्ना वित्यर्थः॥ अत्र लक्षणरज्ज्वंतपाशा इत्यर्थः। अपंचपाशा विपर्यासे स्सा-
धनोपायः॥ सप्तारत्निशम्यापक्षे तु सप्तारत्निपरिमितां रज्जुं तत्र लक्षितां तदर्द्धे नाभिं वद्ध्वे विहितायाश्रो-
ण्ये षष्ठे भागे लक्षणमाकर्षणार्थं कृत्वा प्रातादरत्निद्वये प्रातात् सार्द्धरत्नौ चैव श्रोण्यंसांकनार्थे लक्षणे कु-
र्यादिति॥ ॥तेषां मध्ये शंकुः। त्रयः पुरस्तादित्याद्युक्तं॥ तेषां त्रयाणामरत्नीनां मध्ये शंकुर्निहितव्यः॥ तत्र हि शं-
कुनाकार्यमस्ति॥ पूर्वार्द्धे शंकुसहितमित्यत्र॥ ॥अपरिमिता वा॥ अथवा उत्तरवेदिरपरिमिता उक्तप्रमाणा-
द्भूयादतिशयेनाधिकप्रमाणा भवति॥ अपरिमितं प्रमाणाद्भूयः इति सुत्रकृतोक्तत्वात्॥ अतश्चैकाहिचातुर्मा-
स्यादौ हविरासादनपर्याप्ता अपरिमिता वेदिराश्रपणीया॥ अन्यथा वरोक्तमुत्तरंपूहे विषीतिन्यायेन हवि-
षामासादनासंभवात्॥ अत्रापि यावती वेदिः क्रियते तत्प्रमाणां रज्जुं मित्वा तत्र लक्षणं कृत्वा दीर्घप्रमा-
णार्द्धमन्ये स्यात्तस्याऽध्ये षष्ठे भागे लक्षणमाकर्षणार्थं कृत्वा पश्चात्तिर्यक्प्रमाणार्द्धे श्रोण्यंकनार्थं प्राक्ति-
र्यक्प्रमाणार्द्धे चांसांकनार्थं च लक्षणं कुर्यादिति॥ स्प्याद्यासंमर्शनात्करोति॥ अत्र द्वयोर्वेद्योः स्प्यादि स्प्या-
दानादारभ्य आसंमर्शनात् हस्ताग्रील्लेखाः संमृशतीत्येवमंतं करोतीत्यर्थः॥ तत्र प्रकृतिवद्विकृतिः कर्त्त-
व्येति न्यायात् प्रकृतिवत्सर्वं कर्त्तव्यं॥ प्रकृतौ चासादितः प्रोक्षितश्च स्प्यः सतृण इहोपात्तः प्रोक्षणं च प्रो-
क्षणीभिः कृतं ततश्चाग्निहोत्रहवण्यां पवित्राभ्यां च संस्क्रियते॥ पवित्रार्थौ च दर्भौ कुशौ छिद्येते इत्यर्थादि-

॥१४॥
॥देवमा०५

तान्यत्रपूर्वमासादनीयानिप्रोक्षितव्यानिच।तत्रचअकृतोब्रह्मणाकृताकृतप्रत्यवेक्षणंकृतं॥पात्रासादनप्रोक्ष
णकालेचप्रेषितेनयजमानेनवाग्यमनंकृतं।वाग्यतेनाध्वर्युणाप्रोक्षणंच॥अतएतावेत्सर्वंमत्रौयकृष्यते।स
र्वार्थित्वेपक्षेप्रणीताप्रणयनं।तत्राप्ययंक्रमः॥तत्रयदिप्रागग्न्यन्वाधानात्करंभपात्रकरणंकृतंतदाइहाग्न्य
न्वाधाने।उभयोःशाखाच्छेदः॥संनमनं॥शाखापरिवासनंच।अध्वर्येरिकोपवेषकरणं।पवित्रबंधनमुभयोः॥
वत्सापाकरणमुभयोर्वरूपा यभागमित्यध्वर्योः।मरुद्भ्योभागानितिप्रतिप्रस्थातुः।उपगूहनमुभयोः।तते
वरणं॥यजमानवाचंयच्छेतिप्रैषः।वाग्यमनं।पात्रासादनं॥वज्रेःपवित्रच्छेदनानिपवित्रे।अग्निहोत्रह
वणी।अतर्द्दनितृणं।शम्याचेतिपंचकासादनमध्वर्योः।शम्यावर्जितंपंचकासादनंप्रतिप्रस्थातुः।अप
स्यपश्चादुत्तरतोवा।ततउभयोर्वाग्यमः॥ततःपवित्रच्छेदनादिभिःप्रोक्षणीःसंस्कृत्यवज्रात्तर्द्दनितृणयोः
प्रोक्षणमुभयोः॥अध्वर्योःशम्याप्रोक्षणमधिकं।प्रोक्षणीनांस्थापनमुभयोः॥तृणंगृहीत्वायथोक्तंवेदिमा
नमुभयोः॥ततःस्फ्यादानादिसंमर्शनांतमुभयोरिति।केचिदध्वर्योश्चात्वालमानार्थयाःशम्यायाआसादनंप्रो
क्षणंचनेच्छंति॥अप्राकृतकार्यार्थित्वात्॥मेषमेष्योर्यथास्वसमंत्रकंनिर्वपणंचाग्न्यन्वाधानंब्रह्मवरणंच
पूर्ववत्कृतमेव।स्फ्याद्यासादनंच।प्रोक्षण्यःसंस्कृताएवसंति॥केवलमत्रतृणंशम्येसाद्यतयोःप्रोक्षण
मात्रंकार्यं॥ततोवेदिमानादौयजमानस्यवाग्यमःसप्रैषः।पात्रापिभवत्येव।पूर्वेद्यूरेवछिन्नावसंतीयेतेस ॥१४॥
॥भा०

यंतस्यानुष्ठातेत्पाशाम्य योरपिमेषमेषीनिर्वपणसंबंधिपात्रैःसहासादनप्रोक्षभवतोनपृथक्॥
उभयोरेकउत्करः।उभयोर्वेद्योरेकएवोत्करोएभवत्युत्तरस्यावेदेःसन्निधे॥ ॥अपरेणवेदिंप्रतिप्र
स्थातुःसंचरः॥स्तबयजुर्हरणार्थमुत्करंप्रतिगच्छतः तुरपरेणोत्तरांवेदिंसंचरोमार्गोभवति॥संचर
तिगच्छतीत्यनेनेतिसंचरः॥गोचरसंचरेति करणेघप्रसंख्यातोनिपातितः॥तथाचाहापस्तंबः॥अंतरा
वेदीप्रतिप्रस्थातुःसंचरोपरेणोत्तरवेदिंस्तबयजुर्हरन्नाध्वर्युमभिपरिहरत्युत्करेनिवपतिसमानउ
त्करः॥पंचेजइति।मानवेच।अन्तरेणोत्तरांस्तबयजुर्हरन्नीति॥अतस्तबयजुर्हरणयैवायंसंचरनिय
मोनान्यत्रेति॥अन्यत्रत्वंतरावेदी॥ ॥अत्राहापस्तस्तबः।अग्रेणगार्हपत्यंसमेप्राचीवेदीभवतउत्त
रामध्वर्युःकरोतिदक्षिणांप्रतिप्रस्थातोत्तरेविहारेध्वर्युश्चरतिदक्षिणेप्रतिप्रस्थातोभयत्रकृत्स्नंतंत्र
मपिपत्नीसंयाज्याएकवत्संप्रैषोद्विवद्धस्तानुजानातीति॥तथापदेवाध्वर्युःकरोतितत्प्रतिप्रस्था
पत्किंचवाच्याकर्मणिमध्वर्युरेवतत्कुर्याद्युगपत्कालान्वादिनिगदांतत्वाधारणद्रव्याश्चसंस्कारानिति॥ ॥
॥उत्तरवेदिंनिवपत्युत्तरस्या।वेदौउत्तरवेदिंनिवपति॥वक्ष्यमाणेनप्रकारेण।उत्तरस्यामेववेदौउत्तरवेदि
मुपकिरतिनदक्षिणस्यामिति॥श्रुतत्वात्।उत्तरवेदिरितिवक्ष्यमाणसंस्कारसंस्कृतस्यचात्वालमृदाकृतस्य
स्थंडिलस्यनामधेयं॥शम्यामादायचात्वालंमिमीतेपूर्वेणोत्करंसंचरंपरिहाप्य।शम्यामादायद्वात्रिं

॥१५॥
॥देवया०५

शदंगुलप्रमाणां शम्यां वारणीं हस्तेन गृहीत्वा उत्करं पूर्वेण उत्करात्पूर्वस्यां दिशि संचरं परिहाप्य संचरणार्थं मार्गमंतराले मुक्त्वा चात्वालं मिमीते॥ चात्वाल इति मानादिसंस्कारसंस्कृतस्य गर्तस्य नामधेयं। तच्च संव्यवहारार्थं चात्वाले मार्जयंत इत्यादौ॥ अथ शम्यां च स्फ्यं चादत्त इति प्रकृतस्य यत्रैव स्वयं मनसा मन्येताग्रेणोत्करं तच्चात्वालं परिलिखेदिति श्रुतत्वात्। अतश्च पूर्वं शम्याया आदानं। ततः स्फ्यस्यादानं। ततश्चात्वालमानमिति॥ मिमीत इत्युक्तं तदेव मानप्रकारमाह॥ ॥ शम्यामुदीचीं निदधाति॥ उत्करात्पूर्वतः संचरणाय मार्गं परित्यज्योत्तरस्माद्वेद्यंतादुदीचीमुत्तराग्रां शम्यां निदधाति। यत्रैव स्वयं मनसा मन्येताग्रेणोत्करं तच्चात्वालं परिलिखेत्स वेद्यंतादुदीचीं शम्यां निदधातीति श्रुतत्वात्॥ तथा चापस्तंबः उत्तरस्माद्वेद्यंतादुदक्प्रक्रमे चात्वाल इति प्रकृतस्य परिलिख्येत्स्त्री जानुदघ्नं त्रिवितस्तं वा खात्वोत्तरवेद्यर्थान्पांसून्हरतीति। काठके च॥ उत्तरतश्चात्वालं बहिर्वेदि संप्रसुत्तरवेदेस्त्रिप्रक्रमे परिमिते चेति। जानुदघ्नं खा चेति च॥ ॥ पुरस्ताच्च॥ शम्यामात्रमेवांतरालं त्यक्त्वा वेद्यंतादेव पुरस्तात्पूर्वस्यां दिशि उदीचीमुदगग्रां शम्यां निदधाति अथ पुरस्तादुदीचीं शम्यां निदधातीति श्रुतत्वात्॥ ॥ दक्षिणतः प्राचीं॥ उत्तरवेद्यंतमनुलक्षीकृत्य दक्षिणतो दक्षिणस्यां दिशि प्रागग्रां शम्यां निदधाति॥ अथानुवेद्यंतं प्राचीं शम्यां [illegible] ॥ ॥ उत्तरतश्च॥ उत्तरस्यां दिशि च चकारात् प्राचीं प्रागग्रामेव शम्यां निदधाति। अथोत्तरतः प्राचीं शम्यां निदधातीति श्रुतेः॥ एवं चतुर्दिक्षु शम्यापानिधानेन चात्वालस्य मानमुक्तं॥ ॥ स्फ्ये

॥१५
[illegible]

नां ते ल्लिखति तप्तायनीति प्रतिमंत्रं प्रतिदिशं शम्यां निधाय तप्तायनी मेसीत्यादिभिश्चतुर्भिः प्रतिमंत्रं
स्फ्येन करणभूतेनां तल्लिखति। निहितायाः शम्यायाः मध्यपार्श्वे अभ्यंतरं स्फ्येन रेखां करोतीत्यर्थः॥
तप्तायनीति पश्चात्। वित्तायनीति पुरस्तात्॥ अवतान्मानाथितादिति दक्षिणतः॥ अवतान्मा व्यथि
तादित्युत्तरत इति स वेद्यंतादुदीचीं शम्यां निदधाति स परिलिखति तप्तायनी मेसीत्येवं सर्वत्र निधा
नानंतरमेव स परिलिखतीति प्रत्येकं श्रुतत्वात्॥ एवं द्वात्रिंशदंगुलः समचतुरस्रश्चात्वालः परिलि
खितो भवति॥ विदेदग्निरिति चात्वाले प्रहरति स्फ्यं। नान्वारब्धे यजमानेध्वर्युर्विदेदग्ने न्वारंभश्च चा
त्वालस्याग्निर्नभ इति मंत्रेण चात्वाले अधिकरणभूते स्फ्येन करणभूतेन प्रहरति प्रहारं करोति पुरीषो
तवननार्थं स प्रहरति विदेदग्निरिति श्रुतत्वात्॥ अन्वारंभस्तु प्रहरणमात्र एव भवति॥ तत्रैव विधानात्॥ ॥
अग्ने अंगिर इति पुरीषं हरति हस्तेन च॥ ततोध्वर्युरुत्त वा तं पुरीषमग्ने अंगिर आयुनेति मंत्रेण हस्ते
न च चकारात्स्फ्येन च हरति वेदिपूर्वार्द्धे निहितशंकुसमीपे निवापापनयति॥ अथ हरतीति श्रुतत्वात्॥
योस्यामिति निवपति पूर्वार्द्धे शंकुसहितं। योस्यां पृथिव्यामसीति मंत्रेण तदुद्धृतपुरीषमुत्तरस्या वेदेः पू
र्वार्द्धे पूर्वभागे शंकुसहिते प्राड्डिः हितशंकुसंलग्नं निवपति राशिं करोति॥ प्राङ्मुखस्तूत्तरवेद्यां निवप
तीति मोनवे॥ योस्यां पृथिव्यामसीति हृत्वा निदधातीति श्रुतत्वात्॥ अग्नीदुत्करवत्तूष्णीं हृतं॥ तदुद्धृतं

॥१६॥
॥देवया०५

पुरीषमग्नीदुत्करस्तूष्णीमंत्रवर्जं पाणिद्वयेनाभिनान्यस्यति॥ अभिनिदधाति॥ हस्ताभ्यामवबाधत इ
त्यर्थः॥ अथ हरति यत्र हरति तदग्नीदुपसीदतीति श्रुतत्वात्॥ ॥ एवं द्विरपरं॥ यथा विदेदग्निरिति प्र
हरणादारभ्याभिन्यासांतमेकवारं कृतं॥ एवमेव द्विः द्विर्वारमपरंकृतान्यद्विः कर्त्तव्यं। तच्च कर्त्तव्यमाह॥
॥ ॥द्वितीयस्यां तृतीयस्यामिति विशेषः॥ यो द्वितीयस्यामिति द्वितीये पुरीषनिवपनमंत्रविशेषः॥
यस्तृतीयस्यामिति तृतीय इति॥ ॥ अनुत्त्वेति चतुर्थं यथार्थमाह सासि पूंह्यसीति व्यूहत्युत्तरवेदिं पूंश
म्यामात्रीं॥ अनुत्वादेववीतय इति मंत्रेण चतुर्थं यथार्थं यवता पुरीषेणार्थः उत्तरवेदिनिष्पत्तिरूपं प्रयोजनं ता
वत्पुरीषमाहृत्य शंकुसमीपे आनीयाध्वर्युः सिपूंह्यसीति मंत्रेण कल्पस्वेति पदवता उत्तरवेदिं व्यूहति। पुरी
षं भूमिसंलग्नमेव हस्तेन सर्वतः प्रेरयित्वोत्तरवेदिं शम्यामात्रीं द्वात्रिंशदंगुलपरिमाणशम्याप्रमाणां निष्पा
दयतीत्यर्थः॥ व्यूहतीत्यस्यान्यत्रापि हस्तप्रेरणार्थस्येव दृष्टार्थत्वात्॥ स्तुचौ व्यूहतीत्यादौ। अनुत्वादेववीतय
इति चतुर्थपूंहरति। तां वै चतुःसृक्तेश्चात्वालाद्धरत्यथानुव्यूहति सिपूंह्यसि सपत्नसाही देवेभ्यः कल्पस्वेति श्रु
तत्वात्॥ दिशं दिशमनु विभागेनोहति प्रेरयति। चतुरस्त्रामुत्तरवेदिं कर्तुमिति हरिस्वामिनः। तां वै युगशम्येन
विमिमीत इति श्रुतत्वात्। शम्यामात्रीमित्युक्तेः॥ तथा च द्वात्रिंशदंगुला समचतुरस्त्रोत्तरवेदिर्भवति। अरत्नी
श्चतुर्विंशो भागोंगुलं। चतुर्विंशांगुलो रत्निरित्युक्तत्वात्॥ अरत्निस्तु कूर्परादारभ्य कनिष्ठिका पर्यंतः। अर

॥१६॥
३२।

त्निः॥ निष्कनिष्टेन मुष्टिने भ्यमरोत्निः॥ उद्बूचाहोः समस्थितस्य पुरुषस्य पंचमो भागो रत्निः। पंचारत्निः पुरुष इति
सूत्रकारेणोक्तेः। तस्य चतुर्विंशो भागोंगुलमिति। अथोत्तरवेदेः प्रमाणांतरमाह॥ ॥ विततीयामपरिमितां युग
मात्रीं यजमानदशपद्यां वा॥ वाशब्दो विकल्पार्थः। स च प्रत्येकेभिसंबध्यते॥ विततीयां वा उत्तरवेदिं कुर्यात्।
विततीयामिति वेदेस्तृतीयभागसंमितार्थः॥ तच्च यत्प्रमाणा यां वेद्या उत्तरवेदिः क्रियते तत्तू वेदिक्षेत्रे त्रंस वक्षेत्रफ
लेन चतुरस्रीकृत्य त्रिधा यच्छिद्यैकं तृतीयभागं पृथक् चतुरस्रीकृत तत्प्रमाणामुत्तरवेदिं कुर्यात्। तदुपायश्च
शुल्बकेतोक्तेः। यदंत्तिर्य्यज्ञानी त्रिपदापार्श्वमानीतस्या   या रज्जुर्दशाकरणीति। एवं च क्षेत्रफलेन दशपद्या
भवति॥ दशपद्ये वदपदेस्तुच्यते॥ पद्या पदयोः पर्यायत्वस्य दृष्टत्वात्॥ द्वादशांगुलं पदमित्युक्तत्वाच्च। केचिद्दशप
द्यामिति पुरुषप्रमाणां शतपदक्षेत्रफलामोहं कुतः तां वै युगमात्रीं वा सर्वतः करोतीत्यतः सर्वत इत्यनुवर्त्तमि
ने यजमानस्य वा दश दश पदानीति श्रुतेः॥ अतश्च सर्वतः सर्वासु दिक्षु दश दश पदानीत्यर्थो भवति॥ परिशिष्टको
रवचनस्य तु शास्त्रांतरमालंबवचनं मूलं भविष्यति॥ हरिस्वामिनस्तु इमां श्रुतिं यदंतितिर्यज्ञानीत्यादिपरिशि
ष्टकारकवचनानुरोधेनैव व्याख्यातवंतः। तथा हि। युगप्रमाणां चतुर्ष्वपि पार्श्वेषु करोति। अथवा यजमानस्य
दशदशपदानि सर्वतः करोति कथं यदंतितिर्य[illegible]नीति त्रिपदापार्श्वमानीयस्य क्षेत्रस्य तस्य याक्ष्णया तया यन्नी
यते रज्ज्वा तद्दशपदं भवति॥ तानि च प्राच्यां पिंड्यमानानि दश भवंति॥ दक्षिणतोपि॥ प्रत्यगुदक्चात्येवं यजमानस्य
दशदशपदानि संपाद्यानि॥ एकशतविधेप्यवमेवाग्निवेदिमानं करिष्यति। मायावेत्येषा सप्तविधस्य वेदिस्ता

।।१७।।
।।देवया०५

वं तीश्चतुर्दशहस्तत्व एकेशतविधस्य वेदिं विमिमीत इति।अथाग्नेर्विधा अष्टाविंशतिः प्राचः पुरुषा अष्टाविंश
तिस्तिर्यंच इति चेति।। ।।उत्तरवेदिः सधर्मिका सोमे समाम्नाता।उत्तरवेदिशब्द श्च संस्कारवाची अतोत्र नामधे
येन तत्सर्वे उत्तरवेदिसंस्कारा इह प्राप्यंते।तत्र यावंत्युत्तरवेदिप्रमाणानि सोमे श्रुतानि तान्यपि सर्वाण्यपत्र प्राप्नुवं
ति।।न च तानि सर्वाण्यपीहेष्यंते अत आह।। ।।सोमे वोत्तरे व्यपस्फुरणाश्रुतेः।।वाशब्दोवधारणे।।उत्तरे इति
मे द्वे उत्तरवेदिप्रमाणे युगमात्री यजमानदशपद्या वेत्ये सोम एवं भवतो नान्यत्र।कुतः।व्यपस्फुरणाश्रुतेः।।यत
श्चातुर्मास्येषु द्युत्तरवेद्योर्व्यपस्फुरणं श्रूयते।।तथाहि।।यदि युगमात्रीं दशपदीं वोत्तरवेदिं कुर्यात् वेदिश्चोत्तरवे
दिश्च व्यपस्फुरेयातामिति।।व्यपस्फुरणं च स्पद्धेच्यते।।अत उत्तरयोः प्रमाणयोरिह प्रतिषिद्धत्वात्परिशिष्टा
नी त्रीणि प्रमाणानीह भवंति।।असंभवाच्च।।न केवलं व्यपस्फुरणश्रवणात्।।अपितु असंभवाच्च।।अत्राऽ
संभवादप्युत्तरे प्रमाणे सोम एव भवतः।।नान्यत्राप्यतो वरुणप्रघासादा चुत्तरे प्रमाणे न संभवतः।कथं।
तथाहि उत्तरस्यां वेदावुत्तरवेदिं निवपतीति।अतोत्तरवे धारत्वेन वेदिः श्रुता।।न च महाप्रमाणाया अल्प
प्रमाणा वेदिराधारत्वेन संभवति।।अतोपि कारणात्सोम एवोत्तरे प्रमाणे भवतः।अत एवासंभवादिति हेतू
पादानात्।।शतपद्यान्क्षेत्रफलाद्दशपद्या।।ननु दशपदक्षेत्रफला।तस्यास्तु वारुणप्रघासिक्यामपि वेदौ
संभवो भवत्येव।तथा चासंभवादिति हेतुरसंगतः स्यादिति।।तस्माच्छतपदक्षेत्रफलेव दशपद्येति सूत्रकाराभि
प्रायः।। ।।मध्ये नाभिं करोति प्रादेशसमां चतुस्रक्तिं।।उत्तरवेदिमध्ये प्रादेशसमां प्रादेशप्रमाणां चतुःस्र

।।१७
।।दे

त्ति चतुः कोपा
नाभिं करोति ॥ मध्येनाभिकामिव कुरोति समानत्रासीनो व्याघारयाणीति च श्रुतात्वात् ॥ अथास्यामध्ये
प्रादेशमात्रीं गोपदमात्रीमश्वशफमात्रीं वोत्तरनाभिं चतुस्रक्तिं कृत्वेति आपस्तंबः । काठके परिमंडलां वेति ॥
प्रोक्षत्युत्तरवेदिं पूंसिवकृताश्वभ्रं किरति ॥ तत्र शुंधस्वेति मंत्रेणाद्भिः प्रोक्षति ॥ शुंभस्वेति मंत्रेणोत्तरवेद्यां सिताः प्र
किरति ॥ उपरिक्षिपति ॥ तामद्भिरभ्युक्षति सोऽभ्युक्षति सिंपूस्यासि सपत्नसा हीदेवेभ्यः शुंधस्वेत्यभिरनुविकि
रनुविकिरतीति प्रदक्षुत्य सोऽनुविकिरति सिंपूस्यासि सपत्नसाहीदेवेभ्यः शुंभस्वेतीति श्रुतत्वात् ॥ ३ ॥ छन्नाव
सति ॥ सा उत्तरवेदिर्दर्भैस्तृणाकटादिना यज्ञियेनछन्नासति रात्रौ वसति ॥ अथैनां छादयति सा छन्नैतां रात्रिं
वसतीति श्रुतत्वात् ॥ विकृतीनां सद्यस्कालत्वेपीह ववनोद्यहकालनाभवति ॥ तथा च काठके ॥ श्वोग्नेप्र
पाययत इति । एवमन्येष्वपि सूत्रेषु ॥ आपस्तंबसूत्रे तु विशेषः । सद्यस्कालीवावरुणप्रघासा इति विकल्पे
न सद्यस्त्वस्योपयुक्तत्वात् ॥ उदुचरशाखाभिः क्षशाखाभिर्वा प्रच्छाद्य वसति सद्यस्कालः पशुर्भवतीत्या
पस्तंबः ॥ ॥ प्रातः पंचगृहीतं गृहीत्वाग्नीं प्रणयतो ध्माभ्यामुपयम्य छादनांतं पूर्वदिने कृत्वा प्रातः श्वोभू
ते आज्यसंस्कारपूर्वकं जुहूं पंचगृहीतमाज्यं गृहीत्वा इध्माभ्यां द्वावग्नीं प्रणयति । किं कृत्वा उपयम्य । उ
पयमनीभिरुपगृह्य ॥ संतापपरिहारार्थं किंचित्पात्रस्थाभिरग्नेरधस्तात् धारणं कृत्वा इध्ममभ्यादधसु

॥१२८॥
॥देवया०५

पयमनीरुपकल्पयं त्याज्यमधिश्रयतीसादिश्यत्वात्॥ अग्निप्रणयनं च सधर्मकं सोमउपदिष्टं तत्रेहो
कौग्निः प्रणीयते॥ इहतु तद्वे द्वे वेदी द्वाग्नी भवत इति द्वयोरग्न्योर्विधानात्॥ द्वयोः प्रणयंतीति प्रणयनवि
धानाच्चैध्माभ्यामग्नी प्रणयतीत्युक्तं। अपरिमितं प्रणयनीयं त्रिपूनमित्युक्तत्वादेकैकइध्मो परिमितका
ष्ठकस्त्रिमूतनद्धश्च भवति॥ तावेव विधाविध्मोमध्याहवनीयमभ्याधत्तः अध्वर्युप्रतिप्रस्थातारौ उप
यम्यते उपगच्छ्याग्निरभिरित्युपयमन्यः सिकता अशुद्धरणार्थे पात्रे पात्रे संतापपरिहारायोपस
मीपे कल्पयति स्थापयतीति हरिस्वामिनः॥ ॥आपस्तंबः। उदुंबरशाखाभिः प्लक्षशाखाभिर्वा
प्रच्छाद्य च वसति। यद्यसद्यस्कालः पशुर्भवंत्साहवनीये प्रणयनीयमिध्ममादीप्य सिकताभिरुपयस्मा
ग्नये प्रणीयमानायानुब्रूहीति संप्रेष्य प्रणीयमानायानुब्रूहीति चेति॥ मानवे च। चात्वालादुपयमनीः
कुरुते वेदिपुरुषात्प्रतिप्रस्थाताग्नये प्रणीयमानायानुब्रूहीत्यनुवाचयत्यग्निभ्यां वेति। अतः उपयमन्यः
सिकता वा चात्वालमृत्तिका वाग्नाल्याः॥ उभयीनामपि समूलत्वात्॥ स वैवादि भज्य प्राकृतत्वात्तर [illegible] ॥
अथ वा सर्वमेवाहवनीयं द्वेधा विभज्यपक्कपर्णाभ्यां प्रणयतः कुतः तस्य प्राकृतत्वात्॥ प्रकृतितः प्राप्तत्वा
त्॥ प्रकृतौ हि दर्शपूर्णमासयोरेवमेव प्रणयनं दृष्टं॥ सोमे च धर्मवदिध्मेन प्रणयनमाम्नातं॥ न च वरुणप्र
घासानां सौमः प्रकृतिः। किं तु दर्शपूर्णमासावेव॥ अतः प्रकृतिवदेवैकपर्णाभ्यां सर्वमाहवनीयं विभज्य॥ जाणे

१२८

प्रणयनं कर्त्तव्यमिति प्राप्ते आह ॥ अथ वा सर्वमाहवनीयं विभज्य द्वेधा उत्साद्वयोर्वेद्योः प्रणयनं कर्त्तव्यं ॥ कु
तः अप्राकृतत्वात् ॥ अस्य प्रणयनस्यापूर्वत्वादित्यर्थ इत्यकारप्रश्लेषेण व्याख्येयं ॥ शाकंध्वादित्वा
पररूपेण सूत्रे निर्देशः ॥ यथाधिके वा प्र कृत्यनुग्रहादित्यत्र केकाचार्यैरकारप्रश्लेषेण व्याख्यातः ॥ स
र्ववेदसप्रकृत्यस्य सहस्रेणानुग्रहदर्शनादिति ॥ तथात्रापि व्याख्येयमिति । पक्षांतरमाह ॥ ॥ प्रणयन
ं सोमाद्वाच्यत्वात् ॥ अथ वात्र असोमात्प्रणयनं स्यात् ॥ सोमिकधर्मेणा त्रोग्न्योः प्रणयनं न वेत् ।
न प्राकृते । कुतः प्रकृतत्वावाच्यत्वात् ॥ एवं चेत्तद्वाच्यवक्तव्यं विधेयं भवति यदि सौमिके ॥ तस्याप्राप्तत्वात्
प्राकृते तु चोदकेन प्राप्नोत्येव नाविधियेत विधाय तु चेद्वयोः प्रणयंतीति ॥ तस्माद्यन्न प्राप्नोति तन्नादेवेतत्प्र
णयनमिति ॥ सोमिकमेवस्यादिप्राप्ते आह ॥ प्रकृते वाऽनामत्वात् । वाशब्दः पक्षव्यावृत्तौ । प्रकृतेतरवेदे
प्रणयनं ॥ प्रकृतिवदेव गार्हपत्यादुद्धरणमित्यर्थः ॥ न सोमात् ॥ न सौमिकमिध्माभ्यामाहवनीयादिति
कुतः । अनामत्वात् ॥ नामधेयं हि धर्मान्प्रापयति न चैतन्नामधेयं । तिङंतत्वात् ॥ प्रणयंतीति ॥ ननु प्राकृ
ते तत्प्रणयनं । तर्हि तस्य चोदकादेव प्राप्तत्वात् । किमिति पुनर्विधानं द्वयोः प्रणयंतीत्येवमाशंक्याह ॥ ग्रह
णं गुणार्थमुत्तरवेद्यग्निनिधानात् ॥ इतरतः प्राप्तस्यैव प्रणयनस्य पुनर्ग्रहणं पुनर्विधानमेतद्गुणार्थं ॥ को
गुण इति चेदस्ति हि गुणः ॥ उत्तरवेद्यग्निनिधानात् ॥ प्रकृतौ हि आहवनीयखरे ऽग्निर्निधीयते ॥ इह तूत्तर

२७

।।१९।।
।।देवेया०५

वेदौ।तेनोत्तरवेदिनिधानार्थमग्नेर्नयनस्यप्रकर्षेणादूरमग्निंनयतिरुत्तरनयनेरूपाद्गुणात्।।द्वयोःप्रणयः।।ते
नचनेनद्वयोर्मध्यमयोःपर्वणोःप्रणयंतिप्रकर्षेणादूरमग्निंनयतिउत्तरवेदौनिधानेविधानादिति।तस्मात्प्रकृ
तमेवेदंप्रणयनमिति।।सिद्धांतस्तु।। ।।आज्यप्रोक्षणीरुद्यम्याग्नीचाहाग्निभ्यांप्रह्रियमाणाभ्यामनुब्रूह्ये
कस्फ्ययानूद्देहीति।पंचगृहीतमाज्यंप्रोक्षणीश्चादायध्मोद्देहीत्युत्यायेध्मावग्नीधोद्यम्यप्लौतातारंप्रष्यतिआहा।आग्नि
भ्यांप्रह्रियमाणाभ्यामनुब्रूहीति।।एकस्फ्ययानूद्देहीत्येतच्चप्रतिप्रस्थातारंप्रत्याह।।आज्यचात्रेधाधिश्रप
णानंतरंपूर्णाऽऽतिवत्संस्कृत्यसजुकोपंचगृहीतंग्राह्यो।प्रोक्षण्यश्चासंस्कृतेताआपएवबकेचित्पात्रस्थाः।इध्म
मभ्यादधत्युपयमनीरुपकल्पयंत्याज्यमधिश्रयतिस्रुवंचस्रुचंचसंमार्ष्टिथोत्थायाज्यंपंचगृहीतंगृह्णी
तेपत्नप्रेक्षीतेइध्मोभवत्यथोद्यच्छंतीध्ममुपयम्यस्रुपयमनीरथ्याहाग्नयेप्रह्रियमाणायानुब्रूह्येकस्फ्य
यानुदेहीतिश्रुतत्वात्।।उद्यच्छतीतिहस्ताभ्याउ पंति।।सामर्थ्यप्राप्तसहायकबहुवचनं।तत्रोध्वर्युःप्र
नत्वौदग्निमुद्यम्यच्छति।।आज्यप्रोक्षण्यादीनिसामर्थ्यादिन्येगृह्णीयुः।।अथाहेतिप्रैषो।एकःस्फ्य
साधनमस्याःसेयमेकस्फ्यारेखा।तयायुक्तस्तमनुपश्चादुद्देहिउद्धेति।।उच्छद्रोयनस्योर्ध्वभागंप्रा
चीदि शंद्योतयाति।स्फ्ययेती भूतलक्षणेतृतीया।तयायुक्तःप्रतिप्रस्थाताग्निमनुगच्छ तिस्फ्येनभू
मौलेरवांकुर्वन्नित्यर्थः।।प्राकृतमेतत्प्रणयनमितिस्थापितेपूर्वपक्षेसिद्धांतस्त्वेनसौमिकंप्रणयनमुपदि

।१९।

रीति। सूत्रकारःस्याथपनेवाभिप्रायोयेनसौत्रामपण्यास्स्फ्यादिकरोतिदक्षिणस्यांवरुणप्रघासे
त्ति। आह। तत्रहिश्रूयते। यद्येदेनावग्नीआहवनीयाद्विक्रीयेतेइति। एतच्चेदेवोपपद्यतेद्वाहावरुणप्रघासे
ष्वपिप्रतिप्रस्थातुराहवनीयात्प्रणयनंभवतीति॥ आहृतत्वेचैतन्नेस्यादिति॥ तस्मादत्रसधर्मकंसौ
मिकमेवाग्न्योःप्रणयनमितिसिद्धांततः। नतत्रश्चात्रसूत्रेकारेणोपयमन्युपानिनयनोतंतद्देवोयनिब
द्धं॥ तथाचाहशांखायनः॥ आहवनीयाद्वाग्नीप्रणयंति॥ इडायास्त्वेतिसाद्यमानयोरिध्मयोरितिचाग्न
हृतेहिसआहवनीयादिति इध्मयोरितिवचनस्यात्॥ काठकेचाश्वोभूतेग्नीप्रणयते। यथापशुबंधइति॥ मा
नवेच॥ ॥आहवनीयेग्नीप्रणयनानिप्रसाधनत्रइतिभह्नेत्यचात्वालोवाद्दुपयमनीःकुरुतेवेदिपुरीषात्प्रति
प्रस्थाताग्नप्रणीयमानायानुब्रूहीत्यनुवाचयति॥ अग्निभ्यांवा। त्रिरनूक्तायामग्निप्रणयनान्युद्यच्छतइ
तिसधर्मकमेवसोमिकंप्रणयनमुक्तं॥ आपस्तंबसूत्रेविशेषः॥ कालेपशुबंधवद्गार्हपत्यादग्नीप्रणयते
नोच्यतहोमौजुहुतोत्तरावेदीप्रतिप्रस्थाताप्रतिपद्यतउत्तरेणोत्तरांवेदिमध्वर्युरुत्तरवेद्यामग्निंप्रतिष्ठा
पयति। जघन्यःप्रतिप्रस्थातादक्षिणस्यामिति॥ त्रिरुक्तायांयथा। वेदिहरेणं॥ होत्राप्रथमायामृचित्रि
रुक्तायांसंसांयथावेदिस्वस्ववेदिप्रसग्नोहरणंकुरुतः॥ प्रतिप्रस्थातास्फ्येनलिखत्यावेदिश्रोणेः॥
रेकं स्फ्येयानूदेहीत्येवमध्वर्युणाप्रेषितःप्रतिप्रस्थातास्फ्येनकरणभूतेनाहवनीयादोरन्या। वे

॥२०॥
॥देवया०५

दिग्गोणो दक्षिणां वेदिश्रोणिं यावल्लिखति लेखां करोतीत्यर्थः। अनूद्देति प्रस्छाते कस्प्ययै तस्मान्मध्य
माद्धेको यं एष वेदेर्जघनार्धो भवति तच्च देवात्रांतः पातुं नगार्ह पत्यस्य वेदेर्मविच्छिन्नं भवति तद्देवैतदनु
संतनोतीति श्रवणात्। अत्रोहेला पनः। अध्वर्युश्चैवैद्धया द्धह्मत्रे कस्प्यस्य योपसंबधानि स्प्येन ना हव
नीहवनीयात्पारसूत्समुधृत्योत्तरस्या वेदेर्दक्षिणा दंतात् केर्षन्नियादा वेदिमध्यादेकावेदिति। तेन वेदि
द्वितीये वेरपाद्र्य पांसेषु सौत्रामण्यां च दक्षिणवेदिश्रोणियावद्रेखाकरणं॥ एकवेदिके महाहविः पशुबं
धस्य मादो तु वेदिमध्यस्थापरशं कुपर्यंतमेव॥ तथा च श्रुतावुक्तमेतस्यान्मध्यमाद्धेको यं एष वेदे
र्जघनार्द्धं भवति॥ उत्तरवेदेर्वा॥ अथवोत्तरवेदिपर्यंतं प्रतिप्रस्थाता स्प्येन लिखति आहवनीयादारभ्य॥
तद्धेव उत्तरवेदेरत्तदा यंतीति श्रुतत्वात्॥ वेद्यंतरे स्थित्वोदङ्मुख उत्तरवेदिं प्रोक्षतीध्मो बर्हिरिति प्रतिमंत्रं प्रति
दिशं यथालिंगं॥ अध्वर्युरथादग्निमन्यस्येगदाय वेद्यंतरे वेद्योर्भवेमध्येंतराले उदङ्मुखः स्थित्वोऽ
थवा वेद्यंतरे उत्तरवेदेर्दक्षिणपार्श्वे वेदिमध्ये उदङ्मुखः स्थित्वा इंद्रघोषस्त्वा वसुभिरित्यादिभिश्च
तुर्भिर्मंत्रैर्यथालिंगं मंत्रलिंगक्रमेण प्रतिदिशं सवसुदिक्षूत्तरवेदिं प्रोक्षति प्रसिंचति॥ तत्र यंत्या गद
स्युत्तरवेदिं प्रोक्षणीरध्वर्युरादत्ते पुरस्ताद्देवाग्ये प्रोक्षत्युदङ्तिष्ठं त इच्छोपस्थेति श्रुतत्वात्॥ तपा॥
अपपश्चात्प्रोक्षति प्रचेतास्त्वेति॥ अतद्दक्षिणतः प्रोक्षति मनोजवास्त्वेति अथोत्तरतः प्रोक्षति वि ॥

श्चकर्मा त्वेति च॥ दक्षिणापूंससहितं बहिर्वेदि शेषं निषिंचतीदमाहंतमवा रा॥ ॥ ततोध्वर्युप्रोक्षणीशेषमुद
महं तं ध्रुवा बर्हिर्द्दे त्यनेन मंत्रेणोत्तरवेदेर्दक्षिणांससहितं दक्षिणांसस लग्नमेव बहिर्वेदि वेदेर्बहिःप्रदेश एव
निषिंचति निनयति॥ अथवा प्रोक्षण्यः परिशिष्यंते तद्वे एते पूर्वस्त्रक्त्यौ तयोर्यद्दक्षिणा तां न्यंते न बहिर्वेदि नि
नयतीदमहमित्यादि श्रुतत्वात्॥ तत्र ये एते उत्तरवेदेः पूर्वस्त्रक्तीकोणौ। तयोर्मध्ये या दक्षिणास्त्रक्तिः॥ तां तस्याः प्र
ति विभक्ति व्यत्ययः॥ न्यंते न निहृष्टेतः प्रदेशो न्यंतः तेन तस्मिन्न्यंत इति सप्तम्यर्थे तृतीया॥ अथवा ताः अ
वशिष्टाः प्रोक्षणीन्यंते न नीनयतीति॥ यदा तु चयने अग्न्या त्मन्युत्तरवेदिः संस्क्रियते तदा बहिर्वेद्यपवोत्तरवे
देर्दक्षिणांसस्याजवेन निनयनं॥ न त्वात्मनि बहिर्वेदि निनयतीति श्रुतेः॥ ॥ अमुमित्यभिचरन्॥ अभिच
रन्नभिचारं कुर्वन् अमुमभिनिःसृजामीति श्रुतिपठितेन मंत्रेण बहिर्वेदिशेषं निषिंचति॥ तथा च श्रुतिः॥
यद्यु अभिचरेदादिशेदिदमहं तमवारमुमभिनिःसृजामीति अमुमित्यस्यस्थाने द्वितीयांतमभिचर्यमाण
स्य नामग्रहणं॥ कर्मबलेन परस्य पीडनमभिचार इत्युच्यते॥ ॥ नाभ्याः श्रोण्यपूंसेषु पंचगृहीतं जुहोस
श्रोण्या दक्षिणेपूंसे श्रोण्यापूं श्रोण्यामपूंसे मध्ये च हिरण्यं परूपसि पूंथ्यसीति प्रतिमंत्रं॥ ततोध्वर्युरुत्तरवेदेरु
त्तरत उपविश्य नाभ्याः श्रोण्यपूंसेषु द्वयोः श्रोण्योर्द्वयोरंसयोश्चाक्षूपाकौटिल्येन तत्पंचगृहीतमाज्यं जु
होति॥ तत्रमाह॥ प्रथमं नाभे दक्षिणेंसे ततः उत्तरश्रोण्यां। ततो दक्षिणश्रोण्यां ततः उत्तरेंसे। ततो नाभि

॥२१॥ मध्ये। सिंह्यसि सपत्नसाहीत्यादिभिः पंचभिर्मंत्रैः प्रतिमंत्रं हिरण्यं पश्यन्नु सुवर्णं विलोकयन्नध्वर्युर्जुहोति॥
॥देवया०५ हिरण्यमंतर्द्धापि पंचगृहीतेन नाभिं व्याघारयतीति। मानवो। जुह्वां पंचगृही[illegible]तं गृहीत्वा सर्वत्र हिरण्यमु
पस्पृश्योत्तरवेदिं व्याघारयति। दक्षिणमंसमुत्तरांश्रोणिं दक्षिणांश्रोणिमुत्तरमंसं मध्यमिति सिंहीरस्येते प्रति
मंत्रं भूतेभ्यस्त्वेति स्रुचं गृह्य पैतुद्रारवैः परिधिभिरुत्तरवेदिं परिदधाति। परिधिसंधिना सर्वाहुती जुहोतीति॥
अथ येषां मध्ये नाभिर्केवभवति तस्ये ये पूर्वे स्रक्ती तयोर्यदि दक्षिणा तस्यामाघारयति सिंह्यसि स्वाहेत्यया
परयोरुत्तरस्यां अथापरयोर्दक्षिणस्यां॥ अथ पूर्वयोरुत्तरस्यां अथ मध्य आघारयतीति च श्रुतत्वात्॥ भू
ते भ्यस्त्वेति स्रुचमुद्यच्छति॥ होमार्थं नीचैर्हृतां स्रुचं भूतेभ्यस्त्वेत्यनेन मंत्रेणोद्यच्छति। उद्गृह्णाति। उर्द्ध्वं
करोति। अथ स्रुचमुद्यच्छति भूतेभ्यस्त्वेति श्रुतत्वात्॥ ॥नाभिं पैतुद्रारवैः परिदधाति पूर्ववद्ध्रुवो
सीति प्रतिमंत्रं। यतुद्रारवैः [illegible] देवदारुवृक्षजैः प्रादेशमात्रैः परिधिभिः पूर्ववन्नाभिं परिदधाति। पूर्वव
दिति मध्यमं दक्षिणोत्तरैः ध्रुवोसीति त्रिभिः प्रतिमंत्रं॥ अथ परिधीन्परिदधाति ध्रुवोसि पृथिवीं दृं
हेति मध्यमं ध्रुवक्षिदस्यंतरिक्षं दृंहेति दक्षिणमच्युतक्षिदसि दिवं दृंहेत्युत्तरमिति श्रुतत्वात्।
तेषां चकाठके॥ त्रीन्परिधीन्पैतुद्रारवान्प्रादेशमात्रांस्तैरुत्तमाभिः परिदध्यादिति॥ ॥अग्नेः
नि पुरीषमिति वपति गुल्गुलुसुगंधितेजनवृष्णेस्तुकाश्वोपरिशीर्षण्या अभावेऽन्योः॥ अग्नेः पुरी ॥२
॥५

मसीत्यनेन मंत्रेण नाभेरुपरि गुल्गुलुसुगंधितेजनवृष्णेस्तुकानि वपति॥ निदधाति॥ गुल्गुलुः प्र
सिद्धः। सुगंधितेजनं रोहीतः वृष्णेस्तुकां शिरोरोमाणि। ताश्च शीर्षण्याः। शीर्ष्णि भवः शीर्षण्याः शृंगयो
रंतराले भवानि मेषरोमाणीत्यर्थः॥ तदभावेऽन्या अशीर्षण्या अन्यस्मिन्मेषस्य शरीरप्रदेजाता इत्यर्थः॥
अग्नेः पुरीषमसीति संभारानुपनिवपतीति यद्धेत्यमापं सपं हैवास्य गुल्गुलुगंधो हैवास्य सुगंधितेज
नं। अथ यद्वृष्णेस्तुका भवति तस्माद्याः शीर्ष्णो निर्दिष्टं स्यान्नो मा छिद्याहरेद्य युतां न विंदेदपि यामेव कां
चाहरेदिति श्रुतत्वात्॥ ॥तेष्वग्निं निदधाति। तेषु संभारेष्वग्निं निदधाति स्थापयति॥ ॥उद्धृतावो
क्षिते दक्षिणां प्रतिप्रस्थाता उद्धृतावोक्षिते रत्निमात्रे चतुरश्रे खरे दक्षिणमग्निं निदधाति। स्मार्ताः पं
चभूसंस्काराः प्राप्नुवंत्येव॥ तेषामन्यार्थत्वात्॥ उद्धृतमु खनं। अवोक्षितमभ्युक्षणं॥ एतत्संस्कार
द्वयमत्र विधीयते। केचित्स्मार्तानामनुपलक्षणार्थमुद्धृतावोक्षितग्रहणमिच्छंति। तत्रैकेनोपलक्षण
सिद्धेरितरवैयर्थ्यं स्यात्। अतोऽधिकविधानमेवेदमिति॥ अग्निहोत्रदर्शपूर्णमासादावुपलक्ष
णं विनापि स्मार्तानां संस्काराणां सर्वैर्दृष्टत्वाच्च॥ ॥उपयमनीरुपनिवपति। अग्निनिधानांतं
तरमुपयमनीरग्नेरुपयमन उपयुक्ता मृत्तिकाः सिकता वा उपनिवपति। उपसमीपे अग्नेर्नीचैः
प्रक्षिपतीत्यर्थः। प्रतिपत्तिरियं। चरितार्थत्वात्॥ एतद्विधानाधानाद्युपमन्थुपनिवपनांतं सर्वं सोमि

५२

॥ २२ ॥
॥ देवया० ५

कंधर्मजातमंत्रमवत्सेवा। सर्वेषु शाखांतरसूत्रेष्वत्रैव तस्योपदिष्टत्वात्॥ प्रणीताद्यतः। अतोग्निनिधनादनंत
रं प्रणीतादि प्रणीताप्रणयनादिकर्म भवति॥ अत्र कर्कमतिते चोदकपरिश्रा स्यात्ततः पूर्वमेवाग्न्यन्वाधानशाखाछे
दनादि षड्वर्गोपाकरणांतमुभाभ्यां कर्त्तव्यं। तत्र शाखाछेदनानुमार्जनशाखापरिवासनमुभयोः। उपवेश
करणमध्वर्योरेव॥ न प्रतिप्रस्थातुः ततः शाखायां पवित्रबंधनमुभयोः॥ वत्सापाकरणमुभयोः। वरुणा
यभागामित्यध्वर्योः॥ मरुद्भ्यो भागामिति प्रतिप्रस्थातुः॥ शाखोपगूहनं द्वयोः॥ अत्र प्रणीतादीसुपदेशाद्ब्रह्मवर
णा वैकल्पिकव्रतग्रहणांते पूर्वं कर्त्तव्यमिति प्रतीयते॥ ॥व्रतोपायनं वाऽकृतं चेत्॥ पूर्वदिने व्रत्याशतानंत
रं वा ब्रह्मवरणोत्तरकालं वा चेद्यदि व्रतोपायनमकृतं। कृतं चेन्न भवति तदा अतोग्निनिधानानंतरं तत्कृत्वा
प्रणीताप्रणयनादि तत्कर्त्तव्यं। अत्राह पितृभूतिः। व्रतोपायनं पूर्वं ततः प्रणीतादि। पयसे च पक्षोंगीकृतः। प्राक्प्र
णीताप्रणयनाद्व्रतोपायनमिति प्राप्तस्यैव स्मरणार्थमिदमिति॥ तदेतन्नोपपद्यते। वैकल्पिकानामादा
वनधारितत्वात्॥ पयसा च ब्रह्मवरणोत्तरकालता व्रतोपायनस्य निद्धारिता॥ तस्मात्तदुत्तरकालीनानांप
दार्थानां व्रतोपायनमंगं। तेषु च वेदिकरणादिषूपकृष्टेषु तदंगस्यापकर्षेपि वल्पेवा। ततस्तत्रैव व्रतो
पायनं भवति। नात्रेति॥ तस्मादिदमपूर्वकालांतरविधानं। व्रतोपायनस्य वैकल्पिकं। पूर्वेद्युरुत्तरवेदिछे
दनांतकरणपक्षे शाखाछेदादिवत्सापाकरणानमपि पूर्वेद्युरेव कर्त्तव्यं। तत्र वत्सापाकरणं रात्रौ। पयोवि

॥ २
॥ ७

कारत्वात्पयस्ययोः। तथाचाहापस्तंबः॥ अग्नीनन्वाधाय पृथक्शाखे आहरतस्तथेध्मं बर्हिषी मारुत्याः प्रति
प्रस्थाता वत्सानपाकरोति वा प्या अध्वर्युः शमीमय्यौ हिरण्याध्वैपुौ वा स्रुचौ भवति पश्चादेव तत्सायंदोहो
दोहयतः सद्य स्काला वा वरुणप्रघासः। एवं सति लौकिकेनदधा आपिक्षा कर्मस्यात् आतद्धेहि विकारमेक आ
मिक्षा पयः समाहुरिति॥ ॥नित्येभ्योधिकोन्यैंद्राग्नः पयस्येवारुणी मारुती कायएककपालः॥ अत्र प्रणीता
प्रणयनानंतरमुपयुक्तानि पात्राणि आसाद्य पहितपात्रीकरणादि क्रियते। तत्रहवींष्याह नित्येभ्यः आग्ने
यादिभ्यः पंचभ्योधिकानि एतानि हवींष्यत्र भवति॥ तत्र षष्ठं हविरैंद्राग्नो द्वादशकपालः पुरोडाशो भवति। त
तो वारुणी वरुणदेवतामारुती मरुद्देवत्या एते द्वे पयस्ये भवतः अध्वर्योर्वारुणीपयस्यासप्तमं हविः प्रतिप्र
स्थातुर्मारुतीपयस्या एकं हविः। ततोध्वर्युरष्टमं हविः काय एककपालः पुरोडाशो भवति। अयं चोपांशुर्भव
ति॥ एककपालत्वात्॥ एककपालाश्च वारुणा इति प्रागुक्तत्वात्॥ सावित्रश्च नित्ये पूपांशु। एवं च द्वे हविषी अत्रो
पांशु भवतः। द्वेद्वे रूपोरिति श्रुतेः। कशब्दोऽकारांतः प्रजापतिदेवतायावाचकः॥ को देवता अस्येत्यर्थे कस्ये
दिति सूत्रेण कशब्दादणप्रत्ययः॥ तद्योगे कशब्दस्य इकारो तादेशः॥ अचो ञ्णितीति वृद्धिः। आयादेशः॥ का
यः पुरोडाश इति रूपं॥ अतश्चात्र संप्रैषादौ कायानुब्रूहि इदं कायेति चतुर्थ्यंतं रूपं भवति॥ ननु कस्मा इति
महानाम्न्ये पदमंजर्यां च दर्शितं॥ तथा चापस्तंबः कायानुब्रूहि कं यजेत्येककपाले संप्रैषाविति। एवमष्टौ ह
वींष्यध्वर्योः॥ एकं प्रतिप्रस्थातुरिति॥ अतश्च प्रतिप्रस्थातुरपि तदुपयुक्तपात्रासादनादि सर्वं भवति। अथैता

॥२३॥
॥ देवया ०५

न्सेव पंचहवींषि भवति अथैंद्राग्नो द्वादशकपालः पुरोडाशो भवति ॥ उभयत्र पयस्ये भवतः । वारुण्युत्तरा भव
ति मारुती दक्षिणा ॥ अथ य एककपालः पुरोडाशो भवतीति श्रुतत्वात् ॥ अत्राहापस्तंबः ॥ निर्वपणकाले आग्नेयम
ष्टाकपालमिति नवोत्तराणि हवींषि निर्वपति सर्वे यवा भवेस पिवा पोल्लः करंभपात्राणि मेषावितियवानां व्रीहि
णामितराणीति ॥ नानाज्यानिर्वपणौ कर्तव्यौ देशभेदात्तत्रभेदे सत्यपि गार्हपत्यस्य साधारण्येनाज्यस्य पत्न्यवेक्ष
णं तंत्रेण भविष्यतीति शंकानिवृत्त्यर्थमिदं सूत्रं दाक्षिणां प्रतिप्रस्थातुः प्रतिप्रस्थातुनाज्यं दक्षिणं भवेत्सध्व
र्येराज्यात् ॥ वचनोक्तेमुत्तरमित्यस्यापवादो वचनात् ॥ अतश्च मारुत्या आधिश्रयणादि वारुण्या दक्षिणत
एव कर्तव्यं वारुण्युत्तरा भवति मारुती दक्षिणेति वचनात् ॥ आज्यनिर्वापानंतरं यथास्वदोहौ ॥ प्रथममध्व
र्युः पश्चात्प्रतिप्रस्थाता ॥ तत्रोपसृष्टां भव्रताग्नीधुस्वेत्यादीन्प्रैषान्स्वयमेव कुर्यात् ॥ भिन्नकालत्वेन प्रसं
गसिद्धेरभावात् ॥ तथा च काठके अध्वर्युरेव संप्रैषान्मारुतीवर्जमिति ॥ आपस्तंबोपि युगपत्कालत्वान्नि
गदंस्साधारयापाद्व्याश्वसंस्कारानध्वर्युरिति ॥ ॥ ध्रुवायाः पुरस्तात्पृषदाज्यमाज्यं दधिमिश्रं पंचगृहीतं
ज्योतिरसीति समिदं तेन ॥ विश्वेषां देवानां समिदित्येव मंत्येन मंत्रेण गृह्णाति ॥ पृषदाज्यशब्दस्य प्रति
वृत्तौ तच्चूर्यमेव पर्यायपदानेन तं व्याचष्टे ॥ आज्यं दधिमिश्रमिति ॥ दध्ना मिश्रं आज्यमेव पृषदाज्यमित्यर्थः ॥
अत्र दध्नो मिश्रणश्रवणान्न तस्य प्राधान्यं ॥ प्राधान्यं त्वाज्यस्यैवा दध्ना तु तस्य पृषत्त्वो विचित्रता कर्बुरता
क्रियते ॥ अतो गुणभूतं दधि ॥ प्रयोजनं केवलेन घृतेनानुयाजेषुहृतेते तु नावृत्तिः अत्रापि ज्योतिरसीति ॥१३
॥१४॥

मंत्रः सिद्धो त्रिवप्रियोऽन्यः प्रकृतिवत्। अनुयाजार्थस्याज्यप्रकृतावेव दृष्टत्वात्॥ ज्योतिरसि विश्वरूपमिस
त्रैववाक्यस्य परिसमाप्तत्वात् समिदं ते मंत्रो न प्राप्नोति तेन समिदं तेनेत्युक्तं॥ न चात्र यमादिना पूर्वंतिद्ध इति
न्यायः॥ अप्रकरणस्थत्वात् इति। चतुर्गृहीते जुह्वां चोपभृति च गृह्णाति पंचगृहीतं पृषदाज्यं। ज्योतिरसी
त्यादिश्रुतेः अतश्चात्र जुह्वामुपभृति च चतुर्गृहीतं पंचगृहीतं पृषदाज्यं ध्रुवायां चतुर्गृहीमिति॥ तदुक्तं चतु
रत्यत्र प्रतिविभागादिति॥ ॥ अनुयाजार्थं सर्वत्र। पदेतत्पृषदाज्यस्य ग्रहणमुक्तं॥ तत्पृषदाज्यं किमर्थमि
त्याकांक्षायामाह। अनुयाजार्थमेतदत्र पृषदाज्यं भवति॥ न केवलं अत्र॥ किं तु सर्वत्र यत्र कुत्रचित्पश्वा
दौ पृषदाज्यं तत्रानुयाजार्थमेव भवति॥ तथा च पाराशो॥ अथ पृषदाज्यं गृह्णातीति प्रकृत्य तेनानुयाजेषु चे
रतीति श्रुतं। तेन तत्पृषदाज्येन अनुयाजाः कर्तव्या इत्यर्थः। अतश्चाश्वध्यामुपभृति पृषदाज्यं ग्राह्यं॥
अनुयाजार्थद्रव्याधारतयात्तस्याः प्रकृतौ दृष्टत्वात्॥ प्रयाजार्थं च चतुर्गृहीतमाज्यं ततोऽन्यस्या ग्राह्यं॥ अ
न्यथा संकरः स्यादिति॥ औपभृतासादनं॥ अस्य पृषदाज्याधारस्योपभृत उपभृत्संबंध्यासादनं भवति॥
घृताच्यस्युपभृदित्येतेन मंत्रेणेत्यर्थः॥ प्रकृतावेवमेव दृष्टत्वात्॥ प्रियेण धाम्नेति नाविशेषोपदेशात्॥
अथवा प्रियेण धाम्नेत्यनेन वा मंत्रेण पृषदाज्यस्यासादनं भवति॥ कुतः अविशेषोपदेशात्॥ यतोऽविशेषे
णायं मंत्र उपदिश्यते प्रियेण धाम्नेति यदन्यद्धविरिति। प्रकृतौ तिसृषु स्रुक्ष्वासादितास्वेतत्पठ्यते यदन्य

हूविरितिभवतिचपृषदाज्यंतोन्योन्यतू॥तस्मात्प्रियेणधाम्नेत्यनेनासादनमित्येवंप्राप्तेऽनेनैवसूत्रेणपरिह्रि
यते॥अविशेषोपदेशात्॥प्रियेणधाम्नेतिमंत्रेणपृषदाज्यस्यासादनंस्यात्॥नचात्राविशेषः॥अयंह्यन्यपशब्दः
गृह्णेतोनामेवहविषांमध्येआसादितस्यपुरोडाशादेरेववोचकोनहविरंतरमात्रस्य॥तस्मात्प्रकृतस्यौ
नापसोपभृतमेवासादनमितिस्थितं॥तथाचोक्तंमाने॥समानंसमार्जनमुपभृतः पृषदाज्यधान्याश्चेति॥
आपस्तंबोपि॥पात्रासादनेआह॥पृषदाज्यधानींद्वितीयामुपभृतमिति॥तथासंमार्जने॥उपभृत्पृषदा
ज्यधानीमिति॥तथावेद्यामासादनेपि॥उपभृ त्पृषदाज्यधानीमिति॥तथापृषदाज्यंजुह्वामानीय
पृषदाज्यधानीमुपभृतंकृत्वातेनानुयाजान्यजतीति॥अतःकर्ककल्पितंसर्वंनिर्मूलमित्यपेक्षणीयं
॥ ॥उत्तरंवापरकालत्वात्॥एतत्पृषदाज्यग्रहणंध्रुवायाउत्तरंवाभवति॥कुतःअपरकालत्वात्॥
ध्रौवाज्यविनियोगादपरकालेपश्चात्पृषदाज्यस्यानुजेषूपयोगः॥अतउपयोगक्रमेणध्रौवग्रहणा
नंतरंवापृषदाज्यग्रहणमितिशंकामात्रं॥ध्रौवात्पूर्वमेवाग्राह्यंनतुउत्तरं॥वचनाभावेग्रहणेतिवादिस्य
स्यबाधायोगात्॥नहिग्रहणेतावनुयाजार्थमाज्यंध्रुवायाउत्तरंगृहीतं॥किंतुपूर्वमेवाततोत्रापिपूर्वमेव
ग्राह्यं॥ ॥प्रतिप्रस्थातावाप्रतिप्रस्थाताप्यत्रपृषदाज्यंगृह्णातीति॥ ॥नवा॥अथवाप्रतिप्रस्थाता
पृषदाज्यंनगृह्णातिसस्रुचोरेवाध्वर्युःपृषदाज्यंव्यानयतेथयदिप्रतिप्रस्थातुःपृषदाज्यंभवतितस्मि

द्वेधा व्यानयत उतो तत्र पृषदाज्यं भवति स यदेवोपभृत्याज्यं तस्माद्द्वेधा व्यानयत इति विकल्पेन श्रुतत्वात्॥
अपदेशभेदात् प्रतिप्रस्थातुः समग्रं तंत्रस्य पृक्त्वाभावात्॥ ॥प्रणीतापत्नीसन्नहनाग्निमंथनाश्रुत
प्रत्याश्रुत प्रैषयजमानवाचनहोतृषदनवरणप्राशित्रांगुलिपर्वंजिनावांतरेडाभागापराग्न्यव
भृथान्न प्रतिप्रस्थाता॥ प्रणीताप्रणयनादीनवभृथान्सूत्रोक्तान्पदार्थान्प्रतिप्रस्थाता न करोति। तत्र प्रणी
तानां दृष्टार्थत्वपक्षे अध्वर्युक्लृप्ताभिरेव तस्यार्थस्य सिद्धेर्न पृथक् प्रणयनं। अदृष्टार्थत्वपक्षे तु प्रसंगन्या
यादेव भावः॥ पत्नीसंहनस्य पृक्तत्वात्॥ तच्च प्रोक्षण्यासादनादेः प्रैषार्थस्याध्वर्युकर्तृकत्वपक्षे पत्नीसं
नहनेऽध्वर्युणा कृते तत्कृते तानुकरत्वे न प्रतिप्रस्थातुर्यत्वाप्नोति तस्यायं निषेधः॥ अग्नीत्कर्तृकपक्षे तु द्विवारं
पत्नीसंहन्नहनस्य संभावनापि नास्ति। ततश्च कृत्वा चिंतेयं। अत्र ग्रंथपातः॥ अग्निमंथनं तु प्रतिप्रस्था
ता न करोति। तस्य पंचहविःसंबंधात्। प्रतिप्रस्थातुश्च तेषामभावात्॥ अत एव प्रतिप्रस्थातुः प्राकृतमेव ब
र्हिः न त्रेधा। नापि प्रस्तर इति॥ ननु पंचहविवामभावादेवानीकवत्यादिष्वपि वात्रापि मंथनस्याप्रवृत्तेः सि
द्धत्वात्सर्थः प्रतिषेध इति॥ अत्रोच्यते॥ वक्ष्यति महाहविषि॥ उत्तरवेद्यग्निप्रणयनमंथनपृषदाज्यं च वा
याप्रवदिति॥ अत्र मंथनं वरुणप्रघासवदित्यनेन वरुणप्रघासेष्वपि नित्येभ्यः पंचभ्योधिकानां ऐंद्राग्ना
दिहविषामपि मंथनसंबंधो ज्ञायते। तेन मारुत्यामपि मंथनं प्राप्नोति॥ तन्निवृत्त्यर्थमत्र प्रतिषेध इति॥

॥२५॥
॥देवयाज्ञि ५

अत एव श्रूयते। आसाद्य हवींष्यग्निं मंथतीति बहुवचनाद् ध्वर्युरेव मंथति न प्रतिप्रस्थातेति गम्यते॥ त
स्य हविर्वर्द्धत्वाभावात्॥ अत्र हरिस्वामिनः॥ ॥अग्निमंथनमातिथ्यायां धर्म्म विहितः॥ अत्रापि काला
दिसामान्यात्तदीया एव धर्माः प्रयोजनं च। आकुत्यै वा एतमजीजनत रसादिके॥ अतोत्रापि तदर्थमेव मंथन
पस्तदेव चानुवदति। अग्निं मथित्वानुप्रहृत्याभिजुहोतीति॥ एवं च सति वैश्वदेवसाकमेधेषु पशौ चानुप्रह
रणाभिहोमौ सेत्स्यतः॥ इतरथा तु तेषु मंथनमात्रश्रवणादनुप्रहरणाभिहोमौ वचनाभावान्न स्यातामिति॥
आश्रुतमाश्रावणं प्रत्याश्रुत मस्तु श्रौषडिति॥ तदुभयं न करोति॥ तस्मात्र प्रतिप्रस्थाताश्रावयतीति श्रुतेः॥ प्रे
षाहरत्रिरग्नये समिध्यमानायानुब्रूहीत्येवमादायः गता न पि प्रतिप्रस्थाता न करोति॥ तद्यात्किं च वाचाकर्त्तव्य
मध्वर्युरेव करोति न प्रतिप्रस्थातेति श्रुतेः॥ यत्किं च वाचाकर्त्तव्यमुच्चैः कर्त्तव्यं प्रैषादिरूपमित्यर्थः। तद्ध्व
र्युरेवेत्याश्रावणग्रहणमुच्चैः कर्ममात्रोपलक्षणं। अतश्चैव मंत्रकत्वस्य न निषेधः॥ प्रेषस्य प्रतिषेधात्॥ तथा
ध्वर्युरेवाहेत्यादिश्रुतेश्च॥ अतश्चैवमादिषद्ध्वर्युणा क्रियमाणं प्रसंगं न्यायेन दक्षिणवैहारिकस्यापि कर्मणि
उपकरोतीति तदध्वर्युरेव करोति॥ यत्तु नोपकरोति। तदुभौ कुरुत इति न्यायलभ्यमेवानुष्ठानमनुवदत्येवेति। प्रवि
तौ हि होतौ मयोपकार्यानुवचनं करिष्यतीति मुख्यत्वाद्ध्वर्युरेव प्रेष्यते। तत्संगोपजीवी तु प्रतिप्रस्थाता नैवि
ष्यति॥ नासंगिकत्वाद्देवे चाग्नये इत्येकवचनं कृतं। तं त्रिकैत्वे नूनमयोरग्न्योः सहविर्वस्यायां द्विवचनं स्यात्॥ ॥२५

अग्निन्त्वां समिध्यमानाभ्यांमिति। अन्येतु तंत्रत्वं मन्त्रां साउहं स्येतत्। तथा परिग्रहं परिग्रह्णीष्यामि बर्हिस्त्रोदृशि-
ष्यामीत्यादावपि तत्प्रतिवचनेनैव तंत्र मन्त्रोत्सेवके विरूहंहेति। प्रासंगिकत्वादप्यनुपपन्नं॥ अतएव च कृतानुकर-
एव प्रतिप्रस्थानेति वक्ष्यति। एतेनाग्निमग्नीत्संमृड्ढीत्यादेरप्यनूह्यत्वमुक्तं बोद्धव्यं॥ उभौ पूर्ववद्घारादिस-
दिस [redacted] प्रसंगनिवृत्त्यर्थं वचनमिति हरिस्वामि-
नः॥ अतएव वचनाभावे पूर्ववद्घारादिसंस्त्रामारादुपकारकमदृष्टार्थं सर्वमध्वर्युरेव भवति। न प्रतिप्रस्थातुः॥
तद्यथा कुलुकुदाहनन प्रणीताप्रणयनस्फोद्दक्षिहरण मार्जन पूर्णपात्रनिनयन श्रोत्लेपातर्पणकमपि वर्गसामि-
धानादिकं एतन्मूलमेव प्रणीतादिस्तत्रमपि॥ यजमानवाचनेनैव प्रतिप्रस्थाता न करोति॥ सपशुषु रेवति यज-
मान इति वाचयतीत्येतत्कृतानुकरतेया प्राप्तं प्रतिषिध्यते। होतृषदनमस्युत्तरस्यामेव प्रवृत्तो होतोत्तरस्यैव वेदे-
होतृषदन उपविशातीति श्रुतेः। वरणं होस्वरणं॥ एतदपि प्रतिस्थाता न करोति। अथाध्वर्युरेवाश्राव्य होतारं
प्रवृणीत इति श्रुतेः। संमर्शनं तु प्रतिप्रस्थातुरपि होत्राकर्तव्यं। सम्मृष्टस्योपवेशनं च॥ प्राशित्रमपि न प्रतिप्रस्था-
ता॥ अथाध्वर्युरेव प्राशित्रमवद्यतीति श्रुतेः। होतुरंगुलिपर्वणी अनक्तीत्येतदंगुलिपर्वांजनमपि न प्रस्थाता॥
अध्वर्युणैव कृतत्वात्॥ अतएवेअवांतरेडां होतुः पाणाववांतरेडावदानं च प्रतिप्रस्थाता न करोति॥ इडावदान-

॥२६॥
यदेवया॰ ५

उत्तरस्यापि पृथक्त्वात्॥ भागानपि षडवत्तब्रह्मयजमानभागादीन् प्रतिप्रस्थाता॥ अग्न्यनुगमनादिनिमित्तवशात्प्राप्तासु नैमित्तिकेष्टिष्वग्नयेऽग्निमत इत्यादिषु प्राप्तानां भागानामेष प्रतिषेधः॥ अथवाऽवांतरेडाभागैकमेव पदं॥ अवांतरेडारूपं भागमध्वर्युरेवावद्यतीत्यर्थः॥ एतच्चैवं साधुतरं॥ तथा अपराग्निहोमान् पत्नीसंयाजदक्षिणाग्निहोमान्न प्रतिप्रस्थाता॥ अथाध्वर्युरेव प्रतिपरेत्य पत्नीः संयोजतीत्येवकारकरणात्॥ अवभृथमपि न प्रतिप्रस्थाता॥ तस्य वारुणीष्ट्युपसाध्यत्वात्॥ अथास्यैव वारुण्यै पयस्यापेक्षायं कृषमिश्रमादायावभृथं यतीति॥ ॥होतानुकरोऽन्यत्र दक्षिणस्या॥ ॥उक्तोऽन्यः प्रणीतादिभ्योऽन्यत्र अन्येषुदार्थेषु दक्षिणस्यां वेदौ प्रतिप्रस्थाता होतानुकरो भवति॥ अध्वर्युणा प्रथमं हुते तस्य पदार्थस्य केवलमनुकर्तैव भवति॥ हुतमनु पश्चात्करोतीति होतानुकरः॥ होतानुकर एव प्रतिप्रस्थातेति श्रवणा॥ ॥वाजिने निषिच्य॥४॥ उभयोः करीण्यावपति शमीपलाशमिश्राणि॥ प्रथास्वेद्वयोः पयस्ययोवाजिने निषिच्य पृथक्पात्रयोरवस्थाप्योभयोः पयस्ययोर्मध्ये शमीपलाशाश्रकरीराण्यावपति॥ शमीनाम कंटकी वृक्षः तस्य पर्णानि शमीपलाशानि॥ करीरोपि अपर्णः कंटकी वृक्षः तस्य फलानि करीराणि तयोरुभयोरेव करीराण्यावपति॥ तयोरुभयोरेव शमीपलाशान्यावपतीति श्रवणात् शमीपर्णानां करीरफलानां च तुल्यत्वं॥ ननु मिश्राणीति सूत्रेण पलाशानां गौणत्वं॥ सहप्रक्षेपार्थं तु मिश्राणीति सूत्रितं॥ तुल्यतायाः प्रयोजनं॥ पर्णावापविस्मरणे प्राक्पयस्यायागात्तान्युधं तएवा गुणाभावे घृतया॥

॥२६
॥५

नस्यादिति॥ वाजिने निषिच्यावयतीति ल्पवादेशात्तत्रस्थाभिघारात्प्रागेव निर्वापो यथास्वमेव॥ एतानि च
पयस्ययोः संस्कारकाणि॥ न प्रदेयद्रव्यभूतानि॥ अतश्चैषां प्रदेये द्रव्यधर्मा न भवंतीति॥ ॥मेषमिथुनं च॥
मेषमिथुने मेषमेष्योर्युग्मं तदपि यथास्वं पयस्ययोरावपति॥ तत्र विभागार्थं धर्ममाह॥ ॥मारुत्यां मेषं॥
अध्वर्युर्मरुत्यां पयस्यायां मेषमावपधाति॥ परिशेषात्प्रतिप्रस्थाता वारुण्यां मेषीमावपति॥ मेषमिथुनयोः
पुरोडाशधर्मित्वात्स्यापात्र्यामासादनं प्राप्नोति॥ वचनाच्च तत्पयस्ययोः क्रियते॥ ततश्च पूर्वं पयस्ययोरुप
स्तीर्य यथास्वं मेषमेष्योरावापः॥ पयस्ययोः प्राणदानानंतरं यथास्वं प्राणदानं च॥ प्रदेयधर्मास्तु तयोर्न वि
सेव॥ पयस्यावदाने न सह तयोरवदानविधानेन तद्द्रव्यप्रदेयतानिश्चयात्॥ एष वै प्रत्यक्षं वरुणस्य पशुर्यन्मे
ष इति मेषस्य वरुणसंबंधित्वश्रुतेश्च॥ ॥सर्वाणि हवींष्युत्तरस्यामासादयति॥ अध्वर्युराग्नेयादीनां तत्र
स्थाभिघारादिकपालोद्वासांतं कृत्वा मारुतीकरंभपात्रवर्जितानि सर्वाणि हवींषि आग्नेयादीन्यष्टौ कायपर्यं
तान्युत्तरस्यां वेदावासादयति॥ वाजिनं चोत्करे सादयति॥ स सर्वाण्येव हवींष्यध्वर्युरुत्तरस्यां वेदावासादयती
२स्यां तिश्रुतेः॥ ॥मारुतीं पूं सहाज्यां प्रतिप्रस्थाता दक्षिणां॥ प्रतिप्रस्थाता स्वकीयपयस्यायास्तत्रस्थाभिघारादि
वाजिनस्य प्राणदानांतं कृत्वा सहाज्यामाज्यस्थालीसहितां मारुतीं पयस्यां दक्षिणस्यां वेदावासादयति॥

सा २

॥२७॥ अथैतामेव पयस्यां प्रतिप्रस्थाता दक्षिणस्यां वेदावासादयतीति श्रुतेः। वाजिनं चोत्करे एव॥ करंभपात्राणां तु
॥वेवयानिद पुरोडाशधर्मकत्वात्तत्पात्राणां संमार्गोपस्तरणादिकं भवति। करंभपात्राण्याणामथभिघारणोपस्तीर्णापस्ती
र्णासु पात्रीषु निधानं प्राणदानं दक्षिणस्यां वेद्यामासादनालंभास्तूष्णीं भवंति प्रतिप्रस्थातृकर्तृकाः। अध्वर्यु
कर्तृकं निर्वापपक्षे घ्युकर्तृकाः मेषयोरपि यथास्वमपादानं तूष्णीं मंत्रे पावायथांगीकारं भवत्येवा समंत्रकप
क्षे च प्रियाव्यां धामन्नां प्रियं हितेन मंत्रेण पयस्ययोर्यथास्वमासादनं॥ यथास्वमेषयोरालंभः॥ संमार्जना
य प्रेषिते संमृष्टे प्रतिप्रस्थाता पत्नीमानेष्यन्नाह केन चरसीति। हविरासादनालंभोदकालंभांते ग्निमंथन
होतृसमंत्रणादिपूर्वाघारानंतरं संमार्जनाय प्रेषितेग्निसंमार्गार्थं प्रैषे दत्ते। संमृष्टेग्निसंमार्गे अन्ते प्रतिप्र
स्थाता गार्हपत्यसमीपे गत्वा करंभपात्रकोसार्थं पत्नीमानेष्यन् तां पत्नीं प्रति केन चरसीत्याहरति ब्रवीति
केन पुंसा सह त्वं चरसि किमनेनैव भर्त्राहो स्विदन्येनापीत्यर्थ इति हरिस्वामिनः। केन जारेण सह त्वं चरसी
ति मानवः॥ आसाद्य हवींष्यग्निमंथित्वानुप्रहृत्याभिजुहोत्यथाध्वर्युरेवाहाग्नये समिध्यमानायानुब्रूही
ति तामावे वेध्मावन्यां धत्ते उभौ समिधौ समिधौ परिश्रिंषं प उभौ पूर्वावाघारयतोथाध्वर्युरेवाहाग्निमग्नी
त्संमृड्ढीत्यसंमृष्टमेव भवति संप्रेषितमथ प्रतिप्रस्थाता प्रतिपरैति स पत्नीमुदानेष्यन्पृच्छति केन चरसीति श्रुते ॥२८
॥१

त्वात्॥ संस्तुता नाचष्टे॥ संस्तुता भर्तृव्यतिरेकेण ये संगताः परितेताः जारा इत्यर्थः॥ सा पत्नी प्रतिप्रस्थात्रा केन चर
सीति पृष्टा सती यैः सह चरति तान्संगतान् जारान्नाचष्टे एतावंतो मे जारा इति नाम ग्राहं वा कथयतीत्यर्थः॥ अमु
नामुना सह चरामीति नो वेत्त्रान्येनेति पितृभूतिः॥ ॥ तृणानि वोद्धृत्वाति प्रति स्वापं स्तुतं॥ यदि लज्जादिवशा
वा संस्तुतान् जारान् न कथयति तदा प्रति संस्तुतं प्रतिजारं तृणान्युद्धृत्वाति भूमिस्थाद्भूर्मे पूला त्रिः कास्योद्धृनि
गृह्णाति॥ प्रतिजारमेकैकं तृणोद्ग्रहणं॥ अनाख्यातमहितं ज्ञातिभ्य इति श्रुतेः। ननु जारस्याख्यानं तृणोद्ग्रहणं
वा कर्तव्यं न श्रूयते न दृश्यते तत्किमिति एतद्द्वयं कर्तव्यमुक्तं तत्र हेतुः अनाख्यातमहितं ज्ञातिभ्य इति श्रुतेः
[illegible] ॥ अनाख्यातजारसंगतिरूपं पापं पत्न्या अकथितं सत् ज्ञातिभ्यः पत्न्याः स्व
बंधुभ्योऽहितं अनिष्टकारि भवति यत एवं श्रूयते॥ अतः पत्न्या जारकथनं तृणोद्ग्रहणं वाऽवश्यं कर्तव्यमित्यर्थः
सपत्नं प्रति जानीत ज्ञातिभ्यो ह्यस्मै तद्धितस्योदिति श्रुतेः। सा पत्नी यत् यदि पृष्टमर्थं न प्रतिजानीत न प्रति ब्रूयात्
तत्तदा अस्यैव षष्ठ्यर्थे चतुर्थी अस्याः पत्न्याः ज्ञातिभ्यो बंधुभ्योऽहितमनिष्टं स्यात्। तस्माद्वसुतो विद्यमाने व
तमाचक्षीते चेति श्रुत्यर्थः॥ तथा च मानवो प्रतिप्रस्थाता गार्हपत्यां ते पृच्छति पतिकृतिते कांता यदि मिथ्या व
क्ष्यसि प्रियतमस्ते सख्यास्पतीति यं निर्दिशेत्तं वरुणो गृह्णात्विति ब्रूयादिति॥ काठके च॥ प्रतिप्रस्थाता पत्नी
माह कति ते कांता इति सत्यं वदेभिर्दिष्टांस्तान्वरुणो गृह्णात्विति॥ तैत्तिरीयकेपि। पृच्छति कति ते जा।

॥२८॥
देव०

राइतिपातौचेष्टेतान्वरुणोगृह्णात्विति निर्दिशति यज्जारंसंतंनब्रूयात्प्रियंज्ञातिसंरुध्यादसौमेजार इ
ति निर्दिश्येवैनंवरुणपाशेनग्राहयतीति विस्रोतेइति ॥ आख्याते प्रघासिन इत्येनांवाचयति न पत्न्या
आख्याते पत्न्या असौमेजार इति प्रतिवचने दत्ते नृणोक्तो हूपो वा तेनोचेष्टौर्व्यतिरेके ग्रानकेना
पीकेन स्वचनवेत्याख्याते प्रघासिनो हूवामहत्यनुमंत्रयमेनां पत्नी प्रतिप्रस्थाता वाचयति प्रघासिन
इति श्रुतेः ॥ अस्याश्च पुरोनुवाक्यास्थानीयत्वाद्यथा पुरोऽनुवाक्ये वमेषैतयैवैनानेतेष्वः पात्रे
प्योक्षयतीति श्रुतत्वात् तेतश्च करंभपात्रहोमे मरुतां देवतात्वात्तेनेदं मरुद्भ्य इति त्यागः ॥ करंभपात्रा
पि जुहोति शूर्पेण मूर्द्धनिकृत्वा दक्षिणेग्नौ प्रत्यङ्मुखी सती दक्षिणेग्नौ मूर्द्धनिकृत्वा नरत्निकस्योप
रि शूर्पं निधाय शूर्पेण जुहूस्थानोपन्नेन करंभपात्राणि जुहोति यद्ग्रामे.य दरेण्यइ तिमंत्रेण ॥ अथ वा
जायापती पत्नीयजमानौ करंभपात्राणि जुहोतो नैकाकिनी पत्नी ॥ किंकृत्वा उपस्तारसवीवधानं
द्विरभिधारणसंस्कृतानि शूर्पस्थानि करंभपात्राणि वितानं दक्षिणेन ब्रह्मयजमानयोरग्नेश्चांतरेण
ग्न्योः पुरस्ताद्दक्षिणामाहृत्यानीयतीर्थेन चात्वालोत्करांतरेण प्रवेश्य वेदिं चात्वालयोरंतरालेन
पूर्वेणोत्तरवेदिं दक्षिणस्याग्नेः पुरस्तादाहृत्य ॥ अथवा तीर्थेन प्रवेशनानंतरमुत्तरमुत्तरांवेदिमपरेण ॥

जायापतीवादक्षिणेनाहृत्य तीर्थेन पूर्वेण वेदि
न परेण वा यद्ग्राम इति ॥ पत्नी प्रत्यङ्मुखी हु

वानीयवेद्योरंतरालेनदक्षिणस्याग्नेःपुरस्ताद्गानीजुहोतीतिपत्नी॥ सावैदक्षिणेग्नौजुहोतीतियद्ग्रामइतिश्रु

य तेः॥ शाखांतराज्ज्ञायापत्नीजुहुतइतिवाहोमेमंत्रपाठउभयोःप्रयोगश्चपूर्वसूत्रेप्रोक्तः॥ अत्राहापस्तं

बः। अंतरावेदींगत्वायजमानःपत्नीचोत्तरेणवोत्तरांवेदिमैषीकेशूर्पेकरंभपात्राण्योप्यशीर्षन्निधि

धायपुरस्तात्प्रत्यंचौतिष्ठंतौदक्षिणेग्नौशूर्पेणजुहुतोमोषूणाइंद्रियंयजमानःपुरोनुवाक्यामन्वाहयज्ञ

नरसुभोपाज्यामक्रन्कर्म[illegible]कर्मकृतइतिप्रतिपरापतोपिवाध्वर्युःप्रतिप्रस्थातावाजुहुयाद

स्याग्नेर्वादक्षिणमग्निंपुरस्तात्प्रत्यंचाववतिष्ठेतेशूर्पंशिरसोरवधायमोषूणाइइतियजतियजमान

उत्तरत्तिष्ठन्यद्ग्रामेयदरण्यइतिजुहुतःशूर्पेणकरंभपात्राण्यक्रन्कर्मकृतइतिजपतियजमानउत्तरति

ष्ठन्यद्ग्रामेयदरण्यइतिजुहुतः॥ शूर्पेणकरंभपात्राण्यक्रन्कर्मकृतइतिव्युत्क्रामतइति॥ ॥काठकेच॥

तानिशूर्पेणशूर्पहस्तापत्न्यादित्यमुपतिष्ठतेनमस्तआतानेत्यंतर्वेदिंगच्छतीतिअपरेणविहारंपरिक्रम्यदक्षि कम

णेनवेद्यंतेनगत्वापूर्वेणदक्षिणमग्निंप्रत्यंचौतिष्ठतोपत्नीयजमानौशूर्पमन्वारभ्यजयंप्रधास्यामि

मे तिद्वियज्ञेणाइतिहुत्वोक्रनीतिजपित्वायथार्थंप्रव्रजतइति। करंभपात्रेनिर्वपणंध्वर्युणाकृतंचेत्तदा

ध्वर्युरेवस्वाज्याशूर्पेउपस्तारंकरंभपात्रावधानंद्विरभिघारणानिकृत्वाशूर्पंपत्न्याहस्तेर्पयति। प्रति

॥२९॥
॥देवया०५

प्रस्थात्रा वेदा[illegible]दितः स्रुतं तदात्रापि स एव । तदा आज्यमपि तदीयामवोपस्तारादौ । शूर्पस्य जुहूस्थानापत्यात् स्थाली
मासादनप्रोक्षणसंमार्जनप्रतपनप्रस्तरेसादनव्यूहनादयः सर्वे जुहूसंस्काराः कार्याः ॥ मो षूण इति यजमानो ज
पति ॥ त्यागानंतरं मो षूण इत्यमुं मंत्रं यजमानो जपति ॥ अथैंद्री महत्वती जपतीति श्रुतत्वात् ॥ अक्रन्कर्मेत्येनां वाच
यति प्रतिनयन् ॥ ततः प्रतिप्रस्थाता एतां पत्नीं प्रतिनयन्नकुरं भपात्रहोमदेशात्स्वस्थानं प्रतिनयन्नूसन्नू अक्रन्कर्मे
यमुं मंत्रं पत्नीं वाचयति तच्च तेनैव मार्गेपायेन पूर्वमानीता ॥ प्रतिशब्दसामर्थ्यात् ॥ अथैनां वोवयज्ञस्य क्रि
ति श्रुतत्वात् ॥ आगते संमार्जनाद्याज्यभागांत्यां ॥ पत्नीस्थाने प्रापयित्वा स्ववेदिंसमागते प्रतिप्रस्थाता
अग्नेः संमार्जनादिसंमार्गादारभ्य आज्यभागांत्यां आज्यभागांतं कर्म कर्त्तव्यं प्रतिपराणीयोदैतिप्रतिप्र
स्थाता सम्मृजेत्यग्निं संमृष्टेग्नौ ता उभावेवोत्तरावाघारावाघारावाघारयते ॥ अथाध्वर्युरेवाश्राव्य होतारं प्र
वृणीते प्रवृत्तो होतोत्तरस्यैव वेदेर्होत्रषदनमुपविशाकपविश्य प्रसौतीति ता उभावे च प्रसूतौ स्रुचावादायातिक्रामतो
तिक्रम्याश्राव्याध्वर्युरेवाह समिधो यजेति यजतेति चतुर्थे चतुर्थे प्र[illegible]याजे समानयमानो न वतिः प्रया
जश्चरतो ॥ अथाध्वर्युरेवाहाग्नयेनुब्रूहीत्याग्नेयमाज्यभागं ता उभावेव चतुराज्यस्य वदायातिक्रामतो ति
क्रम्याश्राव्याध्वर्युरेवाहाग्निं यजेति ता उभावेव वषट्कृते जुहोतो ॥ अथाध्वर्युरेवाह सोमायानुब्रूहीति सोम्यमा
ज्यभागं ता उभावेव चतुराज्यस्यावदायातिक्रामतो तिक्रम्याश्राव्याध्वर्युरेवाह सोमं यजेति ता उभावेवव ॥ ॥७

षट्कृते जुहुत इति श्रुतत्वात् संमार्जनाद्याज्यभागाभ्यामित्युक्तं । समत्जंत्वग्निमित्यत्र यजमानादिहेतुकवैपु
ल्ये बहुवचनं ॥ अग्निमित्येकवचनं देशभेदकृतस्याग्निभेदस्याविवक्षितत्वात् आघारावित्येककर्मत्वेपि प्र
योगभेदाद्द्विवचनं । अथाध्वर्युरेवेति देशकर्त्तृभेदादतंत्रत्वे सति प्रसंगात्सिद्धार्थस्य प्रतिप्रस्थातुरवरणं दर्श
यति । उत्तरस्या वेदेर्होतृषदनमुपविशतीति ॥ मुख्यत्वोभ्यासेनुवादः ॥ उपविश्य प्रसौतीति अध्वर्युरेकवचनेन
घृतवतीमध्वर्यो स्रुचमास्यस्वेत्यनेनैव ॥ प्रतिप्रस्थातुः प्रासंगिकत्वात् । ताउभावेव प्रसूतौ वत्रापि प्रासंगि
कः प्रवस्तस्यैवाभिप्रेतः ॥ अन्यत एवौभयप्रसवचनात्प्रसवमंत्रमूहंति ॥ घृतवती अध्वर्यू स्रुचावास्येथां देवमु
वौ विश्ववारे इति ॥ चतुर्थे चतुर्थ इति वीप्सार्थो विधीयते सकृदेव सर्वे समानस्य प्राप्तत्वात् ॥ ताउभावेवेत्यादि प्र
संगनिवृत्त्यर्थं ॥ अत्र वषट्कारानंतरमेव होमः सर्वत्र वषट्कृते जुहुत इति पुनः श्रवणात् ॥ ननु वषट्कारेण सह ॥ प
क्षांतरोपादानस्येतरपक्षनिवृत्त्यर्थत्वात् ॥ एवं आज्यभागांतं पृथोपदेशमुभाभ्यां कर्त्तव्यं ॥ स्रुक्पाणिरास्ते प्रति
तिस्थाता ॥ आज्यभागानंतरं प्रतिप्रस्थाता स्रुक्पाणिः स्रुचौ जुहूपभृतौ हस्ते कृत्वैवास्ते उपविशति । पाणावेव
प्रतिस्थाता स्रुचौ कृत्वोपास्त इति श्रुतत्वात् ॥ ॥ हविर्भिश्चरति ॥ ततोध्वर्युराग्नेयादिभिर्हविर्भिश्चरति । अथ
ध्वर्युरेवैतैर्हविर्भिः प्रचरत्याग्नेयेनाष्टाकपालेन पुरोडाशेन सौम्येन चरुणा सावित्रेण द्वादशकपालेन
वाष्टाकपालेन वा पुरोडाशेन सारस्वतेन चरुणा पौष्ण्येन चरुणैंद्राग्नेन द्वादशकपालेन पुरोडाशेनेति श्रुतत्वा

॥३०॥
॥देवपा॰८

ष ण

तु॥पयस्याप्रचरणकाले मेषौ तिहरतः।आग्नेयादिहविर्भिः रैंद्राग्नांतैः क्रमेण प्रचारे कृते॥पयस्याप्रचरँकाले आग
रे आपाते अध्वर्युप्रतिप्रस्थातारौ यथास्वं मेषौ व्यतिहरतः स्वस्वपयस्यामध्ये तौ निधत्तः स्थापयत इत्यर्थः॥अथै
तौभ्यां पयस्याभ्यां प्रचरिष्यंतौ विपरिहरतः स यो मेषो भवति मारुत्यां तं वारुण्यामवदधाति यामेषी भवति वारु
ण्यां तां मारुत्यामवधांदती ऋतत्वात्।अध्वर्युर्मेषं वारुण्यां कुर्यात् प्रतिप्रस्थाता मारुत्यां मेषीमिति॥ ॥अन्यत
रेणावदानेन सह मेषं स्रुच्यवदधातीति शेषः।अध्वर्युर्वरुणायानुगृहीत्युक्ता जुह्वामुपस्तीर्य द्वयोः पयस्यावदानयो
र्मध्येन्यातरेण प्रथमेन द्वितीयेन वा पयस्यावदानेन सह हृत्वे त्स्नं पयस्यावदानयोर्मध्ये न्यंतरेण प्रथमेन द्वितीयेन वा
पयस्यावदानेन सह तन्नमेषं जुह्वामवदधाति॥ततः सकृदभिघार्य वदानेन प्रतिभिघार्योत्थायातिक्रम्याश्राव्य
वरुणं यजेत्युक्ता वषट्कृते जुहोति॥अथाध्वर्युरेवाह वरुणायानुगृहीति स उपस्तृणीत आज्यमथास्ये वारुण्ये
पयस्यये द्विरवद्यति सोन्यतरेणावदानेन सह मेषमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त च वदाने
आतिक्रामत्यतिक्रम्याश्राव्याह वरुणं यजेति वषट्कृते जुहोतीति ऋतत्वात्॥आपस्तंब[illegible]रैंद्रापर्यंतैः प्रचर्या
रमेत्यध्वर्युरिथ प्रस्थाता पूर्वेण महावदानेन मारुत्याः सर्वं मेषीमवद्यत्युत्तरेण शमीपर्णकरीराण्यथ प्रच
यरिमत्यथाध्वर्युः पूर्वेण सहावदानेन वारुण्याः सर्वं मेषमवधत्युत्तरेण शमीपर्णकरीराण्य प्रचरतीति॥सव्येन स्रु
चौ गृहीत्वा प्रतिप्रस्थातुर्वो सोदक्षिणेन मरुद्भ्यो नुवाचयति।वारुणयागानंतरमध्वर्युः स्रुचौ सव्येन पाणिना।

॥३
॥५

सव्ये हस्तेन गृहीत्वा दक्षिणेन प्रतिप्रस्थातुर्वासो गृहीत्वा प्रतिप्रस्थातसंबधिवस्त्रमन्वारभ्य मरुद्भ्यो
नुब्रूहीत्यनुवाचयति सव्येपाणावध्वर्युः स्रुचौ कृत्वा दक्षिणेन प्रतिप्रस्थातुर्वासोन्वारभ्याह मरुद्भ्यो नुब्रूहीति
श्रौतत्वात्॥ वारुणीवदवदानं। वारुणीवदित्यन्यतरेणापयस्यावदानेन सह मेषीस्तु व्यवदध्यादित्यर्थः॥ उपस्त
पीतश्रा ज्यं प्रतिप्रस्थातास्यैमारुत्यैपयस्यायैद्वि[illegible]यति सोन्यतरेण वदानेन सह मेषीमवदधासथ्योपरिष्टादा
ज्यस्याभिघारयति प्रत्यनक्त्यवदानेऽअतिक्रामत्सथाध्वर्युरेवाश्राव्याह मरुतो यजेति वषट्कृते जुहोतीति श्रौतत्वा
त्॥ हविर्भिश्चरित्तउभौ स्विष्टकृत्प्र भृति कुरुत इति शेषः॥ अध्वर्युणा सवैर्हविर्भिः कापातैश्चरिते सत्युभौ
अध्वर्युप्रतिप्रस्थातारो स्विष्टकृत्प्रभृतिकर्मप्रकृतिवत्कुरुतः॥ अथाध्वर्युरेव कायेनैककपालेन पुरोडाशेन प्र
चरति कायेनैककपालेन पुरोडाशेन प्रचर्याध्वर्युरेवाहाग्नये स्विष्टकृतेनुब्रूहीति स वैषामेव हविषामध्व
र्युः सकृत्सकृदवद्यत्यथैतस्या एव पयस्यायै प्रतिप्रस्थाता सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयतस्तौ
उभावेवातिक्रामतोतिक्रम्याश्राव्याध्वर्युरेवाहाग्निं स्विष्टकृतेयजेति ता उभावेव वषट्कृते जुहुत इति श्रौतत्वात्
॥ ॥ इडामवदाय प्रतिप्रस्थात्रे प्रयच्छति॥ अध्वर्युरिडामवदायानभिघार्यैव प्रतिप्रस्थात्रे प्रयच्छतीति समर्प
यति॥ अथाध्वर्युरेव प्राशित्रमवद्यतीडां समवदाय प्रतिप्रस्थात्रेऽतिप्रजिहीते इति श्रौतेः॥ प्रतिप्रस्थात्रे अप
पयितुमिति शेषः॥ अतिप्रतिहितो जुहाज्ञु॥ प्रकर्षेणासेति॥ ॥ तत्र प्रतिप्रस्थाता मरुत्याः। तत्रस्यामेव समक

॥३९॥

''देवेयाजि

गोमामिजपां प्रतिप्रस्थाता माहत्वा द्विरवद्यति। उपरिष्टाद्द्विरभिघारणं त्वध्वर्युरेव करोति। तत्रापि प्रतिप्रस्थाता
मारुत्यै पस्थाये द्विरन्यवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिधारयत्कपद्रूपमार्जयंते इति श्रुतत्वात्। अत्रेडोपह्वा
नानंतरपूर्वमार्जनं। ततइडादिभक्षणं॥ उपद्रूपमार्जयंत इति श्रुतत्वात्। गृहमेधीयायामेव [illegible] श्रुतेः। पूर्वेमा
र्जनं नुपद्रूयेति सूत्रितत्वाच्च॥ स्रुचौ व्यूहतौ ध्वर्युः प्राशित्रेडादिभक्षणानंतरं धेन्वादिदक्षिणां दत्वोल्मु
के समासादिनानुयाजेध्वारानुयाजांते कृते अध्वर्युअध्वर्युप्रतिप्रस्थातारौ स्रुचौ व्यूहतः। अथाध्वर्युरि वाह
वेत्मन्प्रस्थास्यामि समिधमाधायाग्निमग्नीन्संमृड्ढीति सस्रुचौ रेवाध्वर्युः पृषदाज्यं वपानयात तथपदिप्राति
प्रस्थातुः पृषदाज्यं भवतीति तत्संद्वैधाव्यानयपनुतो। तत्र पृषदाज्यं न भवति सपाद्वोपभृत्साज्यं तत्संद्वैधाव्या
नयते ताउभौ वेवातिकामतो त्ति काम्पाश्राव्याध्वर्युर्वाह देवान्यजेति चतुर्थे चतुर्थे तु याजे समानयमानौ नव

स्या

भिरनुयाजैश्चरत इति श्रुतेश्चात्। ब्रेत्मन्प्रस्थास्यामीति प्रासंगिकत्वात्प्रतिप्रस्थातुरविवक्षेत्येकवचनमनुवाद एव
तंत्रपक्षेनुपस्थास्याव इति प्राप्ते वाचनिकमेवैकवचनं स्यात्॥ सस्रुचौ रेव जुहूपभृतोः पृषदाज्यं विभज्या
नयते। अतएव वचनात्पृषदाज्यस्यात्र प्राप्तिः॥ शाखांतरीया द्वेपृषदाज्येनानुयजेतीति। अथ यदि प्रतिप्रस्थातुः
पृषदाज्यमित्यपि विकल्पो तएव वचनाद्वा शाखांतरीयाद्वा। पजपतेत्ति पुनर्वचनं नियमार्थं। तेन पाक्षिकेस्प
देवान्यजेत्यस्य द्वितीयादिश्रुतिः। चरत इत्तित्रसंगनिवृत्तये अत्राहापस्तंबः॥ पृषदाज्यं जुह्वामानीय पृषदा

॥३९

भाटं

ज्यं [illegible] धानीमुपसृतंहृत्वातेननवोत्सृज्याजान्यजतीति॥तथाताउभावेवसादयित्वास्रुचौव्यूहतःस्रुचावास्युस्यप
धीत्सोमज्यपरिधिमभियथामन्त्रोव्याध्वर्युरेवाहेषिताहैव्याहोतारोम इवाव्यायेप्रेषितोमानुषःसूक्तवाकायेतिसू
क्तवाकंꣳ होताप्रतिपद्यतेथैताः उभावेवप्रस्तरौसमु यतउभावनुप्रहतउभौतृणोऽग्रपगृह्योपासातेयदाहोतासू
क्तवाकमाहाथाग्नीध्राहानुप्रहरेतिताउभावेवानुप्रहरउभावीत्मानाउपस्पृशेतेअथाहसंवदस्वेत्यगानग्नी
दंगच्छ्रावयश्रौषट्स्वगादैव्याहोतृभ्यःस्वस्तिर्मानुषेभ्यःशंयोर्ब्रूहीत्यध्वर्युरेवैतदाहताउभावेवपरिधीननुप्र
हरतउभौस्रुचौसंप्रगृह्यस्फ्येसादयतइतिश्रुतत्वान्नाताउभावेवेति॥स्रुग्व्यूहनेयदिस्रुक्संस्कारःस्यात्तउभौ
व्यूहतइत्यनुवादःचाप्रसंगनिवृत्त्यर्थंयदिवचनंतदाचपृषदाज्यवत्याव्यूहनंकार्यं॥संस्कारत्वेतुसतिप्रयोज
नवत्वान्संस्कार्यद्वितीयानिर्देशानुसंस्कारत्वैवावगम्यते॥उभावेवप्रस्तरौस पतउभावनुप्रहरतउभौतृणो
ऽपगृह्योपासातेइतिप्रतिपत्तेरप्रसंगादनुवादः॥समु पतः॥लुप्रच्छेदने॥समुच्छितःसमुत्क्षितइतियावत्॥
एवंतृणानुप्रह रणात्मालंभपरिधिप्रहरणास्फ्यसादनेपृथगनुवादोपद्रष्टव्यः॥स्रुचौव्यूहतोध्वर्युग्रहणंयज
मानव्युदासार्थंततोत्रयजमानोव्यूहनेपक्षेपिनकरोति॥स्फ्येसादयतइत्यनेनात्रपात्र्याएवहविर्ग्रहणंनाम
सइतिज्ञायते।पस्फोपात्र्यैस्फ्येतस्येतिश्रुतेः।स्फ्येपात्र्यांचेतिसूत्राच्चात्रअतएवस्फ्येसादयतइतिद्विवचनात्र
तिप्रस्थानुरपिहविर्ग्रहणमस्तीतिप्रतीयते।तच्चकरंभपात्रमेघ्यर्थमेघ्यर्थमेवानास्यासंभवात्॥हविर्ग्रहे

॥३२॥
॥देवयानि॥

णाभावेचतस्यदेशाएवनिधानंस्यात्तूनस्यष्यो इति॥ परिविभिःसहाध्वर्युस्तत्र उपवेषोपिहोतव्यः॥ प्रतिप्रस्थातु
सुनोस्येव॥ ॥समासिच्य वाजिनभक्षः॥ आत्मालंभोदकोलंभांतेस्रुग्विमोकांतेवा यथास्वं वाजिन [illegible]ग्व्या
घारणांतेहत्वास्रुक्स्त्रचैवाजिनत्रोषावेकस्यांजुह्वांसमासिच्यसंयाज्योत्तरस्या वेदेरुत्तरतः समीपेसमुप
पतेत्रैणवाजिनभक्षः स वै पूर्ववत्कर्त्तव्यः॥ तथा चापस्तंबः॥ उभौ वाजिवाभ्यां प्रवरतः शेषो समवनीयोत्तरे
विहारेपूर्ववद्भक्षयतीति॥ अध्वर्युविकारात्प्रतिप्रस्थाता भक्षेषु॥ प्रतिप्रस्थाता पाश्चिडा [illegible] भक्षेषु कर्त्ता अधिका
रीभवति॥ कुतः॥ अध्वर्युविकारात्॥ सत्यध्वर्योर्विकारः॥ तत्प्रदानस्यतेन क्रियमाणत्वात्॥ अतोध्वर्युपदार्थभ
वेदानंकुर्वन्नध्वर्युविकारो भवति॥ अतस्तद्दृब्धेप भक्षेष्वप्यधिकारी भवति॥ मैत्रावरुणाश्चहोत्र [illegible] ध्वर्युविका
रात्॥ पश्चो मैत्रावरुणो पिपुरोडाशेडापाश्चिडाभक्षेष्वाधिकारी भवति॥ कुहोत्रेध्वर्युविकारात्॥ होत्राविकारादध्व
र्युविकाराच्चापुरोनुवाक्याउच्चवनेनकिसहोतारंविकरोतिहोतृप्रेषणेनचाध्वर्युं॥ अतएतदुभयंकुर्वन्नु
भयविकारत्वाद्भक्षेष्वाधिकारी भवत्येव॥ समिष्टयजूंषि तूष्णींदक्षिणस्यां॥ अत्र पूर्ववेधालंभ पत्नीसंयाज
दक्षिणाग्निहोमवेदयोः क्रूविमोकावेदस्तरणांतेहृतेध्वर्युस्त्रीणि समिष्टयजूंषि समंत्रकाणि जुहोति॥ प्रति
प्रस्थातातु दक्षिणस्यां वेद्यां दक्षिणाग्नौ ध्रौवेणाज्येन तूष्णीमेव त्रीणि समिष्टयजूंषि जुहोति॥ अथाध्वर्युरु
वप्रतिपरेत्य पत्नीः संयाजयत्युपयुपास्तएवप्रतिप्रस्थाता पत्नीः संयाज्योदेत्याध्वर्युस्त्रीणि समिष्टयजूंषि

॥३३
॥श्रा

पि जुहोति तूष्णीमेव प्रतिप्रस्थातास्तुवं प्रगच्छता। इति श्रवणात्।। वारुणी निष्कासेण अवभृथं। वारुण्याः पयस्या
या। निष्कासो वारुणो निष्कासः तापवशाद्दग्धः स्थाल्यां तललग्नः पयस्याशेषः। तेनावभृथं कर्तुमपः प्रतियंतीति
स्यात्रे शेषः। पात्रे संसक्तः ह्रेष्यते विश्लिष्यत इति कषः।। क्षामश्चासौ कषश्चेति क्षामकषः। तेन मिश्रं हविरादायाव
भृथमुदकं यंति। ऋत्विग्यजमाना उदकसमीपं गच्छेयुरित्यर्थः।। अत्र च नाम्नासौमिकादवभृथाद्धर्मप्राप्तिः। त
त्रानेन निष्कासेण पुरोडाशस्य निवृत्तिः प्रत्याम्नानात्।। तेनात्र न साम गीयत इति तु एवं प्राप्तस्याग्निष्टुयतीति
साम्नः प्रतिषेधः। अतः सोमवदेवात्र सर्वं कर्त्तव्यं।। तेनात्र प्रथमं चात्वालसमीपे एवोरुं हीति वाचं।। ततो निष्का
साज्यस्थालीस्रुचस्य मिन्बहिं।। ऋतावदानस्य मपरिधानवस्त्राद्युपयोक्ष्यमाणमादाय चात्वालोत्करावंत
श्री रेणा निष्क्रम्योदकसमीपं गच्छंति।। तूष्णीमेत्याभ्यवेत्य मज्जय स्यवभृथेति।। तूष्णीमेव गृहोदयः प्रत्यागत्येत्य
नेनसा मन्त्रा नप्रतिषिध्यते।। अभ्यवेत्य तूष्णीमेवायः प्रविश्यति। अनेन वा यो वक्तुमणवाचेन प्रतिषिध्य
ते। ततश्च स्रुग्गृहीतग्रहणाद्यनुपाजांतरं शाकृतिका बडाकृतिकं वा स्विष्टकृदंतं कर्म कृत्वा निष्कासस्थाली
जलमध्ये मज्जयति वाचयति।। अवभृथेति मन्त्रेण।। तूष्णीमेवेत्याभ्यवेत्सोपकारयसावभृथेति श्रवणात्।।
जायापती स्नातौ मज्जेतौ स्थाल्या मज्जनानंतरं जायापती पत्नीयजमानौ। अमज्जतो मज्जने जले
मध्ये शिरसः प्रवेशनं कृउनमकुर्वतो स्नातः स्नानमाचरतः मज्जनप्रतिषेधेपि केनचित्पात्रेणांजलिना।

॥३३॥
॥देवयाज्ञि॥

जलमुद्धृत्सशिरः क्षालयत एव। तथा चापस्तंबः। अपः प्रणत्यसशिरस्कावनुयमज्जंतौ स्नातः पत्नीयजमानावि
ति। अथाप्य वेत्यस्नातइति सोमे श्रुतत्वात्॥ अन्योन्यस्य पृष्ठे धावतः शोधयतः अद्भिः क्षालयतः। अन्योन्यस्य पृ
ष्ठे धावयत इति श्रुतेः॥ अन्ये वाससी परिदधाते॥ स्नानानंतरं अन्ये वाससी परिदधाते॥ ततो जलमध्यान्निःसरतः।
तावन्ये वाससी परिधायोदेतइति श्रुतेः॥ पूर्वे धौते दधिकृतेभ्यो यस्मा इच्छेत॥ पूर्वेपर्वकरणसमये वैश्वदेवपर्वसंब
धिनी वाससी पत्नीयजमानाभ्यां परिहिते भूते ते वाससी अधिकृतेभ्योस्मिन्कर्मणि वृतेभ्यो ब्रह्मादिपंचभ्यो
स यस्मैकस्मैचिदिच्छेत्तस्मा एकस्मै ऋत्विजे दद्यात्॥ पूर्हते यस्मै कामयेत तस्मै दद्यादिति श्रुतत्वात्॥ यथेतमेत्याह
वनीये समिदाधानं देवानां समिदसीति॥ यथेतं यथागतं चात्वालोत्करावंतरेण तूष्णीमेवेत्य गृहमागत्य देवा
नां समिदसीति मंत्रेणाहवनीये समिधमभ्यादधानं करोति॥ तूष्णीमे[illegible]त्येनेनामहीयजपप्रतिषेधः॥ समिदा
धाने अध्वर्योरिति केचित्॥ पुनरेत्याहवनीये समिधमाभ्यादधातीत्येकवचनात्॥ समाख्यानात्॥ यजमानं
वैतपा समिधं इति लिंगाच्च॥ यजमान एवेत्य पत्नी च गार्हपत्ये तूष्णीमिति पत्न्याः समिदाधानविधानेन तत्सहचरि
तस्य यजमानस्यैतत्समिदाधानमिति प्रतीतेः॥ सर्वेषामृत्विजां सयजमानानामाहवनीय एतत्समिदाधान
मित्यपवोसयेनैव निष्क्रामति तेन पुनरेत्याहवनीये समिधमभ्यादधातीति श्रुतेः॥ अत्रागमनं बहूनां सुक्तोग
न्यच यत्समिदाधानमुच्यंते तदपि तेषामेवागमनकर्तृणां प्रतीयते॥ तथापस्तंबः एधोसीति समिधमाधायाह ॥३३
॥भा

हवनीयमुपतिष्ठत इति। एवमेव मानवकठसूत्रयोरपि अनयोक्षमाणा अयं ते समिधः संचिन्वा एधो धीत्यग्ने स
मिधमादधातीति काठके॥ ॥पत्नी [illegible] गार्हपत्ये तूष्णीं॥ पत्नी च तूष्णीं गार्हपत्ये समिदाधानं करोति॥ शाखांतरात्॥
नुः धेनुर्दक्षिणा॥ ॥अस्मिन्वरुणप्रघासपर्वणि धेनुर्वत्सा गोर्दक्षिणा नव[illegible]ति॥ अश्वः। अश्वः। अथवा अ
श्वो दक्षिणा॥ षट्॥ षड्॥ षड्गावो वास्मिन्पर्वणि दक्षिणा॥ ॥द्वादशगावा॥ द्वादशगावो वास्मिन्पर्वणि दक्षिणा॥ ॥
द्वादशगावो॥ द्वादशगावो वास्मिन्पर्वणि दक्षिणा॥ शाखांतरीया एते दक्षिणापक्षाः॥ अत्र मानवसूत्रे वभृथे विशेषः॥
आज्यशेषे समानीय स्रुकस्रुवमाज्यस्थालीमादचे प्रतिप्रस्थातु षमाग्नीध्रः स्रुवमध्वर्युरुरुं हि राजा वरुणश्चका
रेति वाचयति शतं ते राजन्नित्यवः परादश्चपतिष्ठंतो वभृथे प्रचरंति स्थावरासु तृणं प्रास्याप्सु जुहोत्यग्नेरनीकमिति
चतुर्गृहीतस्य स्रुवमाघारमाघारयत्यप बर्हिषः प्रयाजानुयाजान्यजसाज्यभागावन्यां प्रचर्येयनुवनिष्कषस्याव
दाय वरुणं यजेति शेषेणाग्नीवरुणौ स्विष्टकृत् तस्यानेतरं तासं निष्टत इति॥ ॥काठके च। वारुण्या निष्काषेणा
वभृथं पेस्कंद वेधा चं उरुं हि राजेति द्वाभ्यां स्थावरमुदकं गत्वा तस्य पश्चादुप[illegible]विश्याग्नेरनीकमित्यप्स्वाधा
रमाधारयति तृणो वा रुपि वा शेषं चतुरोप बर्हिषः प्रजोयोन्यजसाज्यभागाविष्वा निष्काषस्यावदाय वरुणं य
६७ जेत्यग्नीवरुणौ स्विष्टकृन्मेणोत्तरा अनुयाजा इष्टा देवो यजेति प्रथमस्य संप्रेषु आ यंति यथापशुबंध इति॥ आ
पस्तंबो पि॥ पूर्णं वजं पूर्ववदिष्टं संस्थापयतीति पूर्णपात्रस्य स्थाने सौमिको वभृतश्चतुर्गृहीतान्याज्यानि वा

॥२४॥
॥देवयानि॥

रण्ये निष्कासेपानुषैश्चावभृथमभ्यवयंति तुषाश्च जीषधमलिमं तेवारुणमेके द्रुपालमेके समामनंति नायुदनानि
प्रजन मंत्रेन सामगायति ॥ सर्वादिशोवभृथगमनयाम्नानं नोदाचीरभ्य चेयादित्येके यां दिशं गच्छेयुस्तथा मुखाः
प्रचरेयुरित्येके वहंतीनांस्यापा वेराश्रम वेसास्तदभा वेयथाकाम्युदकांतेस्तरणातां वेदिहोत्वा तस्याहवीपिस्याद्
यस्य पिवान वेदाशतं तेराजान्निप्रज: सहस्रमित्यपोदष्ट्वाजयति चिनोवरुणस्यपाशइत्युदकांतमितिष्ठं तोपिः प्रगा
स्यातिष्ठतोवभृथेन चरंति तस्यां प्रहत्यस्त्रोचमाघारमाघारयतिपदिवापुरा तस्यांस्यात्तस्मिन्जुहुयात् ॥ अग्नेर्नीदय
स्त्रिः संमृ द्वीतिसंप्रेष्यत्यापो वाजयति तोवाजेवःसरिष्यंतीवां जंजष्यतीवाजिनीवाजिन्नितोवाजति त्मायेसंमा
र्ष्यपां अनादाश्चन्नाधायेतिमंत्रं संनमस्यग्नेरसानीकमयश्चाविवेशेति स्तुचमाघारयति वागस्याग्नेपीत्सनु
मंत्रयतेयजमानोलुप्येत प्रवरानयबर्हिषः प्रयाजानिष्ट्वा स्तुमंतोवान्यभागोयजत्यप्स्वग्नइत्येषास्तुमते ब
ओरित्यस्तुमंतोनिष्कावस्यावदायवरुणामि हुत्वा निष्काषमवदायाग्नीवरुणौ स्विष्टकृदर्थे यजति नोत्तरं
त्रिःपतेःपिवौ पत्न्यस्तुक्षामानीयापबर्हिषावभृथातोयजति देवौ यजेति प्रयमेसंप्रेष्यति यजेत्युत्तरमितिदूरि
स्वामिनापिदशाऊतिपक्ष एतावंतःपदार्थाः त्रीपं तरस्तुतमस्ति ॥ षडाऊतिपक्षेतु यथास्तुतमितिज्योतिष्टो
मात एव प्रकटीकृत्यवक्ष्यते ॥ अवभृथादागत्यस मिदाधानानंतरमुजपोबर्हिर्होमिः ॥ प्रणीताविमोकोध्वर्योः॥
राक्षसभागउभयोः ॥ इतिप्रस्यातुर्मपीकरभपाश्चेकरणपक्षौ ॥ पूर्णपात्रेनिनयमध्वर्योः ॥ रंतरालेविस्तुके ॥२
वेद्यो १ ॥भ

मा इत्याध्वर्यणेपमुच्यते। वेदिद्वयस्याथ वेद्यपामग्न्योश्चा। औत्स्नेणः कर्मापि वर्गाधानाद्येकस्मिन्नचोत्तरवेदिकोत्त
दते यजमानस्य वपनं॥ ततोग्नी गार्हपत्याहवनीयौ समारोह्याग्निहोत्रशालायामागत्य गार्हपत्यं मथित्वा मथित्वा
पौर्णमासेष्टिः सद्य एव कर्तव्या। अथ केशश्मश्रूत्वा समारोह्याग्नी उदवसाय वक्ष्यते न यत इति प्रक्रम्य गृहानि
त्वानिर्मथ्याग्नी पौर्णमासेन यजत इति श्रु। तत्वात्॥ तथा चापस्तंबः॥ पौर्णमास्ये ह्यौदनादि पूर्ववन्निवर्त्तन
सर्ववावाप यदि स्नुत्को हा। अपि वा स्नात्वो केशश्मश्रू रण्योरग्नी न समारोप्योदवसाय निर्मथ्या पौर्णमासेन
यजते यः सोहवा एष यद्वहण प्रघ्यासानस्य चकल्पते यदुत्तरवेद्यामग्निहोत्रं जुहुयादिति वाजसनेयकमिति। स
माप्यनंतरमग्निहोताधमुत्तरवेद्यामुद्धृत्य होमे अयं दोषः। समाप्यप्रागग्निहोत्रकालश्चेद्वा दीयाति तदाउ
त्तरवेदावेवाग्निहोत्रं होतव्यं। तदाहापस्तंबः॥ प्रणीते चेदग्निहोत्रस्य काल एतस्मिन्नेवाग्निहोत्रं जुहुयादेवम
न्यत्रापित्रकोतो इति पशुबंधप्रकरणे॥ ॥ शुक्रावरुणप्रघासाः॥ ॥ अथ चातुर्मास्यानां तृतीयं पर्वसाकमेधा
रव्यं वक्तुमादौ तस्य कालमाह॥ ॥५॥ कार्त्तिक्यां पू॰ साकमेधा द्व्यहं॥ कार्त्तिक्यां पौर्णमास्यां द्व्यहं साकमेधा
भवंति॥ द्वयोरह्नोः समाहारो द्व्यहः॥ तद्धितार्थ इति समासः॥ राजाहः इत्यादिना ट॰ नून संख्यादेः समाहार इति
अह्नोह्नादेशप्रतिषेधः॥ कालाध्वनोरत्यंतसंयोगे इति द्वितीया॥ द्व्यहे अहनी द्वे तेने व्याप्य साकमेधा भवंतीत्य
र्थः॥ स वै द्व्यहमनूचीनाहं यजत इति श्रुतेः। द्व्यहमिति पूर्ववत्॥ नूचीनं नैरंतर्येण वर्त्तमानमहरनूचीनाहं

राजाहः सखिभ्य इति टच् समासांतः। अनूचीने अनुगते अनुलग्ने अहनीयस्मिन्नद्यहे सोयमनूचीनाहः तत्रग
त इति श्रुत्यर्थः॥ कार्त्तिकीशब्देनात्र गौण्या वृत्त्या प्रतिपदुच्यते। अनुमुखे अनुमुखे चानुमास्यपर्वजेत इत्युक्तत्वात्प्र
तिपदश्चातुर्मुखत्वाच्चा तस्माद्वाएतेश्चतुर्थे मासि यजत इति चतुर्मासोपलक्षितापकालः साकमेधा इति वक्ष्यमाणस्य
कर्मणो नामकेधेयं॥ तदव्ययानूतयागवेऊत्वापेक्षं च नाग्नि वेऊ वचा नानामचेचसव्यवहारार्थं॥ मासंसाक
मेधैरिति साकमेधादर्शपूर्णमासवदिति चानतु पूर्वेद्युः पूर्वाह्णे इत्याद्युक्ता प्रातर्दुऊचेति वक्ष्यमाणपर्यालोच
येव द्येहकालतासिद्धेर्न वाच्यद्येहमिति। उच्यते॥ पूर्वेद्युः क्रियमाणानामनीकवत्सादीनामपि साकमेधसंज्ञा
यथा स्यात्॥ न महाविषयत्वा। एतदर्थं द्व्यहमित्युक्तं॥ ॥पूर्वेद्युः पूर्वाह्णेग्नयेनीकवते पुरोडाशः॥ पूर्वे
द्युरिति महाविषः कालात्प्रतिपदः पूर्वदिने पंचदश्यां पूर्वाह्णे त्रिधाविभक्तस्य प्रह्णः पूर्वभागेग्नयेनीकवते अ
पाविशिष्टायाग्नयेष्टाकपालः पुरोडाशः कर्त्तव्यः॥ सपूर्वेद्युरग्नयेनीकवतेष्टाकपालं पुरोडाशं निर्वपतीति
श्रुतत्वात्॥ कार्त्तिक्यां पोर्णमास्यां पूर्वाह्णे मध्याह्ने सायाह्ने श्रुतिस्त्रइष्टयो विधीयंत इति हरिस्वामिनः॥ अ
ग्नयेनीकवते अग्निमनीकवंतं। अग्नेरनीकवतः॥ अग्निरनीकवान्निति विभक्तेयः। चतुर्द्धारणादिसंवेज्ञवति॥
अत्र च प्रथमं अग्नीसमारोह्योद्वसायनिर्मथ्यानीकवदिष्ट्यर्थमित्यग्नीविहृत्येग्निर्हि केनापूर्ववगांतो क
र्तव्या॥ ॥अद्वितीयामिष्टिमाह॥ ॥मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुः॥ ततः पुनः सांतपयेष्ट्यर्थमग्नी

विहृत्य महद्भ्यः सांतपनेभ्यः सांतपनगुणविशिष्टेभ्यो मरुद्भ्यो मध्यंदिने दिनस्य मध्ये चरुर्भवति ॥ अथ मरुद्भ्यः
सांतपेनभ्यो मध्यंदिने चरुं निर्वपति इति श्रवणात् ॥ मध्यंदिनकालस्यातिसूक्ष्मत्वात् प्रधानयागमात्रं तत्र क-
र्तव्यं । अथवा मध्यंदिनशब्देन त्रिमूहूर्तात्मककालस्याप्यनुष्ठानं ॥ अत्र मरुद्भ्यः सांतपनेभ्यो मरुतः सांतपनात्
प मरुतां सांतँनानां मरुतः सांतपनाः इति विभक्त्यूहः ॥ अत्रैकदेवतत्वाच्चातुर्द्धाकरणाभावः ॥ अन्यत्सर्वं नैक-
सां त्येव ॥ समिष्टयजुरंतं भवति ॥ इमांतुपनीयाकर्म समिष्टयजुरंतमेव भवति ॥ गृहमेधीये सैव स्तीर्णा वेदिर्न
वतीति सांतपनीया बर्हिषास्तीर्णे वेदिः श्रूयते ॥ अतोऽत्र बर्हिर्होमि उत्कृष्टव्यः ॥ तदुत्कर्षे चैतत ऊर्ध्वस्य प्रणी-
प ताविमोकादिकर्मावर्गांतस्यापि उत्कर्ष एव युक्तः ॥ क्रमानुरोधात् ॥ बर्हिरनुप्रहरणा वर्जं वा ॥ अथवा बर्हिरनु-
प्रहरणं बर्हिर्होममात्रं वर्जयित्वान्यत्सर्वं ब्राह्मणतर्पणप्रैषतर्पणकर्मापिवर्गांतं समानीयं ॥ आपस्तंब-
के मानवे सूत्रेषु चायमेव पक्ष उक्तोऽस्ति ॥ अत्र केचिदाहुः सांतपनीयापूंस पूंस्याथेति सूत्रं गृहमेधी-
यांतस्यापि उत्कृष्टपदार्थविधानाद्ब्राह्मणतर्पणस्याप्यंते ॥ तदर्थः प्रैषोऽपि ॥ तदुत्तरकालीनत्वात्कर्मापिवर्गं
च ॥ एवं चेत्सति पदार्थचतुष्टयस्योत्कर्षो भवति बर्हिर्होमः ॥ ब्राह्मतर्पणप्रैषः ॥ ब्राह्मणतर्पणं ॥ नमः हुतावे-
ति चारो केचिच्च बर्हिर्होमवर्जितं प्रणीताविमोकादि नमःहुतायेत्यंतं सर्वं कुर्वंति ॥ अपरे तु बर्हिर्होमादिसर्व-
मपि न्नाययंति ॥ अथ गृहमेधीयेष्टिमाह ॥ ॥ इध्मस्थाने शाकलपरिधिधायमरुद्भ्यो गृहमेधिभ्यः सां-

नि

वेरः पयसि ॥ इध्मस्याने प्रणीताभ्यो परस्यां दिशि शाकलपरिधिं निधाय अनियतसंख्यान्पलाशा ॥ दयतिमवृक्ष शाकलान्प्राकृतान्परिधींश्च निधायासादयित्वा मरुद्गृहमेधिभ्यो गृहमेधिगुणविशिष्टेभ्यो मरुद्भ्यः संयं कोलेपयसि श्रपणसाधनभूते चरुर्भवति ॥ अथ मरुद्भ्यो गृहमेधिभ्य इत्यादितत्वात् ॥ तस्यावृदित्यत्रहरिस्वामिन ॥ तस्य गृहमेधीयस्यावत्परिकर्मविकृष्यत इति शेषः ॥ सेवस्तीर्णा वेदिरिति सांतपनीयवेधां गृहमेधीयं विदधत्सांतपनीयातंत्रमध्ये गृहमेधीयविधिर्दर्शयति ॥ एवं हि स्तीर्णायामेव वेदोन्नाक्यते गृहमेधीयां केतुं वेदिबर्हिर्नक्रियते इति ॥ तस्मिंश्चाहूयमाने परेपि पदार्था उत्कृष्यंते ॥ ततश्च सामर्थ्यात्तंत्रमध्ये विधानमेतदापद्यते ॥ न च सांतपनीयाबर्हिः प्रहरणमात्रप्रतिबंध एवायं विसीयते ॥ प्रतिषेधाभावात् ॥ अस्य च विधानस्यान्यथाप्युपपत्तेः ॥ अपवृक्तो यागश्च समाप्ते सांतपनीये अवोदित्वप्रसंगात् ॥ तस्मात्सांतपनीयतंत्रमध्ये गृहमेधीयं विधीयते ॥ ततः सांतपनीयतंत्रमेव गृहमेधीयस्य प्रसंगादुपकरोतीति सामवायिके मात्रस्यानिर्वापादेः वृत्तिर्नारादुपकारकस्याधारादेर्नैव सामवायिकस्यापिलप्यमानस्य वेधादेरिति प्राप्ते वचनाद्यावदुच्यते ॥ तांडवेत्येव सामवायिकमंगं किमितरद्धा जैमिनिना तु आज्यभागयोर्नैष्यन्तुनेः अवणाधिवत्वाच्चापूर्वत्वं गृहमेधीयस्याभ्युपगतं ॥ अपूर्वतांच्चेदरीये नुपास्यार्थवत्वादिति ॥ न चैवं सति प्रसंगस्यातिनाभावत्तानिवृत्सर्थमर्थवादस्त्वेसत्तिनापूर्वत्वाकुयति ॥ अपि नापूर्वत्वे सति ग्रहणं ॥ योपि हविर्द्धर्मा अत्र नस्कु ॥

स्तस्मात्प्रसंग एव प्राप्ते पुनर्वचनमावृत्यर्थमित्यर्थमित्येतदेव युक्तं। अपिचज्ञातपथ्येनैव निर्गुणमाज्य
भागादिश्रूयते सदक्षिणस्योदनस्य सर्पिरासेचनाच्चेतुराज्यस्यावदायेत्यादिगुणान्तरश्रवणात्। परिधी
श्च शाकलांश्चोपनिदधातीतिउक्तौ स्तेः कथं प्रसंगादुपकर्त्तव्यमिति किंचासोनुवाद एवायं प्रसंगपक्षे॥ अपू
र्वपक्षे त्वाज्यभागं तयाप्राप्तिः परिधींश्च शाकलानित्यपनूनयोरपि विधिः॥ तथा संदोह्येति यदुक्तं शाखया
वत्सानपाकृत्य पवित्रवति संदोह्येति। श्रपयतीति सवमर्कि॥ अपूर्वत्वादिदं त्वधर्मकमेव श्रपणं विधीयते
श्रपयित्वाभिघार्योद्वासयतीति। अथपहूरतिपिंशीले शाखावे॥ सर्पिर्घृतमासिंचत्याज्यभागाद्युपयोगि
त्वात्संस्कृतमेवासिंचेति॥ संमार्ष्टीनि च संमार्गः प्राकृत एव प्रसंगेन बाध्यमानः पुनर्विहित इति धर्मवान्ने
वस्यात्। तत्र वस्तु च संमृद्धीति प्रैषः स्यादेव प्रसंगानुपपत्तेः। परिधीन्परिधायेति केनाथोनुवादः। यावतः
शाकलानिति विधिः। ॐदनावासादयतीति प्राकृतमेव मंत्रवेदासादनं क्रमार्थमुच्यते॥ स्रुक्स्रुवावासा
दनमप्यपवृ तेत्वान्तेप्रसज्यन इति मंत्रवदेव क्रमार्थमनूद्यते॥ तद्यथा घृताच्यसीति घृताचीत्यस्य वर्त्तमा
नस्यैव प्रकृतोकार्त्ततेत्वोदितत्वात्तदभावादसिजूहूनमित्येवं कर्त्तव्यं न घृताच्यसीति॥ एवमुपवेशानमप्य
पवेशं पुनर्मंत्रवदेव कार्यं। आसनेसंस्कृतमपवृक्तमिति पुनःकार्यं इक्षणतृणापासने वा स्रुवे च स्रुवं ना

।।३७।।
।।देवयाज्ञि।।

दद्यान इति स्रुमार्घमिति।। स्रुगादापनं तु प्रयाजार्थं। तदभावान्न कर्त्तव्यमेवेति। एतात्पर्यंतो हरिस्वामि-
धौम्सुपयुक्तत्वादत्र लिखितः।। अत्र च पूर्वभिधास्यानेध्माकल्पपरिधिनिधानं। आहवनीये ग्न्यन्वाधानं इति
केचित्। शाखाच्छेदनसन्नमनं। तत्पवित्रबंधनं। तथैव यजमानसंबंधिनीनां सर्वासां गवां वत्सानामप-
करणं। चतुरासनं। ब्रह्मोपवेशनं।। पात्रासादनादि। अत्राग्न्यन्वाधानब्रह्मवरणव्रतग्रहणप्रणीता-
प्रणयनपरिस्तरणदक्षिणासादनानामभावः। सांतपनीयात् तत्र मध्यमायां तु। आज्यनिर्वापानं-
तरं हस्तगृहीत एव पवित्रवति चरुपात्रे यावत्स्वगा दोहयि तंडुलानामीक्षणं प्रक्षालनं च कृत्वा दुग्धम- तं
ध्ये संवापं कृत्वाधिमेसीत्यधिश्रित्य पर्यग्निं कुर्यादिति। चरुस्थ्येव सपत्रके च तंडुलानावपतीति श्रुतेः।।
अत्रोपचरुकानां पात्रादिद्रव्याणामासादनप्रोक्षणादिसंस्कारा न भवेति। कुतः। स्थालीपक्षे तदेवश्रातिवे-
शमाज्यमधिश्रयति स्थाल्यामाज्यमादयेतीत्याज्यस्य वेरूपासंति कृष्टाधिश्रयणविधिपरे वाक्ये आ-
सादवस्रुमाविधिपरेवचाक्येधिश्रपणादिसंस्कारस्यदर्शनात्।। तथा।। स्रुक्च संमार्ष्टीति संमार्गावसद-
विधिपरे वाक्ये स्त्रोके स्रुवस्यापि संस्कारदर्शनात्।। दक्षिणादानं तु न भवति तंत्रातःपातात्।। होत्रा-
मंत्रवपोनुप्रस्थगदक्षिणानावपि सोमांतभूतेधिपशुष्विवाविरुद्धे।। अत्राहापस्तंबः।। मरुद्भ्यो गृहमे-

।।३७।।
।।भाष्ट

धिभ्यः सर्वासां दुग्धे सायं। पत्सांतपनस्य बर्हिस्तद्गृहमेधीयस्यापि वा तेधा बर्हिर्भवति ॥ न सामिधेनीरत्वा
ह नेप्रयाजा इज्यंते नानूयाजाः अपजुष्केण वत्सान पानपाकृत्या पवित्रेण दोहयति सा वै खलु पर्णशाखया
वत्सानपाकृत्य पवित्रं वेति संदोह्य यथै तदमावास्यायां क्रियते तं चरुं श्रपयती सेकेग्नीन साध.यते दंकृत्वा
ग्नीन्परिस्तीर्य प्रक्षालनादिकमप्र पद्यते। यथार्थं पात्राणि प्रयुनक्ति स्थालीकपालानां स्थालीकपाला
नां नेनिर्वपणकाले चतुरो मुष्टीन्नि रुप्य विकृत्वा वयति कपालानुपधाति ध्रुवोसीति मंत्रेसंनम
ति पिष्टाना लवनकाले तंडुलानुत्पुनात्यधिश्रपणकाले ज्ञातदोहि वत्सवायिजमानस्य मादोहायि
त्वा ॥ तस्मिन्नुद्ध्रपयति ॥ संप्रैषकालेथदन्यदिध्माबर्हिषस्तत्संप्रेष्यतीति ॥ मानवसूत्रे ॥ हुते सायमग्नि
होत्रे मरुद्भ्यो गृहमेधीभ्यः सर्वासां दुग्धे नुदेन श्रपयति ॥ सायमि काठके ॥ मरुद्भ्यो गृहमेधीभ्यो पर
कि चरुरिति शाखांतरे ॥ मध्यंदिनानां त्वग्निहोत्रहोमात्प्रागेव गृहमेधीया ॥ तदंतयवाग्वैतां पूंरात्रिम
ग्निहोत्रं जुहोतीति श्रुतत्वात् ॥ तदंत एव यवाग्वा ग्निहोम इति सूत्रकरणाच्चा। अत्र हरिस्वामिनः ॥
शाखयाथयाकुमाविध.त्सानूनुत्तीमपाकृत्य पवित्रवति त्रातिपात्रे सेदोह्या तत्राग्नेमातृभिर्वत्सांत्स
मवीर्जयंति यवाग्वेतां पूंरात्रिमेग्निहोत्रं यदि बऊरोदनः स्यातिचाक्यशेषेभ्योपावत्संवगाः दोहयेत्त
द नुरूपांश्चा व्रीहीन्निर्वपेदिति गम्यते ॥ तस्मिन्पयसि चरुं श्रपयति न पायसं। चरुह्येवेति पायसत्व

॥३८॥
॥देवयाज्ञि॥

शाका निवर्त्तयति॥ ॥मानवे॥ पालाशशाखया सर्वान्वत्सानपाकरोतीति। एवमन्येष्वपि सूत्रेषु॥ शाकला
नि चापूर्वापूर्वाण्येव विधीयते॥ नेध्मास्थाने इध्मा। कार्यस्य संस्कार्त्तपनीयां तत्रातः प्राप्तित्वेनैव सिद्धत्वा
त्॥ गृहमेधीयस्यापूर्वत्वपक्षे तु इध्मस्य प्राप्तिरेव नास्ति॥ कुतस्तत्स्थानापत्तिः शाककालानां। एतएव मे
षामासादनप्रोक्षणादेरपीध्मधर्मस्याभावः। शाकलानिध्मानमथैतदपूर्वमेवानप्राकृतं॥ तेनाप्रैषमेव
तूष्णींकर्त्तव्या न त्विध्मवत्। इदानीमिदं पयः सान्नाय्यधर्मकमुताधर्मकमिति॥ तत्र सूत्रकारः स्वयमेव
पक्षपरिग्रहं करोति। सान्नाय्यवत्। तदेतत्पयः सान्नाय्यवत्सान्नाय्यधर्मकं भवति॥ कुतः प्रदेवत्वात्। चरौ
प्रदीयमाने पयोपि देवतोद्देशेनैव प्रदीयते॥ अतो धर्मवद्भवतीति प्राप्ते आह॥ ॥तूष्णीं वैकृचोदनात्॥
वा शब्दः पूर्वोक्तपक्षनिरासार्थः। एतत्पयस्तूष्णीमेव संस्कर्त्तव्यं॥ न सान्नाय्यवत्समंत्रकं तद्धर्मकं वा॥ कुतः॥
एवं चोदनात्। यतः कारणादियमेका चोदना॥ अथ मरुद्भ्यो गृहमेधिभ्यः शाखया वत्सानपाकृत्य पावि
नेवति मंदोह्यते चरुं श्रपयतीति॥ एका चेत्सती नो भेविकर्त्तुमर्हतीति॥ तस्मादधर्मकमेवैतत्पयः॥ तथा
पियावंतो वाचनिकाः सान्नाय्यधर्मास्तावंतस्तूष्णींवर्त्तव्याः शाखया वत्सानपाकृत्येत्यादयः॥ तथा शा
खांतरे॥ अयजुषा वत्सानपाकरोतीति॥ ॥श्रुतेश्च॥ केषांचिद्धर्माणां पुनः श्रुतेश्चाधर्मकमेवैतत्पय
य इत्यवसीयते। सान्नाय्यधर्मकत्वे तु सर्वधर्माणां प्राप्तेः केषांचित्पुनःश्रवणं न स्यात्॥ अतोप्यधर्म

॥३८
॥भा

ॐ

केमेवैतत्प्रहरति॥ श्रपयित्वाभिघार्योद्वास्य श्राणावयोर्हरति॥ ततस्तं चरुं श्रपयित्वाभिघार्योद्वास्य श्रापणादानानं-
तरं श्राणावयोस्तं चरुं द्विधा विभज्योद्धरति॥ प्राकृतं तर्वे विकृतावित्यनेन न्यायेन पूर्वं श्रापणादानं तत उद्धरणमिति॥ ।
पात्र्योर्वा॥ अथ वा महत्योर्निम्नयोः पात्र्योस्तं च समुद्धरति। अथ द्वे पिशीले वा पात्र्यौ वा निर्णेनिज्य तयोरेतं द्वेधो-
द्धरतीति वचनात्॥ पिशीले शरावे॥ उद्धरणं च सशेषं कार्यं॥ तच्छेषस्य वक्ष्यमाणत्वात्॥ निर्णेजनं च समार्ग-
उच्यते प्रकृतौ तथादृष्टत्वात्॥ तथा हि॥ सपत्नसमाराद्विंनिर्णेनेत्यस्यैवेनाएतन्निर्णिक्ताभिः प्रचरणीतितद्देवद्वये नै
विद्देवेभ्यो निर्णे[illegible]जतीति। स च समार्गे हि हमे धि पिशीलकस्यैव प्राप्नोति॥ न सो वि[illegible]के तस्याशेषकार्यार्थिनः प्र
र्णिपां मप्रयोजकत्वात्॥ परतु वेचनाद्धूयोऽक्रियंते॥ अथ निर्णेजितेति॥ प्रक्षालयेदित्यर्थः॥ इति माधवः॥ ।
तच्चेसामर्थ्यं परिप्राप्तत्वान्नोपनिबद्धौ अक्षप्रक्रमः॥ श्रपणं शृतालभनं॥ प्रोक्षणीसंसादये ध्मं बर्हिरुपसादय
त्वं संनह्य आज्यं न्यितराव न्यांतं। नोध्मा प्रोक्षणं। स्रुवे कृतिप्रस्तरबर्हिषः प्रोक्षणं॥ मूलावसेकावसेका
र्थं त्वैरवच्छादनांतं। ततः पिशीलयोरुपस्तरणं तत्रस्थाभिघारादि। श्रापणादानातं कृत्वोदनस्य पात्र्योरुद्धरणं॥
आसेचनेमध्ये कृत्वा सर्पिरासिंचन्नाज्यार्थं॥ आसिच्यते आनीयते स्मिन्नित्यासेचनं गर्तः अधिकरणे ल्युट्॥
तयोः शरावस्थयोः पात्र्योर्मध्ये आसेचनं कृत्वा घृतासेकार्थं गर्तं कृत्वा तत्र सर्पिः संकृतघृतमासिंचति।
मर्थं॥ आज्यार्थं॥ आज्यभागोपस्तरणाद्याज्यकार्यार्थमित्यर्थः॥ तयोर्मध्ये सर्पिरासेचनं कृत्वा सर्पिरा

॥३१॥
॥देवयाज्ञि॥

चेतीति श्रुतत्वात्॥ यावदुक्तमतः॥ यतः यतः कारणात्सैव स्तीर्णा वेदिरित्यादिना सांतपनीयातंत्रमप्येव
हमेधीयं विधीयते॥ अत एवकारकरणाद्यावदुक्तं भवति॥ यावदुच्यते तावदेव भवति। नन्यूनाधिकं चोदकप्राप्तं॥
ग्रं१। चितं चैतत्प्रागेव॥ अन्यत्त्वेवं व्याचक्षते। यावदुक्तं येन प्रकृतितः प्राप्तावप्याज्यभागो पुनर्विधीयते। तेना
न्यभागसदृशासारादुपकारकमन्यदत्र न भवति॥ तद्यथा कुक्कुटोहननस्फ्योदकप्रहरणाघारश्चजायानु
याजपत्नीसंयाजदाक्षिणाग्निहोमपूर्णपात्रप्रोक्षणपातर्पणकर्मप्रवर्गादिकं। द्रव्यसंस्कारास्तु भवंत्येव॥ प्रति
पत्तयश्च॥ ॥स्तरणयजुषा वेदिमभिमृश्य तूष्णीं वा। कृत्वा परिधिपरिधानं। स्तरणयजुषा वेदिस्तरणमं
त्रेण वेदिमभिमृश्याथवा कृत्वा तूष्णीमेव वेदिमभिमृश्य मंत्रेणैव परिधिपरिधानं कर्त्तव्यं॥ अथैतादतावा
दायादै चिस्कवं च स्कवं चाद्ययोदैति स्तरमामेव स्तीर्णां वेदिमभिमृश्य परिधीन्परिधायेति श्रुतत्वात्। अत
पूर्वमोदनो स्कं कृत्स्कौ यौ चादाय वेदिसमीपे आगत्य तूष्णीमेव वेदिमभिमृश्य प्रागासादिति प्रोक्षितमेकं इ
ध्मात्कोष्ठप्रस्तरं चादायाहवनीये क्षपणां तं परिधिपरिधानमंत्रेणाकरोति। प्रथमं परिधिमुपस्पृश्य तस्यैधास्यति
रस्तनेनाहवनीये आधानं तदर्थसिद्धत्वात्॥ ॥शीकलान्याधाय मत्योद्धृतावासादयति। ततः मत्याइच्छी
दसंख्यानि पञ्जिपुवक्षकलान्याहवनीये आधाय पूर्वस्त्वेति जपंतेत्साहवनीयप्रक्षिप्य शरावयोः पिष्टी
लकायेवोद्धृतावेदनावासादयति॥ यावतः शकलान्कामयते तावतोन्योदधात्यथैतानुद्दिनावासादयति ॥३
॥१

स्त्रुवं च स्त्रुचश्चासादयतीति श्रुतत्वात् श्रुतिक्रमेणैवासादनं तु वचनात् ॥ संप्रदायकारादयस्तु पूर्वं स्त्रुवस्तु पूर्वं स्त्रुवा
सादनं ततुदतयोरासादनमिच्छन्तः ॥ सौविष्टकृतस्योदनोद्वासादनं ॥ शेषकार्यार्थित्वेनाप्राप्तेः । अतश्च वच
नाभावे पत्न्यौत्र्यंगाणां प्रापादानासादनालंभो न भवति शेषकार्यार्थित्वादेव ॥ अत्रोभयोरासादनमंत्रस्योहः ॥
प्रियाभ्यां प्रियं सदश्रासादतामिति ॥ आज्यौदनयोरुभयोरपि मंत्रस्य प्रयोजकत्वात् ॥ ॥ स्त्रुक्स्त्रुवं च सं
मार्ष्टि ॥ श्रुत्युक्तेवसरे स्त्रुक्स्त्रुवे संमार्ष्टि स्वशाखायामोदनयोः सर्पिरासेकानंतरं स्त्रुक्स्त्रुवं संमार्जन
मुक्तं ॥ सर्पिरासिंचति स्त्रुवं च संमार्ष्टीति । अनुद्वास्य वा संमार्जनं । वाशब्दोवधारणे । करौवुपावगाह्वस
मनुद्वास्यैव चोदकप्राप्ते काले स्त्रुक्स्त्रुवे संमार्जनं कर्तव्यं ॥ अतश्च प्राकृतएकाले स्त्रुवऊर्जुमोदक्षिण
मपिशूलकद्वयोडापात्रीणां संमार्गः । ततः पत्नीसंनहनादि ॥ आज्यभागाभ्यां चरति ॥ आसादनानंतरमाज्यस्थाल्यालंभोद
कस्पर्शं कृत्वाहवनीयोपवीजनाग्निसंमार्गौ च कृत्वा समंत्रकं होतृवरणं कर्तव्यमिति कर्कादिमतं ॥ हरिस्वामिमते हो
तानि न भवंति सांतपनीयाहुतीनामेवात्रप्रसंगात् ॥ होत्रामंत्राणामकरणे तंत्रमध्यपातेपि भवतएव होतुरप्रवृत्ते
त्वादित्यपरे ॥ ततोऽध्वर्युराज्यभागाभ्यां चरति वचनात् तत्प्रकारमाह ॥ ॥ आग्नेयं दक्षिणात् ॥ दक्षिणा दक्षिणेनोद
नेस्योत्सर्पिरासेवनात् उच्चेतपूर्णाज्ञि त्वच्चितुराज्यमवदायाग्नेयमाज्यभागं करोति ॥ अत्र स्त्रुवेवदस्त्रेनोददानेना
नुवाचनं कार्यं । उपविहोता होतृषदने स्त्रुवं च स्त्रुवं वाददान आहाग्नयेनुब्रूहीत्याग्नेयमाज्यभागं स दक्षिणा

॥४०॥
॥देवयाज्ञि॥

स्योदनस्य सर्पिरासेचनाच्चतुराज्यस्यावद्यातिक्रामत्यतिक्रम्याश्राव्याहाग्निं यजेति वषट्कृते जुहोतीति श्रुतेः ॥ अत्रापि व
षट्कारानंतरमेव होमो न तु वषट्कारेण सह ॥ पुनर्वचनात् ॥ सौम्यमुत्तरात् ॥ उत्तरादुत्तरौदनस्यात्सर्पिरासेचनातूर्ध्वात्पू
पार्द्धाच्च चतुराज्यमवदाय सौम्यमाज्यभागं यजति अथाहो सोमायानुब्रूहीति सौम्यमाज्यभागं पूर्वमुत्तरस्योदनस्य स
र्पिरासेचनाच्चतुराज्यस्यावद्यायातिक्रामत्यतिक्रम्याश्राव्याह सोमं यजेति वषट्कृते जुहोतीति श्रुतत्वात् ॥ गृहमेधिस्वि
ष्टकृतौ चाज्यभागवत्समावदाने ॥ गृहमेधि यागस्विष्टकृद्यागौ च यथाक्रममाज्यभागवद्भवतः ॥ दक्षिणादोदनाद्गृ
हमेधियागः ॥ उत्तराच्च स्विष्टकृद्याग इति ॥ तौ च समावदानौ तुल्यसंख्यावदानौ भवतः स्विष्टकृत्यभ्यवदानद्वयमेवमावदयं
उपरिष्टात्सकृदभिघारय इत्यर्थः ॥ स्थालीपक्षे एकप्रसवायपूंस्विष्टकृदित्ययं पक्षो भवति एकप्रत्ययपूंस्विष्टकृत
इत्यस्यापवादः ॥ पंचावत्तिनां तु त्रिस्त्रिरेवदानमुभयपक्षे भवति ॥ अत्रत्सभिघारणं च ॥ प्रधानयागावदानानंतरं स्वि
ष्टकृदर्थावदानानंतरं चावदानयदवदानस्थानयोः प्रत्यभिघारणमुक्तं ॥ तदत्र न भवतीत्यर्थः ॥ अह मरुद्भ्यो गृहमेधिभ्यो
नुब्रूहीति स दक्षिणस्योदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्य
तिक्रामत्यतिक्रामत्यतिक्रम्याश्राव्याह मरुतो गृहमेधिनो यजेति वषट्कृते जुहोत्यथाहाग्नये स्विष्टकृतेऽनुब्रूहीति स
उत्तरस्योदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्यतिक्राम
त्यतिक्रम्याश्राव्याहाग्निं स्विष्टकृतं यजेति वषट्कृते जुहोतीति श्रुतत्वात् ॥ न सं[illegible]पुसपणं ॥ न प्राशित्रं न चेद्वाकिर

॥४०
॥श्री

तु ।

इडावदाने षडवत्तं ब्रह्म यजमानभागावदाने च दक्षिणादोहनात्॥ अथेडामेवावधनत्प्राशित्रमिति
श्रवणात् इडाग्रहणं भागानामुपलक्षणं चोदकानुवृत्तेः॥ प्राशित्रस्यानुवचनात्प्रतिषेधः॥ न यजमानमि
इत्यापस्तंबः॥ एवं पिशीलकपक्षस्योक्तेः॥ एतत्त्वेकमयनमिति श्रुतेः॥ अधुना स्थालीपक्षमाह॥ ॥ अ
नुद्धृत्य वा॥ वाशब्दो विकल्पार्थः॥ अथवा चरुं पिशीलकयोः पात्र्योर्वा अनुद्धृत्यैवासादनादिस्विष्टकृदंतं
करोति॥ तत्र विशेषमाह॥ ॥ सहितमाज्यमधिश्रयति॥ अनुद्धरणपक्षे आहवनीयश्चापि चरुः सहि
तामेव चरुसंलग्नमेवाज्यमधिश्रयति। आहवनीय एवेत्यर्थः॥ तदेव प्रतिवेशमाज्यमधिश्रयतीति
श्रुतेः॥ प्रतिवेशं संनिकृष्टं॥ ॥ उद्वास्योभयमासादयति॥ चरुमभिघार्योद्वास्यो प्राप[illegible]दाने चरुमु
भयमाज्यस्थालीं चरुं च वेद्यामासादयति॥ अस्मिन्पक्षे आज्यस्थाल्या एव चतुर्गृहीताभ्यामाज्य
भागौ॥ ग्रहमेधिस्विष्टभागो च प्रकृतिवद्द्विषमावदानौ॥ प्रत्यभिघारणमपि भवति॥ स्विष्टकृति द्विर
भिघारणं च॥ अन्यत्सर्वं पूर्वपक्षवत्॥ पंचावत्तिनां तु प्रकृतिवदुभयत्र पंचावत्तता कार्या॥ अथेदं द्वि
तीयः॥ सैव स्तीर्णा वेदिर्भवति या मरुद्भ्यः सांपतपनेभ्यः स्ततस्यामेव स्तीर्णायां वेदौ परिधीश्च शाकलां
श्चोपनिदधाति तथा संदोकाच्चरुं श्रपयति तदेव प्रतिवेशमाज्यमधिश्रपयति॥ चाभिघार्योद्वास्यान

॥४१॥
। स्वधानि ।

त्रि स्थाल्यामाज्यमुद्वासयति स्रुवं च स्रुवं च संमार्ष्ट्यथैतं सोमपमेव चरुमादायोदेति स्थाल्यामाज्य
मादायोदेति स्रुवं च स्रुवं वादायौदेति स इमामेव स्तीर्णां वेदिमभिमृश्य परिधाय यावेतः शाकल। की
मयं तेभोवतीभ्यादधात्यथैतं सौरवमेव चरुमासादयति स्थाल्यामाज्यमाज्यमासादय स्रुवं व
स्रुवं च स्रुवं चासादयस्युपविशति होतृषदने स्रुवं च स्रुवं चैवादद्दान आहाग्नयेनुब्रूहीसाग्नेयमाज्य
भागं चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहाग्निं यजेति वषट्कृते जुहोत्यथाह सोमायानु
ब्रूहीति सौम्यमाज्यभागं स स्थाल्या एवं चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याह सोमं य
जेति वषट्कृते जुहोत्यथाह। मरुद्भ्योगृहमेधिभ्योनुब्रूहीति इति प्रकृतिवदेव प्रधानास्विष्टकृद्यागयोः
श्रवणात्॥ अत्र स्थाल्यामाज्यमासादयतीति क्रमोधिःधानार्थं वचनमिति हरिस्वामिनः॥
नप्राशित्रं। अत्रोभयोः पक्षयोः प्राशित्रं न भवति॥ उभयपक्षेत्राथेडामेवावद्यति न प्राशित्रमिति श्रौत
पोत्। अत्र हरिस्वामिनः। इडामेवावद्यतीत्यस्यामनुवादः॥ अप्रासंगिकत्वाद्धि तस्याः प्राशनमेवाव
दीनां नप्राशित्रमिति तु प्राशनप्रतिषेधः। न तत्स्वभक्षभागादयो प्रतिषिद्धत्वोदिडावदवदेया इति
इडान्तं न भवति। एतद्गृहमेधीयं केमेडान्तं न भवति॥ उभयपक्षेपि एतावत एव श्रुतत्वात्॥ पूर्वमोचेदुपात्रे
डांतोन्यापस्य प्राशनीयारनडे वक्ष्यमाणत्वात्॥ ॥ पूर्वमाजनमुपहूय॥ पूर्वे पक्षे इडामुपहूय ॥४

प्रथमं मार्जनं सर्वैः कार्यं भक्षणमिति ॥ उपहूय मार्जयंत इत्युक्तत्वात् ॥ द्वितीये तु पक्षे भक्षणानंतरमेव मार्ज
नं ॥ पूर्वै इति विशेषोपादानात् ॥ ॥ प्राश्नंतीत्युक्ताः ॥ युक्ता ब्रह्मायाश्चत्वारः[illegible]विज इडां प्राश्नंति । उपहूय प्रा
श्नंतीति श्रुतत्वात् ॥ युक्ते ग्रहणं यजमानस्येडाप्राशनवारणार्थं ॥ यजमानगृह्या हविरुच्छिष्टाशा ऋत्विजो
ब्राह्मणाश्चान्ये बहुश्चेत् ॥ यजमानस्य गृहे न वा यजमानगृह्या ये हविरुच्छिष्टाशा
कृतोपानयनास्ते तमोदनं शरावोद्धृतं स्थालीपक्षे स्थालीस्थितं वा न[illegible]श्नाति रुच्छि
ष्ट सह प्राश्नंतीति हविरुच्छिष्टाशा उपनीताः अनुपनीतस्य शूद्रतुल्यत्वेनाग्न्याधि [illegible] हविःशेषभ
क्षणाधिकाराभावात् ॥ तथा ऋत्विजोऽपि तमोऽपि तमोदनं प्राश्नंति ॥ अन्येऽपि ब्राह्मणा ये तत्र समागता भव
ति तेऽपि तमोदनं प्राश्नंति यद्योदनो बहुर्भवति । नो चेद्बहुस्तर्ह्यन्येन प्राश्नंति ॥ ऋ[illegible]गंनास्तु प्राश्नं
त्येव यावंतो गृह्या हवि रुच्छिष्टाशाः स्युस्तावंतः ॥ प्राश्नीसरथो अष्टर्त्विजः प्राश्नीयुरथो रथव्ये ब्राह्म
णा प्राश्नीयुर्यदि बहुरोदनः स्यादिति श्रुतत्वात् ॥ । ॥ अरिक्तोपं स्थालीं निदधाति ॥ अरिक्तो[illegible]शेषां स्था
लीं निदधाति ॥ स्तुगुमेत्र देवा केचित्स्थापति ॥ अथैतामनिराशितां कुंभीमपिधापति प
रपति प्र[illegible]दर्वायेति श्रुतत्वात् ॥ निःशेषा अशिता । न क्षिता निराशिता । न निराशिता अनिराशितां

पूर्णदर्वी यस्मिन्कर्मणि तत्पूर्वमिदं वर्तिस्मे पूर्णदर्वयेति अर्शादित्वान्मत्वर्थायोच्प्रत्ययः॥ अपिधायपिधानं। यस्मिन्मानस्यान्ने प्राशनं न भवति॥ ततो गृहमेधीयपाशेषसमाप्तिः॥ ॥पवित्रप्रतिपत्तिः॥ भागपरिरणं॥ जुह्वा एवमूहेनाप्युदकोपस्पर्शनांतः॥ प्रस्तरांजनं जुह्वामेव॥ स्थालीपक्षे स्थाल्यां चापरिधिप्रक्षेपः। संस्त्रवाहुतिः॥ घृताच्य सिधुर्योपाहि सुम्नासि सुम्नो माधेहीति जुह्वा एव धुरि निधानं। वेदयोक्त्रविमोकः॥ आवेदेः स्तरणं। अन्येरवच्छाद्य ने बर्हिर्होमः॥ प्रणीताविमोकः॥ राक्षसभागः॥ भागावेक्षणं॥ भागप्राशनं चेति॥ ॥सांतपनीयांपू तंपूस्थाप्य। ततो गृहमेधीयशेषं समाप्यानंतरं सांतपनीयामिष्टिं संस्थाप्य वक्ष्यमाणां कुर्यात्॥ सांतपनीयासमाप्ते श्च केषांचिद्बर्हिर्होममात्रेण॥ केषांचिद्बर्हिर्होम[illegible] त्रोल्मेण तर्पणं त्रेष आलम्भतेर्पणकर्मापवर्गाधानरूपपदार्थचतुष्टयेन॥ केषांचिद्बर्हिर्होमादिनमःकैयेत्यंते न सकलेनेति॥ येषां बर्हिर्होममात्रमेव परिशिष्यते॥ तेषां गृहमेधीयायां ब्रह्मवरणं दक्षिणादानं आहवनीयकल्पने उपवाजनसंमार्गादि सर्वं पुनर्भवति॥ येषां च पदार्थचतुष्टयस्योत्कर्षः॥ येषां च बर्हिर्होमादेः सर्वस्यातेषामेतेन भवति॥ ॥प्रातर्वाशेषभावात्॥ वाशब्दो वधारणे॥ प्रातः पतिपद्येवेदर्वि विद्यमानत्वात्॥ ततो दर्विहोमे दत्ते गृहमेधीयां समाप्तिं प्राप्नोतीति तदर्तेव सांतपनीया

होमानंतरं सांतपनीयां समापयेत्॥ नेदानीं॥
कुतः॥ शेषभावात्॥ गृहमेधीयाशेषस्य॥ दर्विहोमस्य १

समापनीयेतीति ॥ अतश्च दर्विहोमस्यापि सांतपनीया तंत्रमध्यपातित्वात् परतंत्रोत्पत्तयो जुहोतितु मात्रा इति
होममात्रे भवति ॥ नान्यजुहोतिसंबंधिनी दर्शपौर्णमासिका इति कर्त्तव्यतेति ॥ येषां च बर्हिहोममात्रोत्प
त्तिस्तेषां सर्वं भवत्येव दर्विहोमे ॥ ॥ मातृभिर्वत्सांत्सपूंसृज्य निवात्स्यावत्सं बध्नाति । गृहमेधीयसमाप्त्यनं
तरं मातृभिर्गोभिः सहवत्सांत्संसृज्य संयोज्य निवान्यायागोर्वत्सं बध्नाति । तस्य रात्रौ संसर्गो निवर्त्तव्यः ।
पितृयज्ञे तत्पयसा प्रयोजनमस्तिपतः । स्वयंनष्टवत्सा परकीयेन वत्सेन यो गो दुह्यते सा निवान्येत्युच्य
ते ॥ मातृभिर्वत्सान्त्संभवाजंती निवान्यां प्रातर्दुहंति पितृयज्ञायनेति च श्रुतत्वात् ॥ यजमानगृहव
र्त्तिनां सर्वेषां वत्सानां संसर्जनप्राप्तौ प्रातः पितृयज्ञार्थं दोग्ध्या यानिवान्याया गोर्वत्सस्य बंधनं क
र्त्तव्यं इत्यर्थः ॥ वत्सांश्च रात्रौ मातृभि सहवासयेति छंदोगसूत्रे ॥ अग्निहोमार्थ मप्यस्या रात्रौ पयो न
दोग्धव्यमिति त्वभिप्रेत्य द्रव्यांतरं विधत्ते ॥ यवाग्निहोत्रहोमः । गृहमेधीयसमाप्त्यनंतरं तस्यां रात्रौ यवा
ग्वा सायंप्रातरग्निहोमः कर्त्तव्यः ॥ यवाग्वेतां रात्रिमग्निहोत्रं जुहोतीति श्रवणात् ॥ तंडुलैः शिथिलप
कीयवागूरित्यभिधीयते ॥ अथ दर्विहोममाह ॥ प्रोत हुत्वा स्थाल्या दर्व्या चादत्ते पूर्णा इति ॥ प्रातः प्रतिपद्य ८ वा
ग्निहोत्रं हुत्वा वा हुत्वा वा सत्रोषा या गृहमेधीयचरोः स्थाल्याः शिष्टात् पूर्णा दर्वीति मंत्रेण दर्व्या हर

उत्वा वा २

७ ॥ अग्नाउद्धीस्वाह॥

॥४३॥
॥देवयानि॥

पाभृतयास्थालीस्थमोदनमादत्ते गृह्णाति॥ अथ प्रातरूते वा ऊते वायलरथ्या कामयतसोम्या अ
तायैकुंभ्योदर्व्योपिहंति पूर्णादर्वी तिश्रुतत्वात्॥ सोस्मा इति षष्ठ्यै चतुर्थी। अस्या अतिरक्षिता यासत्रो
यागृहमेधीयकुंभ्या सकाशात् दर्व्यामुपहंति॥ द्रव्यं गृह्णाति। उपपूर्वोहिंति ग्रहणार्थे वर्त्तते॥ दर्व्यांश्च तू
ष्णीकार्यपत्या समागच्छतेपनेपूर्वकार्यं॥ ऋषभामाकंपितवै ब्रूयात्॥ ग्रहणानंतरं मध्वर्युर्यजमानंप्रति
ऋषभामाकंपितवा इति प्रैषं ब्रूयात्॥ ऋषभो यथा रोति शब्दं करोति तथा त्वं तस्याकानं कुर्विति प्रैषार्थः
अथ ऋषभमाकंपितवै ब्रूयादिति श्रवणात्॥ ॥रुते जुहोति॥ हते ऋषभे कृते शब्दे सति तयैव दर्व्याहि
वनीये जुहोति॥ स यदि रुपोत्स वषट्कार इत्युहैक आऊस्तस्मिन्वषट्कारे जुहुयादिति श्रुतत्वात्॥ य
द्युनरुपाद्व्रात्यमपएव दक्षिणतआसीनो ब्रूयाज्जुहुधीति श्रुतत्वात्॥ ॥देहिम इति जुहोति॥ देहिम
इति मंत्रेण दर्व्यागृहीतमोदनं जुहोति। स जुहोति देहिम इति श्रुतत्वात्॥ इदमिंद्रायेति त्यागः॥ ऋषभो
दक्षिणा यस्यै ऋषभस्य हुते जुहोति तमेव ऋषभमध्वर्यवे दक्षिणा दद्यादिति॥ अऊते चेद्दर्विहोमस्ता
दर्विहोमं तेषां तपनीयां संस्थाप्य पुनरुद्धृत्याग्निहोत्रहोमः कार्यः॥ ऊतोच्चेत्तस्मिन्नेव विहारे॥ म
रुद्भ्यः क्रीडिभ्यः सप्तकपालः॥ ततः पुनरुद्धृत्य मरुद्भ्यः क्रीडिभ्यः सप्तकपालः पुरोडाशो भवति॥ ॥

अथ मरुद्भ्यः क्रीडिभ्यः सप्तकपालं पुरोडाशं निर्वपतीति श्रुतत्वात् ॥ अत्र मरुद्भ्यः क्रीडिभ्यः ॥ मरुतः क्रीडिनः ॥
मरुतां क्रीडितः ॥ मरुतां क्रीडितां मरुतः क्रीडित इति विभक्तयः ॥ चतुर्द्धिकिरणवर्जं सर्वं ॥ ॥ आदित्यै चरुः ॥ आ
दित्यै देवतायै चरुर्भवति ॥ अत्रादित्यै आदितिः ॥ आदित्याः आदितिरिति विभक्तयः ॥ चतुर्द्धिकिरणादि सर्वं भवति ॥ आ
युर्मे वाचा घ्राण आदित्यश्चिरित्यष्टाध्याय्यामस्मि श्रुमे श्रुतत्वात् ॥ अन्यत्रापि तिकेवलं मन्त्रो अन्यत्रापि
यैचरुरेव भवति ॥ तच्चाप्यदित्य चरुरेव भवति ॥ तद्यथा आदित्यैमहाहविष्या इत्यादौ ॥ अथवा अयमर्थः ॥
अन्यत्रापि अस्मिन्नपि शांखांतरोक्ते काले त्र्यंबकांते आदित्यै चरुर्भवति ॥ ॥ तदाह शांखायनः ॥ त्र्यंबका
संस्थाप्य मैत्रश्चरुरदितये चेति ॥ एवमेपि च मैत्र गतैत्तिरिसूत्रेष पिउत्कमस्ति ॥ अथवा यत्रादिते
चरुः श्रूयते ॥ तत्रादित्यै भवति ॥ नन्वादित्यायेत्येवेनियमः अथा किमत्रादिते देवता
त्वमिदित्यस्य वेति संदेहः स्याद्वादित्यश्चरुरंते चेसादोपयेवमदित्यै महिष्या इत्यत्र कथं चरुत्वं ॥ उच्यते ॥
अस्यास्तत्रस्पष्टश्रुतिवाक्योपलक्षणार्थत्वात् ॥ तत्र चादित्यं चरुं निर्वपतीति चरोः प्रकटितत्वात् इति ॥
आयुर्मे वा वाघ्राण आदित्ये ष्टिरिति ऋग्युगिष्टिव्यपदेशाऽङ्गेन तत्रत्वे प्राप्ते आह ॥ समानबर्हिषी वा का
लकमैकत्वात् ॥ क्रैडिनमादित्यचरुश्चेमे हविषी समानबर्हिषसमानतंत्रे भवतः ॥ कुतः कालकमैकत्वा

२१

॥४४॥
॥देवयाज्ञि॥

त्॥ एकस्मिन्नेव प्रतिपदः प्रातःकाले द्वयोर्विधानात्। कर्मणोपि पंचप्रयाज अनुयाजादेरेकत्वात्समानत्वा
दित्यर्थः॥ अतस्तंत्रभेदके कालकर्मभेदाभावात्समानतंत्रे एव भवत इत्यर्थः॥ ॥अथ महाहविरुच्यते॥
महाहविरुदवसायनिर्मथ्या। कर्त्तव्यमिति विशेषः। निर्मथ्येत्युपदेशात्। यथा पूर्वमग्नी समारोह्योदवसायेव
येते न यजेत इति श्रुतेः॥ एतेनेति साकमेधपर्वणा। तच्छब्दवाच्यं चेन्महाहविः कृतः॥ न हि तदवकल्पते
यदुत्तरवेद्यावग्निहोत्रं जुहुयादित्यग्निहोत्रस्योत्तरवेद्यधिकरणत्वमाभूदिति पुनस्तदंते उदवसानं द
मुक्तं। उत्तरवेदिश्च महाहविष्येवातस्मात्पूर्वमप्युदवसानं महा[illegible]हविष्येवातस्य संनिकृष्टत्वादि
त्यभिप्रायेणेतदुक्तं॥ सिद्धांतमाह॥ ॥पूर्वेद्युर्वा॥ अथवा पूर्वेद्युरेवानीकवत्याः पूर्वमेव समारोपो
दवसानमथनानि कृत्वा पर्वारंभणीयं॥ एतोन्न्येत तत्रशब्दस्य साकमेधाख्यस्य केवलपर्ववाचित्वा
त्॥ अनीकवत्त्वादेस्त्रैबकांतस्य हि साकमेधसंज्ञा। न तु त्वैकस्य महाहविषः॥ अथैः साकमेधै
रितिप्रश्नेत्यानीकवत्यादीनां विधानात्। तस्मात्तानि सर्वाणि साकमेधशब्दवाच्यानि॥ अतो वा श
ब्दोपधारणे॥ पूर्वेद्युरेवेत्यर्थः॥ अयमेव सर्वेषां भाष्यकृतां सिद्धांतः। अस्मिन्पक्षे केचिदेवमाहुः॥
समारोप्योदवसाय गार्हपत्यं निर्मथ्य साकमेधार्थमेव साधारणावग्नी विहृत्यानीकवनीयादिति प्रप

॥४
॥१

यनां तावान्मात्रार्थत्वाच्चं तदंत तस्यातिप्रणीतस्यैलौकिकत्वां ततश्चपित्र्यादिषु पूर्वेमिध्याहवनीयादिप्रणयनं॥ तावान्मात्रार्थत्वाच्च। तदंत तस्यातिप्रणीतस्यैलौकिकत्वं॥ ततश्चपित्र्यादिषुपूर्वेमिध्याहवनीयएवोपस्थानादेतस्यसाधारणत्वात्॥ अयमपिपक्षो युक्ततरवदृश्यते। अते अग्न्योः समारोपविधानादग्नीसमारोहेति॥ अथमहाहविर्हवींष्याह॥ ॥निरुप्योधिकानि॥ अत्रहाहविषि निरुप्यः आग्नेयादिभिः पंचभ्योहविर्भ्योधिकानिहवींषि। उच्यंत इति शेषः। तान्याह॥ ॥ऐंद्राग्नः। ऐंद्राग्नोद्वादशकपालः पुरोडाशः षष्ठंहविर्भवति॥ अथैंद्राग्नोद्वादशकपालः पुरोडाशोभवतीतिश्रुतत्वात्॥ माहेंद्रश्चः॥ माहेंद्रदेवत्यश्चरुः सप्तमंहविर्भवति। अथेक्यग्नोद्वादशकपालः पुरोडाशोभवतीमाहेंद्रश्चरुर्भवतीतिश्रवणात्॥ ॥वैश्वकर्मणएककपालः॥ वैश्वकर्मणोविश्वकर्मदेवतएककपालः पुरोडाशोभवति॥ अथवैश्वकर्मणएककपालः पुरोडाशोभवतीतिश्रुतेः॥ अयमुपांशु एककपालत्वात्॥ सर्वहुतश्च तत एव॥ सावित्रस्तु नित्येषूपांशु। एवमंत्र द्वेहविंषी उपांशु भवतः द्वे द्वयोरितिश्रुतेः। एवमत्राष्टौ हविंषि भवंति॥ तेषामैंद्राग्नस्य चेत्तु द्वौ करणाभावः। इतरेषांसमानासर्वंभवंति॥ उत्तरवेद्यग्निप्रणयनमंथनषट्पदाज्यंचवरुणप्रघासवत्॥ अहमहाहविषि उत्तरवेदिकरणमग्निप्रणायनंअग्निमंथनंषट्पदाज्यग्रहणंचवरुण

॥५७॥
॥देवै०

प्रघासवद्भवेति॥ तत्रोत्तरवेद्यग्निप्रणयनपृषदाज्यानि वरुणप्रघासवदित्येतदुक्तं॥ अग्निमंथनं पृषदाज्यग्रहणं
च वरुणप्रघासवद्भवेति॥ तत्रापि वैश्वदेविकामेवतेक्षादवात्रापि भविष्यति तत्कथं वरुणप्रघासवच्छिसु
उच्यते॥ वरुणप्रघासेषु महाहविःषु चैंद्राग्नादीनामधिकहविषां मथ नसंबंधज्ञापनार्थमेवमुक्तं॥ इतरथा
ग्निमथनस्य पंचहविःसंबंधादधिकैः सह संबंधो न स्यात्॥ तथा च यदाधिकं हविर्विस्मृतं सत्स्वतंत्रं क्रियते तदा
मथनं न स्यात्॥ अत एव प्रतिप्रस्यातुरग्निमथनस्य प्रतिषेधः महाहविर्दैवावृत्रं जघ्नुरित्युपक्रम्य तस्याव
दुपकिरंत्युत्तरवेदिं गृह्णंति पृषदाज्यं मथंत्यग्निं नव प्रयाजे भवति नवानुयाजं त्रीणि समिष्टयजूंषि भवत्य
थैतान्येव पंचहवि॰षि भवंत्यथैतान्येव पंच हवींषि भवंति स यदाग्नेय इत्यादिश्रुतत्वात्॥ ॥ ऋषभो
दक्षिणा॥ अत्र महाहविषि ऋषभो दक्षिणा। शारवातरात्॥ ततो महाहविः कर्मापवर्गांतं समापनीयं सिद्धमि
ष्टिः संतिष्ठत इत्यापस्तंबवचनात् केचित्तु महाहविषो व्रतविसर्गात्प्राक् पितृयज्ञे त्रैयंबकांश्चेच्छंति॥ तस्य किमू
लमिति तत एव विदुः॥ अथ पितृयज्ञमाह॥ ॥ पितृयज्ञमुपांशु चरणं [illegible] ॥ तेनोपांशु चरंतीति श्रुतेः॥ तेन पि
तृयज्ञेन। चरणशब्देन सर्वमित्युक्तत्वादत्र प्रैषादिकं सर्वमुपांशु भवेति॥ ॥ पुरस्तादुपचारः॥ अग्निपर्यस्तादिकं
पुरस्तादुपचारो भवेति॥ उत्तरतउपचायज्ञ इति परिभाषाबलेन यद्युत्तरतः क्रियते तत्सर्वमिहाहवनी
यस्य पुरस्तात्कर्तव्यमित्यर्थः॥ तद्यथा व्रेत्मेवरणमोस्योदकनिनयनादिके च अ॥ अनेन चात्र दिविपर्य

रो

पितृयज्ञ इति वक्ष्यमाणाया इष्टेः संज्ञा तस्मा[illegible]
यज्ञो नामेति वचनात्॥ तत्रोपांशु चरणं भवति॥ ५

योऽपि स्यात्वा दक्षिणामुखे कर्मणि क्रियमाणे दक्षिणा दक्षिणादिक्प्राची। अपरा दक्षिणा उत्तरा वा परा। पूर्वचोत्तरेति॥ तेन श्रपणस्य पश्चाद्यत्पात्रासादने विहितं तद्गार्हपत्यदक्षिणाग्न्योरुत्तरतः प्राक्संस्थं च कर्तव्यं। पात्राणामग्राणि च तस्यां कार्याणि श्रपणस्य पश्चाद्यद्बर्हिरासादनं तदप्युत्तरत एव। ब्रह्मयजमानयोर्यद्दक्षिणात उपवेशनमुक्तं तस्य श्वाङ्वति एवमादि सर्वमूहनीयं। यत्र पुनः सजपके न गार्हपत्यं गार्हपत्यस्य पुरस्तादवहननपे[illegible]वे बहि बङ्म उत्तरतोऽग्निर्यातेभ्यो दक्षिणतः पुरस्तादग्नये कव्यवाहनायेत्येवमादौ दिशा उपविशं। तत्तत्राविपर्यस्ता एव मुख्याग्नास्याः। अतिदिष्टास्त्वेव कपर्ययो नोपदिष्टासु॥ ब्रह्मयजमानयोश्चावकाशात्पुरस्तादुपचारदस्यनुदृष्येते॥ ब्रह्मयजमानयोरपि पुरस्तादुपचारो भवति॥ दक्षिणाग्नेः पुरस्तात्प्राच्यां दिशि प्रत्यङ्मुखावुपविशतः। तत्रापि दक्षिणतो ब्रह्मा उत्तरतो यजमान इति। हविरासादनंतरमिष्ट्वा यजमानश्च ब्रह्मा च पश्चात्परीतं इति श्रवणादिह ते हि परीतं। पुरस्तादुपवेशनं सूत्रितं॥ पुनरपि प्रधानप्रचरणकाले पुरस्तादुपवेशनविधानाच्च॥ पक्षांतरमाह॥ ॥पूर्ववद्वा॥ अथवा ब्रह्मयजमानयोः पूर्ववद्वोपवेशनं भवति॥ पूर्ववदिति प्रकृतिवदेव दक्षिणतो विपर्यस्तायां दक्षिणस्यो दिश्यपरस्यामित्यर्थः। तत्रापि ब्रह्मा दक्षिणतः प्राङ्मुखः प्राचीनावीती यजमान उत्तरतः प्राङ्मुख इति॥ अपत्नीकः। अपत्नीकः पितृयज्ञो न भवति केवलस्यैकाकिनो यजमान स्यैवात्राधिकारो न तु पत्नीसहितस्य इत्यर्थः॥ अतोऽत्र पत्न्याः प्रतिषेधात्पत्नीं संनह्येति प्रैषस्याभावः॥ आज्यावेक्षणं त्वाज्यसंस्कारादध्वर्युः करोति॥ ॥ क्षिणा

॥४८॥ ग्निराहवनीयवत्॥दक्षिणाग्निरत्राहवनीयवद्भवति।आहवनीयेयत्क्रियते।तत्सर्वंमंत्रंदक्षिणाग्नौकर्त्तव्यमित्यर्थः॥
॥[illegible]॥ दक्षिणाग्निराहवनीयइतिवक्तव्येवत्करणंस्वकार्यापरित्यागेनाहवनीयकार्यकरत्वंयथास्यादित्येवमर्थं॥तेना
न्वाहार्याधिश्रमणंतुवइतिनैमित्तिकेहोमाकमपिस्वकार्यमत्रभवति।आहवनीयसंबंधिचेति॥ ॥पूर्वेणाहव
नीयंप्रणीताःपरिहरति॥गार्हपत्यस्यपुरस्ताद्दक्षिणापंचमसंनिधायालन्यदक्षिणाग्नेःपुरस्तान्निधानार्थंपूर्वेणा
हवनीयंपरिहरति।गार्हपत्याहवनीययोर्व्यवायोमाभूदित्येवमर्थमिदमुच्यते॥अन्यथागार्हपत्याहवनीयां
तरालेननयनेतयोर्व्यवायःस्यात्।ननुहविष्यां न्तेत्यादिनासिद्धेःपुनरुक्तमिदं॥सत्यं॥पित्र्यत्वात्कर्मणो
ऽग्नादक्षिण्येनगार्हपत्यमपरेणोपहरणंप्राप्नोतिनाहवनीयंपूर्वेणानैनयमः।क्रियतइतिनपुनरुक्तं॥अत्रच
पूर्वंदक्षिणाग्नावग्न्यान्वाधानं॥षडासनोपकल्पनंब्रह्मवरणंतदुपवेशनंच॥ब्रह्मवरणंचाहवनीयस्यपुर
स्तात्दक्षिणाभिमुखोब्रह्मापूर्वाभिमुखोयजमानः।ततोव्रतग्रहणंअंतरेणायमग्नीगत्वादक्षिणाग्नेरुत्तर
तःस्थितोदक्षिणाग्निमीक्षमाणःप्राचीनावीतीकरोति।ततःप्रणीताप्रणयनादिप्राग्व्रतविसर्गात्पित्र्याकरके
पक्षेब्रह्मवरणाव्रतग्रहणयोरभावः॥अध्वर्युर्यजमानोवायःपिंडदानकरिष्य[illegible]भवति।तेनपूर्वंनी
वीबंधनंकर्त्तव्यं॥अग्नेर्विस्तसनोपदेशात्॥पित्र्यत्वाच्चसर्वंकर्मापिसव्येनदक्षिणाभिमुखेनदक्षिणसंस्थं
सव्यैर्यथास्वंचकर्त्तव्यं॥प्रतीच्युद्धरणपेक्षयज्ञोपवीतिनाहवनीयस्योद्धरणंकार्यं॥प्राचीनावीतिनादक्षि

णाग्नेः॥सर्वसाकमेधार्थेद्धिरणपक्षे यज्ञोपवीतिना हवनीयस्योद्धरणं कार्यं॥प्राचीनावीतिना दक्षिणसंस्थं
सर्वैयथास्वकर्त्तव्यं॥प्रतीद्धुद्धरणपक्षे यज्ञोपवीतिनाहवनीयस्योद्धरणं कार्यं प्राचीनावीतिना दक्षिणाग्नेः॥स
द६ र्वसाकमेधार्थेद्धिरणपक्षेतु तेष्वेव॥आसीनान्यपि सर्वेषां दक्षिणाग्राणि दक्षिणाग्नेर्दक्षिणसंस्थानि चेत्येव
मादि सर्वैमूह्यं॥ ॥अर्थ्य वेद्याःपूर्वेणाहवनीयं परिहरतीति चकारेणानुकृष्यते॥अर्थपात्रयोजनस्यास्तीयु व
र्थिवित्रयोजनेनवेत्॥यद्वस्तु स्फ्यस्रुक्स्रुवाज्यस्थाल्यादिक।तत्सर्वमपि पूर्वेणाहवनीयं परिहरति दक्षिण
वेदित्रिर्नयति॥अव्यवायार्थमिवानन्वेतद्वाक्यं॥व्यवायनिषेधादेव प्राप्तेः॥सत्यां गार्हपत्यस्य पश्चात्प
रिहरंति तथापरिहरणेवपित्र्यमप्रादक्षिण्यं चानुगृहीतं नपत्यव्यवायपश्चात्तन्मा भूदित्येवमर्थं पूर्वेणपरि
हरतीति प्रादक्षिण्येन नयनं नियमेनोक्तं॥नव्यवेयादिति कर्त्तव्यवायनिषेधात्पात्राणामंतराले न नयने
व्यवायो नभ विष्यतीति शंकानिरासार्थं च॥पात्राणामप्यंतराले न नयने व्यवायो भवत्येवातो न्यपि गार्ह
पत्याहवनीययोरंतरेण न नेयानीत्यर्थः॥अव्य तरागमनप्रतिषेधस्तत्रैवं शेयं न्यायस्य समाने
त्वादिति॥ ॥पितृभ्यः सोमवद्भ्यः षट्कपालः। पितृभ्यः सोमवद्भ्यः सोमवद्गुणविशिष्टेभ्यः षट्कपालः पुरो
डाशो भवति॥सपितृभ्यः सोमवद्भ्यः षट्कपालंपालः॥अत्र पितृभ्यः सोमवद्भ्यः सोमवद्गुणविशिष्टेभ्यः षट्क

॥४७॥
॥ देवयाज्ञि ।

पालः पुरोडाशो भवति ॥ स पितृभ्यः सोमवद्भ्यः षट्कपालं पुरोडाशं निर्वपतीति श्रवणात् । पक्षांतरमाह ॥ ॥ सोमाय
वा पितृमते ॥ अथवा सोमाय पितृमते पितृम ण विशिष्टाय सोमाय षट्कपालः पुरोडाशो भवति । सोमाय
वा पितृमत इति श्रुतत्वात् ॥ ग्रहणं तु गार्हपत्यस्य पश्चा पुपविष्टेन दक्षिणामुखेन प्राचीनावीतिना कार्यं । स जघ
नेन गार्हपत्यं प्राचीनावीती भूत्वा तत् दक्षिणासीन एतं षट्कपालं पुरोडाशं निगृह्णातीति श्रवणात् ॥ पितृभ्यो बर्हिषद्भ्यो ।
ष्वात्तेभ्यो निवान्या धानाः पितृभ्यो बर्हिषद्भ्यो धाना भृष्टयवा द्वितीयं हविर्भवति ॥ ४ ॥ अथ पितृभ्योऽग्निष्वा
त्तेभ्यो निवान्यायै दुग्धः सकृदुपमथितः एकशलाकया मंथो भवतीति श्रुतत्वात् ॥ अत्र पितृणामासि वुवद्धित
मं जुष्टतमं जुष्टतमं धिवेह तमगि तिपात्रो बिलजपेऊहः ॥ यज्ञपति देव पितृषु वेसि सुदिनो दैव्याप । वित्र्याय
कर्मणे शुंधध्वं देवपित्र्याया इति पात्रप्रोक्षणे । पितृचीतये त्वा गृह्णामीति हविरावपने ॥ स इदं पितृभ्य इति
ल मुसलावघाते । पितृभ्यः शुंधध्वमिति फलीकरणे । आ पितृयजं वहेत्यगाराहरणे । धान्यमसि धिनुहि पितृ नि
ति त वापो देवपितृभ्यो वेदो भवति वेदं बंधनोपि पर्यस्य पित्र्येषु तु सकृदिति परिस्तवणात् । यदसकृद्देवेन स
कृत्पित्र्य इति पित्र्यत्वादत्र सकृद्ग्रहणे प्राप्त आह ॥ ॥ चतुर्वा ग्रहणं वा निर्धारणे ॥ चतुर्वा चतुःसंख्याकमेव
ग्रहणं भवति । न सकृत् ॥ ओदकेनयोच प्राप्तेः ॥ यदुक्तं यदसकृद्देवे तत्सकृत्पित्र्य इति तदन्यत्र स्मरणात् त
द्विषयमेव ॥ यथा । त्रिः प्रक्षालितं देवेभ्यः सकृत्प्रक्षालितं पितृभ्य इति ॥ गार्हपत्यस्य पुरस्ताद्वहेन पंच ॥

णे॥ गार्हपत्यस्य पुरस्ताद्दुरग्नी वंहलस्याजिनमास्तीर्य तत्रा [illegible] हननपेषणे कर्त्तव्यो॥ पुरस्तादुपचार इसनेमा
हवनीयस्य पुरस्तात्राप्नोति॥ अतो वचनादेवमुच्यते॥ सततस एवोभयोस्थायो त्तरेणाह्व. गार्हपत्यं च नं दक्षिणा तिष्ठ
न्नेवं हृति सहलस्पलीकरोतीति वचनात्॥ अत एव श्रुति वचनादत्राध्वर्युणाग्नीध्रेण वा वहनेनं दक्षिणा
मुखेन तिष्ठता कर्त्तव्यं॥ फलीकरणं च सहैतु॥ न त्रिरिति॥ ॥दक्षिणार्द्धे कपाले. प्रथानो गार्हपत्यस्य
वरस्य दक्षिणार्द्धे दक्षिणभागे प्रणां कपालानामुपधानं कर्त्तव्यं॥ स दक्षिणे व दृषदुपले उपदधा
ति दक्षिणार्द्धे गार्हपत्यस्याष्टौ कपालान्युपदधातीति श्रुतेः॥ ततश्चोपवेषेणांगारानुत्तरतः हृत्वा दक्षिणा
र्द्धे कपालोपधानं दक्षिणामुखेन कर्त्तव्यं॥ प्रथमं मध्यमं॥ धरुणमसीति दक्षिणतः॥ विश्वाभ्य इति पश्चात्॥ तस्मा
त्तरतः पंचमं चितस्येति॥ मध्यमस्य पुरस्तात्षष्ठामिति॥ आ पितृयज्ञे वहेत्यूहः॥ ॥धानाभर्जनं दक्षि
णाग्नौ॥ धानानां भर्जनं पचनं दक्षिणाग्नौ कर्त्तव्यं॥ अतस्तदर्थं किं परोपधानमपि दक्षिणाग्नावेव क
र्त्तव्यं॥ प्रथमकपालस्य धर्मेण तत्रेनांगाराणां प्राचं करणं॥ देशारे वचनस्यानुपयोगात्॥ अतोंगाराणा
मुपयोगापर्यायोपधानं उपरिष्टावंगारो निधीयत एवाधर्ममात्रत्वात्॥ गार्हपत्यस्यापवादोयं दक्षिणा
ग्नाविति॥ इह सामध्यादि वचनाच्च पूर्वं धानानां श्रपणं ततः पेषणं॥ अहोतौ च पूर्वं पेषणं ततः श्रपणमिति

द्वि

॥४८॥ क्रम ॥ तत्रप्रधानानां अपणपेषणयोर्विपर्यासे सति किं धर्मा भवंति उत नेति संदेहे सति भवतीति पक्षे प्रा
॥दवयोनि॥ कृतमल्लोपात्लुकृतेति चेत्कृता न भवंति अतः कृता अपि विगुणा भवेयुस्तेन न भवंतीति पक्षो युक्त इति प्रा
प्ते तन्निरासार्थमाह ॥ अपणपेषणविपर्यासेपि धर्माः ॥ धाना अपणंपेषणयोर्विपर्यासेपि क्रमान्यत्वे
ग पित्रा कृता धर्माः ॥ मंत्रेणाधिश्रपणपर्याग्निकरणं कृत्वाजिनास्तरं दृषदुपधानादयो भवंत्येवा कुतः ॥ य ला
तो धर्माः प्रधानभूताः ॥ क्रमस्तु गुणभूतः ॥ न चे गुणभूतः ॥ प्राकृतः क्रमो न संभवतीति प्रधानभूतधर्म
परित्यागो युक्तः ॥ तस्मादपणपेक्षणयोर्विपर्यासेपि धर्मा भवंत्येव ॥ ॥ अभिमन्थ्याद्वर्हिःपिष्टानि वान्या
दुग्धे सकृन्मथितएकशलाकया मंथः ॥ पुरोडाशीं धानाश्चाभिमन्थ्यमानेरित्यभिमन्थनानंतरं धाना उ
द्धास्य द्वेधा विभज्येदं पितृणां बर्हिषद्यामिदं पितृणामग्निष्वात्तानामित्यभिमृश्याग्निष्वात्तसंबोधिनीर्ब्बा
धानाः पिष्ट्वा प्रकृतिवंबपोन चूर्णीकृत्य निवान्यायां गोदुग्धे क्षीरमध्ये एकशलाकया सकृन्मथितः एकवार
मेवाप्रदक्षिणं मथितो विलोडितो मंथो निष्पादयितव्य इति शेषः ॥ अथ पितृभ्यो बर्हिषद्भ्योन्वाहार्यपचधानाः
कुर्वीत तेतो बर्हिःषि पंवत्यर्द्धं इत्येव धाना अपिष्टा भवंति ता धानाः पितृभ्यो बर्हिषद्भ्योर्द्ध पितृभ्योग्निष्वात्तेभ्यो
निवान्यापै दुग्धे सकृदुपमथितएकशलाकया मंथो भवति सकृदुग्धेव परां वः पितर इति श्रुतत्वात् ॥
स्वयंमृतवत्सायपरकीयेन वत्सेन या गो दुह्यते सा निवान्या मंथ आड्वालिताः सक्तवः ॥ सकृदुपविमथि ॥

तः सफलेशङ्कुभिन्तितः। एकावासौ शलाका चेवैकैशलाका शीर्षकरहितइत्यर्थः। पूर्वकालैकेतिसमासः। आपस्तं

बसूत्रेपि॥ उद्वासनकाले धाना उद्वास्य विभागमंत्रेण विभज्याद्वित्र्याज्येनसंयौत्यस्त्वाः पिष्टानामावृतास्तकौं

कृतेत्यौत्रिवान्यायेदुग्धस्याद्दशरावे सक्तूनोप्येकुयेऽशलाकये कांडेनवा दक्षिणामु स्त्रिः प्रसव्यम

वान्वारभ्योमन्मथतिशलाकालोस्वंमंथंकृत्तेकैकेशोहवीष्यास्मादयतीति॥ काठकेसपवित्रेभिवान्या

यागोदुग्धंसक्तूंश्चेषीकया प्रसव्यमन्वारभ्योयमंथतीति॥ मानवे॥ अभिवान्यायाः पयस्यूर्द्धपात्रे प्रस

व्यमिक्षुशलाकया द्वाल्यशातका मुद्धरतीति॥ स्वश्रुतावपिनिवान्यायेदुग्धेसक्तूनुपमथितइतिदुग्धेइति

समी। दुग्धे प्रक्षिप्तो धाना चूर्णइतिभावो चायमव्याख्याता तवेतः। इदानीमिदंविचार्यते। किंमंथस्य पृथके ग्र

हणमुतागृहणमिति। किं तावत्प्राप्तं। तत्र सूत्रकार एवपक्षं परिगृह्णाति अग्रहणं मंथस्येतितोद्विःपिपूंषंती

तिश्रुते रिति व्यवहितेन संबंधः॥ अत्रैव हेतुत्वेनान्वयात्॥ तत्र मंथस्याग्रहणं॥ दृश्यकेऽग्निघ्रातो

देशोनस्वतंत्रेचतुर्मुष्टीकग्रहणंनभवतीत्यर्थः। कुतः। ततोद्विःपिपूंषंतीतिश्रुतेः॥ यत एव श्रूयते॥ अथपि

तेभ्यो बहिर्विज्ञोऽन्वाहार्यपचनेधानाकुर्वीतिततोद्विःपिपूंषंतीति॥ अस्यार्थः॥ तस्य तस्तोऽन्यो बहिर्विभ्यो

गृहीतोऽन्योन्वाहार्यपचने भ्रष्टाभ्योधानाभ्यः सकाशादेद्विधानाआदायपिपूंषंति चूर्णयंति॥ ततो बहि

षं

आ॰ध॰।
पिद्वयाग्नि।
५

पञ्चोगृहीतानामेवधानानांमध्यान्मंथार्थमर्द्धानांपेषणस्यविधानात्तदर्थंपृथग्ग्रहणंनकर्त्तव्यमितिप्राप्ते
आह॥ ॥ग्रहणंवाचोदितत्वात्॥बोद्धारः पक्षव्यावृत्तौ॥मंथतस्यपृथगेवग्रहणंकर्त्तव्यं।अग्निष्वात्तोदे॥
स्यतत्रैवचतुर्मुष्टीकग्रहणंकर्त्तव्यमित्यर्थः।कुतएतत्॥चोदितत्वात्॥शाखांतरेपृथग्ग्रहणस्यविहितत्वात्॥स
शाखायामथताभिर्हवींषिभवतीति।त्रयाणांहविषांविधानात्॥अवहननेऽथपेषणयोःसहक्रियमाणत्वात्त
तोऽर्द्धाःपिष्टंक्रियतेतदर्थप्राप्तस्यप्रकृतितःप्राप्तस्यसमविभागस्यानुवादः।ततोनतद्बलेनचोदकप्राप्तस्य
ग्रहणस्याभावोवधारयितुंशक्यते॥तस्मान्मंथार्थंपृथग्ग्रहणंभवत्येव।तथाचमानवे॥प्राग्दक्षिणाचाराः
पितृयरोनेचरत्नुपमूलंबर्हिर्दीन्यन्प्रस्तराद्भूयरध्माबर्हिःसन्नस्यापरोपरीस्तीर्यएकैकंपात्राणिप्रयुनक्ति
प अन्वस्त्रारीत्रेहरणाद्दक्षिणतःपुरस्ताद्दक्षिणाग्नेःप्रणीतःसादयतिदक्षिणाग्नौनिरूपतिदक्षिणतोऽग्निंस्थांनि
र्वपतिसोमपितृमतेषट्कपालंपितृभ्योबर्हिषद्भ्योयवाधानाभ्यःपितृभ्योऽग्निष्वात्ते[illegible]धापासिद्धमा
धिश्रयणाद्भूज्यमानानुपर्यग्निंकरोतिधानानामितराद्र्मंथापिनष्टिइमोभिम[illegible]ादिति॥आपस्तं
बेवृसमूलंबर्हिर्भवत्युपमूललूनंवावर्षीयानथादिध्मोद्राघीयांश्चेति॥कोठकच॥पुरूमूललूनंबर्हिरिति।
पूर्वेणाद्दक्षिणमग्निमेकैकंपात्रंप्रयुनक्त्यपरेणब्रह्मयजमानाविति।अत्रैषपदार्थक्रमः॥त्रयाणामपिहवि ॥५

षांग्रहणादिफलीकरणांतं कृत्वा यवमथ्ये तु षट्कपालार्थान्यवान्पृथक्कृत्वा । [illegible] लेक्षा ति
नाशनादिश्रोहणांतं षट्कपालार्थानामेव पेषणं कृत्वा ईक्षणसंवापसंयवनाधिश्रयणानि कृ
त्वा धानानामथ धानानां यवानां दक्षिणाग्नौ कर्पराधिश्रयणं । गार्हपत्याद्देवोभयोः पर्यग्निकरणं ॥ यथा
विश्रितं श्रपणं पुरोडाशस्यभृतालंभो धानानां चा । ततो धानाउद्वास्य विम[illegible]साभिनवयवे
र्नोपहितास्यामेव दृषदुपलाभ्यां मद्धानां पेषणं कृत्वा क्षणसंवापदुग्धोपसर्ज[illegible]नयनाङ्गौल
नी निकृत्वा पुरोडाशस्याभिवासनं पात्र्यंगुलिप्रक्षालननिनयने चाहवनीयपूर्वेणोदक्संस्थं
कुर्यात् ॥ पुरस्तादुपचार इत्युक्तत्वात् ॥ तथा कृते दिग्विपर्ययेणा प्रत्यक्संस्थं निनयनं कृतं भव
तीति ॥ दक्षिणेन दक्षिणाग्निं परिवृतमुदग्द्वारं तन्मध्ये वेदिकोत्यवांतरदिक्स्रक्तिमास्यांते ॥ अस्पं
ते त्रिताय त्वेत्यादिमंत्रैरास्येभ्यः पात्र्यंगुलिप्रक्षालननिनयनांते कृते दक्षिणाग्निं दक्षिणेन दक्षिणा
र्दक्षिणस्यां दिशि अर्धात्मपरिमाणमुदग्द्वारं परिवृतसमवरश्रं परिसमंतोद्धृतमावृतकटपरादिनात्रारतं
त्रदेशात् ॥ आग्नेयनैर्ऋतवायव्यैशानीष्ववांतरदिक्षु स्रक्तयः कोणा यस्याः सा अवांतरदिक्स्रक्तिः

शाखांतरे हि द्विस्रक्तिः पठ्यते ॥ तद्वारणाय वांतरदिक्स्रक्तिमित्युक्तं ॥ स्वश्रुतौ तथाश्रवणात् ॥ अथ यद
नान्वाहार्यपचनं तु चेत्स्रक्तिं वेदिकरोस वांतरदिशोनुस्रक्तिः करोतीति ॥ तथा च मानवे ॥ ॥ अग्रेणान्व
हार्यपचनं चतुः दक्षिणाग्निं त्रिषुप्रक्रमेषपरिमिते वाऽवकाशे पुरुषमात्रां दिक्ष्वप्रां चतुरस्रां वेदिं करो
ति ॥ आपस्तंबोपि ॥ अग्रेणान्वाहार्यपचनं यजमानमात्रीं चतुःस्रक्तिं वेदिं करोति प्रतिदिशं स्रक्तयो वा
तेनादेशान्प्रतिमध्यानुद्धृतास्वाना भवति न प्राचीवेदिरुद्धत्या पितृयज्ञो हि नदक्षिणायाशोध्रमेदिशावं
तरोद्धन्योनयेत्र हि देवोश्वपतिरश्वेज्यंत इति विज्ञायते ये केच देवसंयुक्ता मंत्रा देवेभ्यः पितृभ्य इति ता
संनमति यथा भवति देवपितृयजनीस्य विकारो वेति परि वृतेवर्तीति श्रौतत्वात् परिवृत्तकस्परिवृतकर
पामुक्तो दक्षिणाग्निमध्ये स्याकुरोति । वेदिमानमुक्तोरकरणां तंकृत्वा तन्मध्ये सकृत् तत्कृत् परिसमूहनादिपं
चेत्संस्कारान्कृत्वा अस्या वेदेर्मध्ये गर्भेसधानाभर्जितं दक्षिणाग्निं करोति अन्यकर्परादिना आनीय
मध्ये स्थापयति ॥ तन्मध्येग्निं पुनमादधातीति श्रौतत्वात् ॥ ततोन्वाहार्याधिश्रयणं आहुस्तांते एवं परिवृतादि यों
करणस्योपदेशात् ॥ सामर्थ्यादौचित्याच्च नहि कृतान्वाहार्याधिश्रयणो दक्षिणाग्निस्तत्संहित आनेतुं ॥५
शक्यते घटते वेति ॥ ॥ प्रणीतानुहरणं ॥ दक्षिणाग्नेर्नीयमाने प्रणीतानामस्मरणं एद्वतोनेधनं कर्त्तुं ॥

ध्ये ॥ शाखांतरात् ॥ ब्रह्मयजमानौ चानुगच्छतः । ब्रह्मयजमानावपि दक्षिणाग्निं दक्षिणतो वेदिमध्ये नी
यमानमनुगच्छतो यस्मिन्पार्श्वे उपविष्टो तत्पार्श्वस्थौ चैवानुगच्छतस्तथैवोपविशतः पुरस्तात्पश्चाद्वा देति ॥ स्फ्या
दानादि करोति ॥ पूर्वमन्वाहार्यमधिश्रित्य ततः स्फ्यादानादि सत्पावशा दानादिकमध्वर्युः करोति ॥
२ अत्र रेखाहरणमग्नीद्देव करोति नाध्वर्युः क्वचिदप्यनुक्तत्वात् ॥ सत्ततएवश्राकस्तंबे यजुर्हरति स्तंबयजु
र्द्वित्वाध्येत्येवाग्नेः परिग्रे उक्तो त्यध्ये [illegible]ति पूर्वेण परिग्रहेण परिगृह्णात्येति मृज्याह प्रोक्षणीरासादयति ।
प्रोक्षणीरिध्मं बर्हिरुपसादयति स्रुचः संमार्ष्ट्याज्येनोदेहींति स्रुक्तत्वात् ॥ प्राक् स्रुवं यजुरिति स्रुवेनत्रा ती
च्येवात्रोदीचीव[illegible]दीचीवदिति दर्शपू[illegible]तीति हरिस्वामिनः । स्फ्यादानमंत्रे आददेध्वरकृतं देवपितृभ्य इत्यु
श्रौ हः पृथिवि देवपितृग्रहरणे । आपारं पृथिव्यो देवपितृयजमानादिति च ॥ पत्नीं संनह्येति प्रैषस्या
भावः पत्नीसंनहनस्य च ॥ यस्या अभावात् ॥ आज्यावेक्षणमध्वर्योः । यज्ञोपवीत्याज्यग्रहणे ॥ अध्व
र्युरेवैको यज्ञोपवीत्याज्यग्रहणे ॥ आज्यग्रहणेऽध्वर्युरेवैको यज्ञोपवीती कृतसव्यः स्यात्तंतो
सयज्ञोपवीती भूत्वाज्यानि गृह्णातीति श्रवणात् ॥ द्विर्वैपि त्रेति । उपभृति द्विर्वा द्वौ स्रुवौ वा आज्ये
कौतिवा अष्टकृत्वे एवातद्धौ ऊर्द्धिरुपभृति गृह्णीयाद्वौ स्यत्रानुयाजो न वत इतित दृष्टा वेव कृत्वे उपभृ

॥५१॥ तिगृह्णीयादिति विकल्पश्रवणात्॥ जुह्वां ध्रुवायां च चतुर्गृहीतमेव॥ ध्रुवायां ग्रहणे च त्रियंदव तिगा
॥दैव्यापा प्रो म नाधृष्टं देवपितृयजनमसीति मंत्रस्याहः॥ आज्यग्रहणानंतरं पुनरपसव्यं कृत्वेध्मप्रोक्षणा
दि करोति॥ स पुनः प्राचीनावीती भूत्वा प्रोक्षणीरध्वर्युरादत्ते स इध्ममेवाग्रे प्रोक्षत्यथ वेदिमिति श्रुतेः॥
प्रागग्रंपि बर्हिः वेद्यां निदधातीति शेषः बर्हिरत्र प्रागग्रमपि आसादनीयं वेदिमध्ये प्रोक्षणार्थी ननु दिग्विप
र्ययेणोदक्षिणाग्रं॥ अथास्मै बर्हिः प्रयच्छति तत्तु रस्याध्ययासादयति तत् प्रोक्ष्योपनिनीयेति श्रुतत्वा
त्॥ विस्रंस्य नेत्याग्रे गृहीत्वा त्रिस्तरणं त्वाग्निपर्येति॥ संवहनबद्धं बर्हिर्विस्रंस्यानंतरं भूसंव्रहनेन ब
र्हिर्लघ्वी मध्यमग्रे गृहीत्वा वेदेरुत्तरपरकोणादारभ्य त्रिस्त्रिवारं अप्रदक्षिणं वेदिस्तरणेनाग्निं पर्येति
परितः सर्वतो गच्छति॥ अथ संनहनमनु विस्रंस्य प्रसलवित्रिपरिस्तरणं न्यर्येतीति तत्वात्॥ अपल
वि अप्रदक्षिणं॥ अवचस्यासंस्थादेवपितृस्येइत्सूहः॥ स्तरणं कुर्वता च संनहनं दक्षिणाग्रे णो स्तरणी
यानि कृतो तस्य तत्र दृष्टत्वात्॥ प्रस्तरमात्रं शिष्ट्वा ताव त्यातिपर्येति प्रस्तरमात्रं मुष्टिमात्रं बर्हिः शिष्ट्वा
परिशेष्यता वेदे वत्रिरेव प्रदक्षिणं पर्येति परितो गच्छति॥ सोपसलवित्रिः परिस्तीर्य यावत्प्रस्तरमा
जनं तावत्परिशिनष्ट्यथ पुनः प्रसलवित्रिः पर्येतीति श्रुतत्वात्॥ प्रसलविप्रदक्षिणमिसर्पः॥

तपूंस्तृणा स्सविधृतिं। ततस्तं शोषितं प्रस्तरमात्रे अविधृतिं विधृतिव्यवधानरहितं विधृत्यो
रंतराले निधानेविनैव दक्षिणाग्रं स्तृणाति॥ स दक्षिणेवपरिदधाति दक्षिणा प्रस्तरं पूंस्तृणाति नांतदीना
र तिविस्तृतीरतिश्रुतेः॥ केचिन्मत्रावरुणोत्वापुंस्तौ त्वपरिधेत्तां॥ पूर्यस्माद्दक्षिणतः पात्विति चोदेहतिचो
हेति नैत्यपरो परिधीनित्य विवक्षितो बहुवचननिर्देशः। अकेसनुसारात् द्वौ हि परिधी दक्षिणाग्नेोर
न्यौ परिधातु। न मध्यमः सत्यत्र प्रागग्र एव परिधेयः। प्रस्तरस्त्वग्ने उत्तरपार्श्वे स्तरणीय इति तत्र स्था
सत्छे देवपितृभ्य इत्यूहः॥॥ प्राकेसिउ स्य ॐ हविरासादने। अत्रेहविरासादनं। अत्रेहविरासादंश्री
केसंसनु वेति॥ तथा सत्युदक्रमं स्थंसं पचेते दिग्वपर्युयेणप्राच्याउदीचीत्वात्। स तत्र जुहूमासाद्य
त्पथ पूर्वामुपभृतेमथध्रुवामथपुरोडाशमथपुरोडाशमथपधाना [illegible] मथमंधमासाद्यहवींषिसं
मृशातीतिश्रवणात्॥ ॥सामिधेनिप्रेषाद्याज्यभागाभ्यांयज्ञोपवीतिनः सर्वे॥ अग्नयेसमिध्य
मानायानुब्रूहीत्यवंप्रेषः। सामिधेनिप्रेषादितमारभ्याश्रआज्यभागाभ्यांआज्यभागपर्यंतं सर्वे य
जमानाअऋत्विजोपवीतिनः भूतेसभ्याः कर्मकुर्वंतीतिशेषः॥ ॥पश्चात्परितोश्रेत्सयजमानो। श्रे
त्सोचयजमानश्चब्रह्मयजमानोत्तरोदक्षिणाग्नेः पूर्वदेशात् दक्षिणपार्श्वेमार्गेणपश्चादपरयोश्रे

॥५२॥ परितः परिक्रम्यागच्छतः॥ दक्षिणाग्नेरपरस्यां दिशि गत्स प्राङ्मुखी उपविशतः॥ तत्रापि दक्षिणतो
॥देवयाज्ञि॥ गत्वा उत्तरतश्च यजमानः इति॥ तत्र सर्व एव यज्ञोपवीतिनो भूत्वेत्थाय यजमानश्च ब्रह्मा च पश्चात्प नः
पुरस्तादग्नीदिति श्रुतत्वात्॥ इत्यादित्यमितयेन पूर्वपश्चो द्दक्षिणपार्श्वेन पश्चिमपार्श्वे गमनं दर्श
यति॥ कुत ॥ पूर्वपार्श्वाद्दिक्षुत्तरत्र स्थानगमने पुरस्तात्परीत इति वचनात् दक्षिणपार्श्वेनेति कुत ए
तत्॥ अन्यथा व्यवायप्रसंगात्॥ पुरस्तादग्नीत्॥ अग्नीत्पश्चिमपार्श्वाद्दक्षिणपार्श्वेन गत्वा पुरस्ता
द्दक्षिणाग्नेः पूर्वस्यां दिशि पर्येति परिक्रम्य गच्छति। पुरस्तादग्नीदिति श्रवणात्॥ पाश्चिमपार्श्वादिति
कुतः॥ उत्तरत्र पश्चादग्नीदिति प्रत्यापत्तौ पश्चाद्वचनात्॥ अत एव सामिर्नीप्रैषादनंतरमग्नीदवंस्य रे
पश्चिमपार्श्व एवावस्थितः कर्म कुर्यादिति॥ ततश्च होतारमामंत्र्याग्नये समिध्यमानायेति प्रैषः॥
अथेधामभ्यादधदाहाग्नये समिध्यमानानुब्रूहीत्यादि श्रावयित्वोपविशतीत्यं तस्य श्रुतत्वात्॥ अभ्या
दधदिति वर्त्तनेसामीप्येवद्वेतिशतृप्रत्ययः॥ क्षिप्रमेवाभ्याधास्यमित्यर्थः॥ इदमहे रेतीयेन वज्रेण
इस्यववाधना इध्मप्रैषः क्षेपः तत्तीये प्रणवे सर्वस्या अष्टादशकाष्ठक एवात्रेध्मो भवति॥ उपसद्धमा
त्रादित्येवंस्यासनुक्तत्वात्॥ अनुयाजसमित्परिशोषणं॥ ॥अत्राहापस्तंबः॥ एकामनूयाजसमि ॥

॥॥ आश्राव्यसीदहोतरित्येवब्रूयात्॥ ॥२

धवशोष्यसमन्त्रार्धमंत्रैवंविभज्यत्रिरादधातीति॥ काठके च॥ ॥अनूच्यमानायां सामिधेन्यां त्रिरि
ध्ममादधातीति॥ ततउपवाजनेनापरित्येवब्रूयात्॥ आश्राव्य॥ आश्रावणं कृत्वा सीदहोतरित्येवब्रूयात्॥ ना
म्नि दैवो दैव्यो होतेति॥ अथाश्राव्य नहोतारं प्रवृणीत इति सीदहोतरित्येवाहेति च श्रुतत्वात्॥ अप
बर्हिषः प्रयाजाः॥ अपेति वर्जनार्थः॥ अपपरी वर्जने इति कर्मप्रवचनीयः तद्योगे च पंचम्यपाङ्परि
भिरिति च बर्हिष इति पंचमी॥ तेनायमर्थः अपबर्हिषो बर्हिःप्रयाजवर्जिताश्चत्वारः प्रयाजा भवंति॥
तदेतावात्तद्योगिनश्चत्वारो ममेत्येनुमंत्रणस्याप्यभावः॥ उपविशति होता॥ सदनेउपविश्य प्रसौ
तिप्रस्तृतोध्वर्युः स्रुचावादाय प्रसह्य इति कामं त्यजति क्रम्याश्राव्याह समिधोयजेति सोपबर्हिषश्चतुरः प्र
याजान्यजतीति श्रुतत्वात्॥ ॥अनुयाज्याश्च॥ चकारादेवं बर्हिष इत्यनुकृष्यते॥ ॥अनुयाजा अप्यप
बर्हिषो देवं बर्हिरित्येतद्वर्जिता भवंति॥ तत्रापि हि श्रूयते॥ देवान्यजेति सोपबर्हिषो द्वावनुयाजे
यजतीति॥ ॥असमानयनं वा बर्हिःसंयोगादिति॥ चतुर्थे प्रयाजे प्रकृतौ यदुपभृतः समानयन
मुक्तं तदत्र न भवति॥ कुतः॥ तस्य बर्हिःसंयोगात्॥ अथ चतुर्थे प्र [illegible] याजे समानयति॥ ब
हि

र्हिषीति ॥ अथवा भवति समानेपनं ॥ समानयनस्य चतुर्थसंयोगात् । अथ चतुर्थे प्रयाजे समानयतीति ॥
बर्हिषीत्यनुवादएव तस्यैव चतुर्थत्वात् ॥ समानयनं भवत्येवेति पितृभूतिः । भवत्येवेति कर्कः ॥ तत्रा
तिद्विर्ग्रह्य हवेत्राच्यां द्विरूयति ऋम्पैप्रयाजमाज्यभागो जुहोति अनुयाजौ चोत्क वावादीय प्रत्यङ्·ति आन
तीति आत्तत्वात् ॥ एवं च हुते प्रहुते इति च हुतं भवति । प्रहुतो हि दक्षिणाति क्रामतीत्युक्तत्वात् दक्षिणां दिशं गत्वा
होमः हुतः ॥ इहापि दिग्विपर्यासेन प्रतीच्येव दक्षिणेति । प्रधाने तु स्विष्टकृति चातिक्रमणं प्रतिषिद्धं नातिक्रा
मतीति आत्तत्वात् ॥ हविर्भिश्चरिष्यंतः प्रतिविपर्यंति । आज्यभागानंतरं हविर्भिश्चरिष्यंतो हविःप्रचारं
करिष्यंतो ब्रह्मयजमानाग्नीध्राः प्रतिविपर्यंति ॥ यत्र पूर्वमुपविष्टाः । पुनर्भूतस्यानं प्रत्यागच्छंति । ब्रह्मय
जमानौ त्वपसव्यं कृत्वा पश्चिमपार्श्वादुत्थाय दक्षिणपार्श्वेन गत्वा पुरस्तात् प्रत्यङ्मुखौ पूर्ववदुपविशतः ।
आग्नीध्रश्च पूर्वपार्श्वाद्दक्षिणपार्श्वेन पश्चाद्देशं गत्वा तिष्ठतीत्यर्थः ॥ ते सर्वएव प्राचीनावीतिनो भूत्वैते
हविर्भिः प्रचरिष्यंत इत्याद्यजमानश्च ब्रह्मा च पुरस्तात्परीतः पश्चादग्नीदिति आत्तत्वात् ॥ पित्र्यत्वोदप
सव्यं सर्वत्र प्राप्तमेव ॥ सव्यस्य तु वाचनिकस्याज्यभागं तस्यावधिः पूर्णा इति प्राचीनावीतित्वप्रा
प्तमेवेति पुनर्न सूत्रितं ॥ प्रतिशब्दप्रयोगाच्चैषदासामिधेनीप्रैषादौ विपर्ययः ॥ हुतो भवति तदा इह प्रति ॥

मणं चाहविषां प्रत्यभिघारणं तुण भवति ॥ अथाहाग्नेयेकव्यवाहनायनुब्रूहीति तत्स्वि[illegible]ष्टकृत इति प्रकृतस्य उप
स्तृणीत् आज्यमथास्य पुरोडाशस्यावद्यति स तेनैव सहैधानां तं समरू मंथस्पते त्सिंहृद्धा सस्योपरिष्टाद्विराज्य
स्याभिघारयति न प्रत्यनक्त्यवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याहाग्निं कव्यवाहनं यजेति वषट्कृते
जुहोतीति श्रवणात् ॥ सस्विष्टकृत् ॥ स कव्यवाहनयाग एवास्विष्टकृद्यागः । अतस्तद्यतिरिक्तो चोदकप्राप्त्य
पृथक् स्विष्टकृद्यागो न कर्त्तव्यः ॥ त स्विष्टकृते इति श्रवणात् । केचित्त्वाग्नये कव्यवाहनायेष्टकृते इनुब्रू
हीति विशेषणं कुर्वंति । तत्रोपपद्यते । अतोतस्यादृष्टत्वात् ॥ अतो यथाश्रुत एव प्रयोगः कर्त्तव्यः । अत्रसो
मवतो नास्ति ॥ केवलमवदानं श्रूयते ॥ सोमवद्यागश्चोत्पत्तिसमये षट्कपालावेरुद्ध एवोत्पन्नः तेन धाना
मंथयोः समुच्चयो विकल्पो बाध्यबाधकभावो वा वक्तुं न शक्यते ॥ उत्पत्तिशिष्टस्य बलवत्वात् । इतरस्य
चतुर्बलत्वात् ॥ अतश्चतयोरवदानं संस्कारार्थमेवेति । चिंत्याय एतत्त्रयोजनं संस्कारकस्य ग्रहणविस्म
रणे यागावृत्तिर्न भवति ॥ एवं च बर्हिषद्यागे धानावदानमेव प्रधानं पुरोडाशे मंथावदानं संस्कारके
अग्निषात्तयागे च मंथावदानमेव यागसाधनं पुरोडाशधानावदानेनु संस्कारके । कव्यवाहनयागे त्री
वीण्यपि सदृशान्येवातत्रैकैकविस्मरणे यागस्यावृत्तिरेव तदर्थ्या भवति ॥ पंचावत्तिनां तु विशेषश्चापन्न

॥५५॥ देवोऽर्कः॥ द्विः प्रथमस्यावर्त्येत पंचावत्तिन इति॥ पंचवत्तिनः सर्वयागेषु यद्यत्प्रथमं पदस्त्वकीयं हा द स्तोमो
॥देवे याति॥ द्विः स्वधेति॥ एतदाम्नामेकेकामेव इत्यर्थः॥ कव्यवाहनो यागे च सर्वेभ्यो द्विः स्वधेति। सर्वेषां तुल्यत्वात्॥
केचित्स्वधेवा यथा स्विष्टकृत इत्येतत्तु चतुरवत्तिनोऽप्यत्र बाधितमेव॥ वचनात्॥ ॥ओं स्वधेत्यस्तु स्वधेति वा
श्रुतप्रत्याश्रौ॥ अथवात्र प्रधानयागेषु स्विष्टकृद्यागे च ओं स्वधेत्याश्रौतं तस्याश्रावयतिस्थाने वक्त
र्य॥ अस्तु स्वधेति च प्रत्याश्रौतेऽस्तु श्रौषडित्यस्य स्थाने कार्यं॥ तदुक्तमाश्रावणे ओं स्वधेत्यस्तु स्व
धेति प्रत्याश्रावणमिति श्रौतेः॥ ॥स्वधा नम इति वषट्कारः॥ स्वधा नम इत्येव मत्र वषट्कारः कर्तव्यः॥
स्वधा नम इति वषट्कार इति श्रौते॥ पूर्वसूत्रे वा शब्दो विकल्पार्थः॥ तदुहोवाचासुरिराश्रावयेयुरेव त्रसु
श्रावयेयुर्वषट्कुर्युर्न पितृभ्यस्य विधाया आपामेति श्रौ तत्वात् ओं स्वधेत्यादिषु स्थाने नायस्यो तोऽभे वसे के
तिपदमंजरीकारः॥ तथाबोधायनः॥ नित्याः स्युः प्लुता इति॥ ते न तु स्वधेत्यत्र तु कारः स्वरो वृद्धिगतो
ऽकारश्च नौ ३८० स्वा३धेति अस्तु स्वधेत्यत्रापि स्वरस्वरो वृद्धिगतोऽकारः तः अस्तु स्वा३धेति। स्वधा नम
इति स्वा३धा३ नम इति वा॥ एवं ये३ स्वधामहे इत्यपि यजामहे इत्यस्य स्थाने भवति॥ मंथमुपहूय होता ध
र्मु प्रस्थाग्नीध्रवपायं निदधाति॥ मंथमिति मंथैकदेशमुपहूय॥ इडोपहूत इत्यादिना इडोनिगदेनैव॥ ॥५॥

विपर्यः ॥अथ मध्यदित एव वद्धेति सूत्रा लक्ष्यादुपविष्टो॥ ततस्तत्रैवासत्तैसोरुपविशातः॥ अतो विपर्यः॰ पाक्षिक इति॥ ॥सर्वेभ्यो वद्यति यथापूर्वं॰ सोमवद्भ्यो मध्यात्सकृत् तं पितृभ्यः सोमवद्भ्योथ सर्वेभ्यो हविर्भ्यो मध्यात् हविषां मध्यप्रदेशात॥ सकृत् सकृद्दिति वैकैकमवदानमवद्यति॥ तच्चैव यथापूर्वं हविषां निर्वापक्रमेण॥ प्रथमं पुरोडाशात्॥ ततो धानाभ्यः॥ ततो मंथादिति॥ ॥सहावदधाति॥ गोकर्णाकृतिना रेतावदानेन त्रिभ्योपि हविर्भ्य एकैकमवदानमेकत्रैवावदाय स्रुचि सहावदधाति॥ जुह्वां त्रीण्यवदानानि सहैव भवतीत्यर्थः॥ तादृशं शृतावदानेन तच्चैकस्मिन्नेव लघुपात्रे एकत्रावदाय स्रुचि तेन सहावद्यानि॥ १९॥ हविरभिघारणं॥ अवदानानंतरमुपरिष्टाद्धविरभिघारणं कर्त्तव्यं॥ अधस्तात् सकृदेवोपस्तारः॥ ॥ अनंतिक्रमणं चैव यजतिस्थाने अतिक्रमणांतरमुपरिष्टात्त्वत्र न भवतीत्यर्थः॥ सोम[illegible]स्य एवायमवदानप्रकारो भविष्यति न तु सोमाय पितृमते इति कस्यचिद्वाशंकास्यात्तामपाकर्त्तुमाह॥ ॥सोमाय वा पितृमते॥ अथवा सोमाय पितृमते एवमुपस्तारादि अवदानं कर्त्तव्यं॥ अथाह पितृभ्यः सोमवद्भ्योनुब्रूहीति॥ सोमाय वा पितृमते इति च प्रैषमुपस्तृणीत आज्यमथास्य पुरोडाशस्यावद्यति सकृत्तेनैव सह धानानां तेन सह मंथस्य ततः सकृदवधात् मध्योपरिष्टाद्द्विराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि कामनोरवदा

॥५४॥ नविधानशाखांतरात्॥ ॥एवं बर्हिषद्भ्य उत्तरतो धानामंथपुरोडाशानामनेनैव क्रमेणोत्तरतो मुख्य॥ ॥उत्त
॥देवयानं॥५ स्मात्प्रदेशादेकैकमवदानमवदायावदाय सहावदधाति। द्विरभिघारणे मनतिक्रमणं अवदानानां प्रत्तिघार
अथाह पितृभ्यो बर्हिषद्भ्यो नुब्रूहीति स उपस्तृणीत आज्यमंथास्यांधानानामवद्यति स तेनैव सह मंथस्य ते न
सह पुरोडाशस्य तत्सिहृदवदधाय यथोपरिष्टाद्द्विराज्यस्याभिधारयति प्रत्यनेत्त्यवदानानि नातिक्रामती तत एवो
पोत्थायाआपाओव्याह पितॄन्बर्हिषदो यजेति वषट्कृते जुहोतीतिश्रवणात्॥ अग्निष्वात्तेभ्यो दक्षिणतो मंथपुरो
डाशधानानां॥ अग्निष्वात्तेभ्योर्थे मंथपुरोडाशधानानामतेनैवोपदिश्यमानक्रमेण दक्षिणतो मुख्याद्दक्षिण
स्याह विः प्रदेशादेकैकमवदानमवदाय सहावदधाति॥ एवमित्यत्राप्यनुवर्त्तते॥ तेन सहावधाने द्विरभिघारण
मनतिक्रमणं प्रत्यभिघारणं। वहा पितृभ्योग्निष्वात्तेभ्यो नुब्रूहीति स उस्तृणीतं आज्य मथास्य मंथस्यावद्यति
स तेनैव सह पुरोडाशस्य तेन सह धानानां तत्सहृतो वेदधान्य यथोपरिष्टाद्द्विराज्यस्याघारयति प्रत्यनत्त्यवदाना
निनातिक्रमेत्ती तत एवोत्थायाआव्याह पितॄनग्निष्वात्तान्यजेति वषट्कृते जुहोतीतिश्रवणात्॥ ॥पुरस्तादग्नये
य केव्यवाहनायँथापूर्वी॥ एवमित्यत्राप्यनुवर्त्तते॥ एवमनेनैव पूर्वोक्तेन प्रकारेण यथापूर्वं हविषामुत्पत्तिक्रमे
सर्वहविषां पुरस्तान्मुख्यात्पूर्वप्रदेशात्॥ एकैकमवदानमवदायस्त्रुच्विसहावदधाति द्विरभिघारणमनतिक्र ॥१

पह्वय होताध्वर्युर्ब्रह्माग्नीदित्येते चत्वार ऋत्विजो वघ्रायं अवघ्रायाव[illegible]घ्रायावति दधाति ॥
तद्वैक एव होत्रे मथमादधातीति तं होता पहूयावैव जिघ्रति तं ब्रह्मणे प्रयच्छति तमग्नीधे दवैव
जिघ्रतीति श्रूयते ॥ इतरेतरस्समर्पणं तु स्मार्तमध्व्यपरिग्राह्यत्वात्रो पनिबद्धां यजमानस्यानुअवघ्राण
मपि न भवति ॥ अविहितत्वात् ॥ स्विष्टकृद्यागानंतरमउपस्पर्श्य स्रुवा वा संचरमुपहूय होत्रे
मंथेकदेशासमर्पणं कार्यं ॥ अग्नेमंथस्यावदाय सव्ये पाणौ कुर्वीत इति मंथे न प्रयोजनस्य वि
धमानत्वात् ॥ ततो होता इडानिगदेन मंथमुपहूयावघ्रायाध्वर्यवे समर्पयति अध्वर्युरपि तमवघ्रा
य ब्रह्मणे प्रयच्छति ॥ ब्रह्माप्यघ्राय तमग्नीधे समर्पयति ॥ आग्नीदपि तमवघ्रायोत्करे निदधाती
त्यर्थः ॥ अस्मिन्पक्षे एतावदेव कर्तव्यं ॥ न प्राशित्रेडा षडवत्तभागः ॥ पक्षांतरमाह ॥ ॥ प्राशित्रम
वदायेडां वा वा शब्दो विकल्पार्थः ॥ अथवा प्रह्लेति वदेव प्राशित्रमिडां वावदायोपहूयावघ्रायं नि
दधाति होत्रादय इति पूर्वेणा सह संबध्यते ॥ एतत्त्व[illegible] चोल कुर्वीति यथा त्वेवेत इस्य यज्ञस्येडाप्रा
शित्रं समवधन्येवमेवैतस्यापि समवद्येत् सुस्तामुपहू[illegible] तैव जिघ्रति न प्राश्नातीति श्रूयते तत्त्वात् ॥

॥५६॥
॥देवपानि ८

एतत्त्वेवेति इति प्रसिद्धौ॥ एवकारोवधारणार्थः॥ उत्तरशब्दोपर्ये। अपिखल्वेतं वक्ष्यमाणमेवप
क्षं केचिदनुतिष्ठंति। तमेवदर्शयति यथान्वेवेति। नुशब्द एकीयमतव्यावृत्त्यर्थः॥ इतरस्य दर्शपूर्ण
मासादियक्षेस्य यथा इधं प्राशित्रं च समवद्यति सर्वेभ्यो हविर्भ्यः संनूयावद्यति। पूर्वमेवैतस्यापि
पितृयक्षेस्य समवधेयः। आवेवाजिघ्रतीति॥ अस्मिन्नपि पक्षे इडाप्राशित्रयोरवघ्राण
मेव कर्त्तव्यं ननु प्राशनमित्यर्थः॥ प्राशनपक्षमथाह॥ सर्वे प्राश्नंति वा॥ अथवा॥ अथवा इडां
प्राशित्रं चावदाय सर्वेभ्य ऋत्विग्भ्य जमानाय यथाविहितं प्रक्लृप्तेति वप्राश्नंति। वाशब्दो विकल्पा
र्थः॥ प्राशितव्यं त्वेवयं मन्यामह इतिहस्माहासुरिर्यस्य कस्य च। ग्नो जुह्वतीति श्रुतेः॥ इडा
वदानं प्राशित्रावदानं च पक्षांतरवदत्रापि प्राशितव्यमेव वयं मन्यामह इतिहस्माहासुरिर्म
हर्षिराहेत्यर्थः॥ एवं चात्र पक्षत्रयं॥ तृतीये पक्षे षडवत्तं ब्रह्मे यजमानभागा अपि भवंति॥ त
पूर्वयोः। अवघ्राणपक्षेपि मार्जनं भवत्येवोत्ततः॥ पवित्रप्रतिपत्तिः। तृतीये पक्षे भागपरिहारः॥ भा[illegible]
अन्वाहार्यदाने। उदगुद्वासने चात ततो वेदिपरिषेकादि। अग्नेर्ब्रह्मामंत्रणाविधानात्॥ ततः पू ॥

वैभाविनां पदार्थानां प्राकृतं च विकृतां विस्येनेन न्यायेन पूर्वमनुष्ठानं॥ ततो वैकृतानां वेदिपरिषे
कारिषेकादीनामिति॥ ॥ वेदिं त्रिः परिषिंचत्युदपात्रेणाध्वयुर्जमानो वा॥ अध्वर्युर्यजमानो वा उ
दपात्रेणाप्रदक्षिणं वेदिं त्रिः परिषिंचति॥ अथ यत्तरोदास्यन्भवति यद्यध्वर्युर्वा यजमानो वा भ
मादायेति आपस्तंबः॥ ॥ स्रक्तिषु पवित्रवत्तेजनेन परिषिच्य परिषिच्य पूर्ववत् वेदिं त्रिः परिषिंचती
ति त्रिः परिषेचनमुक्तं॥ तत्रैत्ति परिके परिके षें परिषिच्य परिषिच्य स्रक्तिषु वेदिकोणेषु पवित्रवने
जनं पितॄणां पि[illegible]त्र पितामहप्रपितामहानामवनेजनं करोति। पूर्ववदित्यनेन निक्ष्वेति उदपात्रेणाप
सिच्य यजमानस्य पितृप्रभृतित्रीनि वैत्येतेनावलुप्यते॥ स यजमानस्य पितरमवनेजयत्यसाववने
निक्ष्वेत्यसाववनेतिक्ष्वेत्यसाववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहमिति श्रवणा
त्॥ वेदिस्रक्तिष्विति शाखांतरात्। स्वशाखायां स्रक्तिषु पिंडदानविधानात्। केचिदेवं व्याचक्षते। त्रि
परिषिच्य पितुरवनेजनं। पुनस्त्रिः परिषिच्य पितामहस्य पुनस्त्रिरेव परिषिच्य प्रपितामहस्येति। प्रसव
नेजनमितरथावृत्तिरिति संप्रदायः॥ उत्तरापरस्यां प्रथमं। स्रक्तिषु पित्रादीनामवनेजनमिति ह्युक्तं॥ तत्र
प्रथममुत्तरापरस्यां स्रक्तौ वायव्यकोणे प्रथमं पितुरवनेजनं॥ ततो प्रादक्षिण्येन दक्षिणापरस्यां द्विती।

॥५७॥ यां पूर्वदक्षिणस्यां द्वितीयां पूर्वदक्षिणस्यां तृतीयमिति ॥ ॥सव्ये समवदाय सर्वेभ्यो यथावनिक्तं पिंडं
॥दैवयानि ५ दद्यादसावेतत्त इति ॥ अवनेजनानंतरं सर्वेभ्यो हविर्भ्यः सकाशात् सव्ये पाणौ समवदाय मिश्रीकृत्य त्रीन्
पिंडान् कृत्वा यथावनिक्तं यस्यां स्रक्तौ यस्मा अवनेजनं कृतं तस्यां तस्यैकैकं पिंडं ददाति असावेतत्त इत्य
नेन मंत्रेण। अथास्य पुरोडाशस्यावदाय सव्ये पाणौ कुरुते धानानामवदाय सव्ये पाणौ कुरुते स येमामवा
न्तरदिशमनुस्रक्तिस्तस्यां यजमानस्य पित्रे ददात्यसावेतत्त इत्यादिश्रवणात् ॥ अवदायेति वचनादंगु
ष्ठपर्वमात्रमवदेयं ॥ ॥उत्तरपूर्वस्यां पाणी निमृष्टेऽत्र पितर इति। पिंडदानात् अत्र पितर इति मंत्रेण
उत्तरपूर्वस्यां स्रक्तौ ईशानकोणगायां पाणी निमृष्टे। हस्तौ मार्जयति हस्तगतं लग्नं तत्तत्र निमार्ष्टीत्यर्थः। अ
थ येमामवांतरदिशमनुस्रक्तिस्तस्यां निमृष्टेऽत्र पितर इति श्रुतेः। ।यज्ञोपवीतिनः सर्वे निःक्रम्योदंचो
ऽक्षन्नमीमदंतेत्याहवनीयमुपतिष्ठंते द्वाभ्यां। हस्तनिमार्जनानंतरं सर्वे ऋत्विग्यजमाना यज्ञोपवीतिनः कृ
तसव्या उदंच उदङ्मुखाः परिवृत्ता निःक्रम्याहवनीयस्य पूर्वपार्श्वेनाहवनीयस्योत्तरतः समीपे आग
त्याक्षन्नमीमदंतेति द्वाभ्यामाहवनीयमुपतिष्ठंते। ते सर्व एव यज्ञोपवीतिनो भूत्वोदंच उपनिष्क्रम्याहव
नीयमुपतिष्ठंत इति। ते द्वाभ्यामाहवनीयमुपतिष्ठंत इत्यादिश्रुतेः। परिवृत्तस्योदग्द्वारत्वात् ततो निःक्रा
मतामर्थादुदङ्मुखत्वे सिद्धे उदंच इति व्यर्थमिति चेत्। न। पृष्ठतोनवलोकनार्थमुदंच इत्युक्तमिति चेत्।

नोपष्टते। नवलोकनार्थमुदंचइत्युक्तमिति न दोषः॥ अथवा अत्र सनुवाद्स्यानुकरणमेवैतत्॥ ॥ मैन्चोक्ष्या
महइति गार्हपत्यं तिसृभिः॥ ततआहवनीयसमीपाद्गार्हपत्यं प्रत्यागत्य मन्तोन्वाक्ष्यामह इति निष्ठ्य पितृग्नि
गार्हपत्यमुपतिष्ठंते सर्वे। गार्हपत्यसमीपे स्थित्वा तं विलोकयंतस्तृचं पठंतीत्यर्थः॥ ॥ अवस्थानंच सर्वे
षामंतर्बहिर्भावेन॥ अंतरतः स्वामी॥ यथापूर्वमृत्विजश्चेति। अथ प्रतिपरेत्य गार्हपत्यमुपतिष्ठंते मनोन्वि
त्यादिश्रवणात्। प्राचीनावीती प्रविश्यामीमदंतेति दाता जपति। उपस्थानानंतरं पिंडदाना प्राचीनावीती
कृत्वोपसव्यः पुनः परिवृत्त प्रविश्यामीमदंतेति मंत्रं स्वरेण जपति॥ अथ यतरो दद्यात्तिसृ पुनः प्राचीना
वीती भूत्वाभिप्रपद्य जपसमीमदंतेत्यादिश्रुतत्वात्॥ उपस्थानानंतरं सर्वेप्यपसव्यं कृत्वा परिवृत्तं प्र
विशेयुः। कुतः अग्नेः सर्वेषां यज्ञोपवीतित्वविधानात्॥ अवनेज्य पूर्ववत्प्रदक्षिणं नीविं विस्रंस्य नमो
वइत्यंजलिं करोति। ततः पूर्ववदिति वेदिं परिषिच्य परिषिच्या। तत्राप्ययं विशेषः। प्रदक्षिणमत्र परि
षेको न पूर्ववदपूर्वप्रदक्षिणं। अन्यत्सर्वं पूर्ववत्। प्रत्यवनेजनमितरथा वृत्तिश्च भवति॥ अथोदपा
त्रमादाय पुनः प्रसलवित्रिः परिषिंचन्पर्येति स यजमानस्य पितरमवनेजयस साववनेनिद
स्साववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहं इति श्रुतत्वात्॥ ततो नीविविस्रंस्य न
ने

॥५८॥
॥दर्शश्रानि ५

मो ॰॰ पितर इति मंत्रेणैकमंजलिं करोति नमस्कारार्थत्वाच्च पुष्पांजलिः कार्यः। अथ नीविमुद्धत्य नम
स्करोति श्रवणात्॥ षड्नमस्कारात्॥ अथवा षण्नमस्कारात् षडंजलीन्करोतीति तच्चेकां षट्कृत्वो नमस्क
रोती [illegible] ति षण्णां नमस्काराणां श्रवणात्॥ तत्र नमो वः पितरो मन्यवे नमो वः पितरो नमो व इति षष्ठो
मंत्रः। पूर्वे तु प्रसिद्ध ताः। केचित्तु शोषायेति वेतीमौ वर्जयित्वा षडेव नमस्काराः कर्त्तव्या इत्याहुः॥
